कवीन्द्र गंगानन्द ग्रन्थावली

मिथिलाविद्यापीठग्रन्थमाला

प्राचीनाचार्यग्रन्थावल्यां

एकत्रिंशत्तमं पुष्पम्

कवीन्द्रगङ्गानन्दग्रन्थावली

दरभङ्गास्थललितनारायणमिथिलाविश्वविद्यालयीयसंस्कृतविभागाध्यक्षेण
प्राचार्येण झोपाह्व-
(डाक्टर) त्रिलोकनाथशर्मणा
सम्पादिता

१९८८ तमे खृष्टाब्दे मिथिलाविद्यापीठप्रधानेन
दरभङ्गानगर्यां प्रकाशिता

Mithila Institute Series Ancient Text No 31

KAVĪNDRAGAṄGĀNANDAGRANTHĀVALĪ

Critically edited by

TRILOKANĀTHA JHĀ

PH. D.

Professor and Head

University Department of Sanskrit

L. N. Mithila University,

Kameshwarnagar, Darbhanga

DARBHANGA

1988

Copies of this volume, postage paid, can be had of the Director, Mithila Institute, Darbhanga on receipt of the price by M. O., Postal Order or Cash.

Copyright : Publisher

Price : Rs MLBD MLBD

First Edition—500

Printed at the Lakshmi Printing Press, Motijheel, Muzaffarpur and published by Dr Shridhar Tripathi, Director, Mithila Institute of Post-graduate Studies and Research in Sanskrit Learning, Darbhanga.

THE GOVERNMENT OF BIHAR established the *Mithila Institute* of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga in 1951 with the object, *inter-alia,* to promote advanced studies and research in Sanskrit learning, to bring together the traditional pandits with their profound learning and the modern scholars with their technique of research and investigations, to publish works of permanent value to scholars. This Institute is one of the five others planned by this Government as a token of their homage to the tradition of learning and scholarship for which ancient Bihar was noted. Apart from the Mithila Institute, three others have been established and have been doing useful work during the last three or four years—Nalanda Institute of Research and Post-Graduate Studies in Buddhist Learning and Pali at Nalanda, K. P. Jayaswal Research Institute at Patna, and the Bihar Rashtra Bhasha Parishad for research and advanced studies in Hindi at Patna. In the establishment of the Mithila Institute the State Government received a generous donation from the Maharajadhiraja of Darbhanga for construction of the building on a plot of land also donated by him.

As part of this programme of rehabilitating and re-orientation of ancient learning and scholarship, the editing and publication of this volume has been undertaken with co-operation of scholars in Bihar and outside. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the world of scholarship and learning would bear fruit in the fulness of time.

CONTENTS

Pages

PREFACE I

INTRODUCTION .... II—IX

BHṚṄGADŪTA .... 1—31

KARṆABHŪṢAṆA .... 33—112

ALASAMODINĪ .... 113—122

KĀVYAḌĀKINĪ .... 123—184

ŚṚṄGĀRAVANAMĀLĀ .... 185—214

An alphabetical index of verses in the *Kavīndragaṅgānandagranthāvalī* .... i—xii

An alphabetical index of *Kārikā*-s in the *Kavīndragaṅgānandagranthāvalī* .... xiii—xx

An alphabetical list of books and authors cited or referred to by Gaṅgānanda in his works xxi

PREFACE

In the course of our researches on "The contribution on Mithilā to Sanskrit *Kāvya-sāhitya*" we came acorss a number of valuable manuscripts which had not been published. One such was the *Śṛṅgāravanamālā* of Kavīndra Gaṅgānanda of Mithilā. Other published works of Gaṅgānanda were also not easily available. We, therefore, decided to publish a volume containing all his available works on the line of *Kavirājabhānudattagranthāvalī*.

We approached the Director, Mithila Institute of Postgraduate Studies and Research in Sanskrit Learning, Darbhanga and he was kind enough to include the present volume in his programme of institute-publications. We express our gratitude to him.

We are also thankful to the proprietors of Lakshmi Press, Muzaffarpur for their keen interest in getting the volume printed.

We would further like to put on record our deepest sense of gratitude to the editors of the works forming the corpus of the present volume.

We crave the indulgence of the sympathetic reader to ignore the defects in the volume, which are many, and pick up the solid grains from the chaff. For,

"haṁso hi kṣīram ādatte
tanmiśrā varajyatya'paḥ"

September 15, 1998 **Trilokanātha Jhā**

INTRODUCTION

Mithilā is the region surrounded by rivers on three sides and by a mountain on the fourth. The River Kauśkī flows on her east and the River Gaṇḍakī on her west. The River Gaṅgā forms her southern boundary, whereas the Himālaya her northern. She has a unique distinction of contributing her mite to the advancement of Sanskrti learning right from the Vedic period. The contribution of Mithilā to Sanskrit learning is not limited to any one branch of it, rather most of its branches flourished in this fertile land of erudition and imagination. In the field of Kāvya-Sāhitya as well poets, prose-writers, dramatists and rhetoricians of note hailing from Mithilā have enriched the Sanskrit literature by their valuable contributions. An outstanding scholar in this field is Kavīndra Gaṅgananda, whose complete available works have been compiled here.

As is evident from the statements in his works, it is an established fact that Kavīndra Gaṅgānanda hailed from Mithilā. In the *Karṇabhūṣaṇa* he calls himself a '*tairabhukta*'[1] (a resident of Tirhut) and in the *Śṛṅgāravanamālā* a '*mithilādeśavāsin*'[2] (an inhabitant of Mithilādeśa).

Tradition says that Gaṅgānanda lived in village Sarisava, the village of his maternal grand-father. This stand corroborated by the fact that he has extolled this village to the skies in his *Bhṛṅgadūta*[3] and called it a '*grāmvatana*'. This village has been a seat of Sanskrit

---

1. *tairabhuktena dhīreṇa gaṅgānandena nirmitam /*
sarasvatīvataṁsāya spardhate karṇabhūṣaṇam // vide infra p. 112
2. *bhā upautrītanūjena mithilādeśavāsinā /*
śṛṅgāravanamāle 'yaṁ gaṅgānandena tanyate // vide infra p. 185
3. *vide infra* p. 10, verse nos. 50-52.

learning from the days of yore. It has produced a galaxy of Sanskrit scholars, who have secured an undying fame for their native village[4]. Prominent among them are : Ayācī Bhavanātha, M.M. Śaṅkara, Mahādeva, Dhakkākavi Gaṇpati, Kavirāja Bhānudatta, Paraśurāma, Kavīndra Gaṅgānanda, Harihara, Veṇīdatta, Sacala, Mohana, M.M. Dr. Gaṅgānātha, Dr. Amaranātha, Mārkandeya, M.M. Bālakṛṣṇa, and Kaviśekhara Badarinātha and Umānātha.

Gaṅgānanda was born in the seventeenth century. He was the '*pautrī-tanūja*' (son of the grand-daughter) of Bhānudatta. This is supported also by the the *Pañjī* or the genealogical records of the Brāhmaṇas and Kāyasthas of Mithilā. The *pañjī* informs us that Kavirāja Bhānudatta, the renowned author of the *Rasamañjarī*, *Rasataraṅgiṇī*, the *Rasapārijāta*, the *Kumārbhārgavīyacampū*, the *Alaṅkāratilaka* and the *Gītagaurīpatikāvya*, of the *Sodarapara*-family gave in marriage his grand-daughter, Sokhaita, daughter of his eldest son, Janāradana *alias* Jānu, to one Būḍhaba Jhā of the *Baliāsa*-family and that Gaṅgānanda was the youngest of the eight sons and two daughters of this couple. The maternal side of Gaṅgānanda was more illustrious than his paternal side. And that might be the reason for his introducing himself as '*bhānupautrītanūja*'. A scholar of repute on the side of his father who is worthy of note is Paṇḍitarāya (Paṇḍitarāja) Raghunandana Jhā, disciple of M.M. Maheśa Ṭhakkura. Raghnunandana had the unique distinction of receiving the Mithilā Raj in recognition of his learning from Emperor Akbar and transferring it immediately to his Guru-Maheśa Ṭhakkura as *guru-dakṣinā*. This Raghunandana was the elder brother of Gaṅgānanda's father-Būḍhaba Jhā.

Gaṅgānanda was a talented poet. His poetic talent fetched for him the coveted title 'Kavīndra'. There are numerous compositions to his credit. They are as follows :

---

4. *vide* a poem by Kaviśekhara Badarīnātha Jhā published on p. 1 of *Smārikā* Sarisavapahi, Darbhanga, 1968 and quoted by the present author on pp. 3-4 of his work entitled '*Mithilākā vibhūti M.M. Śaṅkara Miśra*' published by Maithili Akademi, Patna, 1983.

1. *Bhṛṅgadūta*[5]
2. *Karṇabhūṣaṇa*[6]
3. *Alasamodinī*[7]
4. *Kāvyaḍākinī*[8]
5. *Sṛṅgāravanamālā*[9]
6. *Mandiramañjarīnāṭikā*[10]

Of these the first four are already published. The fifth has been published here for the first time and the last is yet to be traced out.

BHṚṄGADŪTA

The *Bhṛṅgadūta* is a *Khaṇḍa-kāvya* containing 171 verses, in which the poet has tried to imitate the inimitable *Meghadūta* of Kālidāsa. As in numerous imitations of the immortal classic usually classified under the heading '*dūta-kāvya*', in the present work also the poet has borrowed even its metre, *mandākrāntā*. In it Lord Kṛṣṇa and Rādhā stand for Kālidāsa's Yakṣa and Yakṣī, Kāmākhyā for Rāmagiri, Madhupurī for Alakā and the black-bee (*bhṛṅga*) for the cloud. Here the Lord is described as employing a black-bee as an emisary to carry his message to his beloved Rādhā and we have a beautiful and picturesque description of the bee's journey from Kāmākhyā in Assam to Madhupurī route to be followed by the bee in all its details : the rivers and the tributaries; the towns and cities; the places of pilgrimage and the seats of learning, all after the pattern of the *Meghadūta*. Kāmākhyā; Kālabhairava on the Bhairava-mountain on the

5. Raj Press, Darbhanga, 1915.
6. Nirnaya Sagar Press, Bombay, 1902.
7. Vishveshvaranand Vedic Research Institute, Hoshiapur, 1964.
8. Saraswati Bhawan Texts, Benares, 1924.
9. Being published here on the basis of two available incomplete mss.
10. Referred to in the *Kāvyaḍākinī*, *vide infra* p. 169.

bank of the Brahmaputra; the Svarṇakauśikī; Śrīvihāra; Jalpīśvara; the Kauśikī; Tīrabhukti; the village Sarisava, Koṭīśvara; the Kamalā; the city of Darbhanga; Gāṇḍīvakeśvara; Brahmpura; Gautamakuṇḍa; Harihara-kṣetra; the city of Patna; Paṭanadevī; the cities of Vāraṇasī, Prayāga and Mathurā has been described in all their grandeur. The poet's description of the lustre of the ladies of Vārāṇasī is worthy of note[11].

In the present context it may be mentioned that Gaṅgānanda's selection of Lord Kṛṣṇa as the hero and Rādhā as the heroine of the theme is a clear indication of his Vaiṣṇava temperament.

The only available commentary on the *Bhṛṅgadūta* is called *Rameśvaraprasādinī*[12], after the name of the Late Mahāraja Rameśvara Siṁha of Darbhanga. The comnentator, Cetanātha Jhā was a protege of the said Mahārāja.

KARṆABHŪṢAṆA

The *Karṇabhūṣaṇa* is a treatise on Sanskrit poetics, complete in five chapters, called *pariccheda*, dealing with the nature of the poetic sentiment (rasa). The first three chapters are devoted to an elucidation of its three accredited constituents, namely, adherent-cum-excitant; ensuant and variant in serial order. The fourth chapter concerns itself with the basic emotion, whereas the last has for its theme an elucidation of the nature of the process of the realization of the poetic sentiment. Gaṅgānanda has given his own mellifluous verses saturated with devotion to Lord Kṛṣṇa illustrations.

---

11. *uttīṇānām sapadi salilat tattaṭī saumyayāsām* /
hemābhinnā bhavati paritaḥ kāyakānticchaṭābhiḥ //
vide infra, p. 8, verse no. 96 (ed).

12. Published with the Bhṛṅagadūta in its edition referred to above.

At the outset Gaṅgānanda tells us that he is composing the Karṇabhūṣaṇa by the order of King Karṇasinha of Bikaner[13].

ALASAMODINĪ

The *Alasamodinī* is a composition meant for the beginner. The language is simple and the style lucid. Therefore, the work can easily be understood even by those who have just started studying Sanskrit poetics. As regards its contents, it deals with the classification of the different types of heroes and heroines and their moods and accessories. Divided into three sections called *praṇaya*-s, the *Alasamodinii* is supplementary to the author's other works on poetics.

KĀVYADĀKINĪ

The *Kāvyadākinī* is a unique work. It is unique in the sense that it is devoted exclusively to the elucidation of the nature of poetic blemishes. It is divided into five chapters called *dṛṣṭi*. The first chapter begins with the definition of a poetic blemish and proceeds to classify it into five types : blemished pertaining to a word; those pertaining to the part of a word; those relating to a sentence; those relating to the meaning and those concerning the poetic sentiments. And then the sixteen varieties of the first, viz., poetic blemishes pertaining to a word, are defined, explained and illustrated. The subsequent chapters deal with the remaining four classes of poetic blemishes in serial order.

Paṇḍita Jagannātha Śāstrī Hośing, in his introduction to the *Kāvyaḍākinī* says : "The author whose name appears as Gaṅgānanda in the colophon, was a Maithil Brahman, being the younger brother of one Raghunātha to whom he refers (p. 37) Nothing is known about his parentage[14]"

---

13. *vide infra*, p. 33, verse nos. 2-4.

14. *vide*, p. 1 of the book but on p. 37 we find that the brother is called Raghudeva and not Raghunātha. The line reads '*vrthi mam bhrāiṛcaraṇānāṃ Raghudevaśarmaṇāṁ* : *vide infra*, p 162. This Raghudeva is the same as Raghai of the *pañjī*.

SṚṄGĀRAVANAMĀLĀ

The *Sṛṅgāravanamālā*[15], a hitherto unpublished work has been edited here on the basis of two available incomplete mss : first, Ms No. 845 preserved in the Mithila Research Institute, Darbhanga and second, a transcript copy of foolscap size containing thirteen pages copied by the Late Keviśekhara Badarīnātha Jhā in August 1932 from a manuscript in the possession of one of his cousins, the Late Pt. Lekhanātha Jhā. The Mithila Institute manuscript containing six folios in 14" x $5^1/_2$. It is written in Maithilī characters. It has 15 to 17 lines a page and 64 to 69 letters a line. The Mithila Institute ms has been termed 'A' hereinafter. It extends upto the initial letter of the fourth foot of the verse illustrating *'āyacchatpatikā magdhī'*[16]. The transcript copy, herein after 'B', breaks of earlier. The last verse therein is that which illustrates *'parakīyā vāsakasajjā'*[17].

The descriptive catalogue of Manuscripts in Mithilā mentions a complete ms of the work under the caption *Vanamālā*[18] with one Babu Nenamaṇi Jhā of Bāṅkī. The present writer was not able to procure iṭ. Fortunately, both the incomplete mss start with the beginning of the work.

In the very opening verse the author pays obeisance to Lord Kṛṣṇa. He then established the supremacy of the Śṛṅgārarasa and following in the footsteps of Kavirāja Bhānudatta proceeds on defining and discussing the different varieties of *nāyikā.* He gives his own verses as illustrations. His style is simple and lucid.

A special feature of the Śṛṇgāravanamālā is that Gaṅgananda has introduced a new type of *nāyikā* naming her '*āgacchatpatikā*' (one whose

15. *vide* the paper of present writer entitled. "The *Śṛṅgāravanamālā* of Kavīndra Gaṅgānanda of Mithilā" published in the Journal of the Gaṅgānātha Jhā Kendriya Sanskrit Vidyapeetha Vol. X, Jan.-Dec. part 1-4, 1984, pp. 33-38.

16. *vide infra* p. 21.

17. *vide infra* p. 211.

18. *vide* Vol II No. 44.

husband is on his way back to his abode to meet her). In support of his new classification he says that this variety of *nāyikā* cannot be subsumed under any other traditionally accepted veriety. He starts discussing this type of *nāyikā* but unfortunately, as stated above, the ms available to us breaks off in the last foot of the verse illustrating the *mugdhā* veriety of this type of *nāyikā*.

THE PATRON OF GAṄGĀNANDA

The only work in which Gaṅgānanda refers to his patron is the *Karṇabhūṣaṇa*. As stated above[19], he composed this work at the instance of king Karṇa Siṁha of Bikaner. Paṇḍita Bhavadatta, Parab, Pansikar, De and Kane seek to identify this Karṇasiṁha with Śrī-Lūṇa-Karṇa, son of Bikājī Mahārāja, who flourished between 1506 and 1527 A.D. But Maithila tradition informs us that Gaṅgānanda lived during Saṁvat 1673 to 1743 (corresponding to 1615 to 1685 A.D.) and so Gaṅgānanda's patron should have been another Karṇasiṁha who ruled over Bikaner in the middle of the seventeenth century[20].

Gaṅgānanda was a devotee of Lord Viṣṇu. In the opening verse of the *Karṇabhūṣaṇa*, the imaginative dialogue of the divine couple, Lakṣmi and Viṣṇu, is very charming. Their smile is invoked for warding off the adversities of the reader[21]. Similarly, the flute in the hand of Lord Kṛṣṇa has been invoked for the same purpose in the first verse of the *Kāvyaḍākinī*[22]. In the same way, obeisance has been offered to Lord Kṛṣṇa in the opening verse of the *Śṛṅgāravanamālā* as well[23].

---

19. *vide supra* p. VI
20. *vide* Mabel Duff : Chronology of India-p. 277.
21. *vide infra*, p. 33.
22. *vide infra*, p. 125.
23. *vide infra*, p. 185.

भृङ्गदूतम्

कश्चित्कामी नवजलधरद्रोहकृद्देहकान्तिः
क्षामः कामव्यथितहृदयो विप्रयोगात् प्रियायाः ।
मल्लीपुष्पस्तबकसुभगे मञ्जुगुञ्जद्द्विरेफे
चक्रे नीलाचलतटवने पावने सन्निवासम् ॥१॥
तत्रासीनः कमलनयनस्तापनिर्वापहेतो–
र्जायाकायाकृतिसहचरीं वीक्षमाणः स वल्लीम् ।
मन्दस्पन्दानिलवति मधौ मासि माध्वीकपानं
कुर्वाणं तं कुसुमकुहरे षट्पदं पश्यतिस्म ॥२॥
अत्रारण्ये विरहिदमनव्याप्रतेयं मधुश्री–
रित्युद्वेगाद् विघटितधृतिः सोऽश्रुपूरं मुमोच ।
मन्दं मन्दं वहति पवने स्वालये मान्मथीया–
मन्तर्बाधां जगति विरही कामुकः कः सहेत ॥३॥
आश्वासाय प्रणयिरमणीचेतसः षट्पदेन
स्वप्राणानां कुशलपिशुनं प्रापयिष्यन्नुदन्तम् ।
अस्त्येतस्मिन्नलिनिदयितानेत्रमैत्रीति चित्ते
मत्वा गत्वान्तिकमतिमृदूवाच तं वारिजाक्षः ॥४॥
दूतैराप्तैः परमकुशलैर्वाचिकं क्व प्रहेयं
वन्यो जन्तुः क्व च जडमतिश्चञ्चलश्चञ्चरीकः ।
इत्यस्मृत्वा स्मरशरहतः[1] श्रीपतिस्तं ययाचे
कामज्वाला भ्रमयति मनो देहिनो वा न कस्य ॥५॥

1. '–हृतिः' is the alternative reading in the printed edition.

पञ्चेषोस्त्वं मधुकर ! जगज्जेतुमेकोऽसि वाणः
प्राणप्रायस्त्वमसि विदितः पुष्पकालस्य लक्ष्म्याः ।
ईहे किञ्चिद् विरहविधुरः प्रार्थितुं त्वत्सकाशा–
दाशापूर्तिप्रथितयशसो यन्महान्तो भवन्ति ॥६॥

क्रूरः कामो वपुरनुपलं हन्ति बाणैर्मदीयं
कर्णज्वालां जनयतितरां कोकिला काकलीभिः ।
विच्छेदं न क्षणमपि दृशोर्याति बाष्पप्रवाह–
स्तस्मान्नाहं कमपि भवते दातुमीशे सहायम् ॥७॥

पुष्पात् पत्रे निपतितवती साधु माध्वीकधारा
शिष्टाचारात् तव यदि पुरो नीयते तृप्तिहेतोः ।
न स्यात् सापि भ्रमर ! भवतश्चित्तसन्तोषकर्त्री
स्वेच्छाचारः सुखयति यतो वन्यजन्तोर्मनांसि ॥८॥

स्तुत्या तावत् तव रचितया वर्धमानो मनोभः
भावी हन्ता सुदृढमिति मां[1] नास्मि कर्तुं समर्थः ।
अप्यन्यस्या भवदपचितेर्या च्युतिर्भृङ्ग ! सापि
क्षन्तव्या ते भवति महतां यत् क्षमा भूषणाय ॥९॥

एकारण्ये समजनि चिरादावयोर्यन्निवासः
सादृश्यन्ते तनुसुषमया यद्दधानोऽहमस्मि ।
तन्मित्राङ्गीकुरु विरहिणो वाचिकप्रापणं मे ।
बन्धोः कृत्यं जगति मनुते स्वस्य कृत्यं हि लोकः ॥१०॥

एष क्षोणीधरपरिवृढो विश्वविख्यातनामा
कामाख्याया निवसतिवशादस्तपापोपचारः ।

1. Y reads 'तां'

उच्चैरुद्यत्प्रतिरवमिषाद्यन्मयोक्तं तदेव
ब्रूते वाग्भिर्भ्रमर ! भवते गह्वरास्योत्थिताभिः ॥११॥

गन्तव्या ते ननु मधुपुरी राजमाना व्रजस्त्री[1]–
वृन्दैर्वृन्दारकमृगदृशां रूपगर्वं हरद्भिः ।
आस्ते यस्यामनुपमतनुर्जातविश्लेषबाधा
राधा साधारणनिवसना मद्वियोगव्यथाभिः ॥१२॥

तत्रोपेत्य भ्रमर ! भवता सा वियोगाग्निखिन्ना
भिन्ना बाणैः कुसुमधनुषः शश्वदाश्वासनीया ।
तादृक्पुण्यं न खलु जनयत्यश्वमेधादियज्ञै–
र्विज्ञोपायैश्चिरविरहिणां यादृगार्तिव्यपायः ॥१३॥

पथ्यातिथ्यं त्वरितविहितश्रान्तिविश्रान्तिभाजः
पुष्पोत्पन्नैर्मधुप ! मधुभिर्वीरुधस्ते विदध्युः ।
प्रायेणास्मिन् जगति भवनोत्पत्तिभिर्वस्तुभिः स्वैः
प्रत्यायाते सविधमतिथौ के सपर्यां न कुर्युः ॥१४॥

पुष्पोत्पन्नान् मधुकर ! पुरोवातनुन्नान् परागान्
पक्षक्षेपश्रमपरिहृतोऽनुव्रजंस्तीव्रवेगः ।
स्थानादस्माज्जवनपवनोद्धूतकौसुम्भगन्धाद्
बन्धुप्रीत्या दिशमनुसरेदप्रयत्नात् प्रतीचीम् ॥१५॥

ध्यायं ध्यायं मनसि दयितोदन्तमस्मत्प्रयुक्तं
पायं पायं मधुकर ! सरिद्वारि कच्छस्थमच्छम् ।
पश्यन् पश्यन् बहलविभवैर्देशमेतं समेतं
हृष्यन् हृष्यन् निभृतपवनप्रेरणेन प्रयाहि ॥१६॥

1. Y reads 'वरस्त्री–'

यत्रौपम्यं नभसि सरता श्रीमता साकमुच्चैः
शङ्के पङ्केरुहदलदृशो लोचनानां विदध्युः ।
दर्शं दर्शं जगदनुपमं तेऽङ्गसङ्गिप्रकारं
पश्चाद् गुर्वीन्नयनसुषमागर्विताश्च त्यजेयुः ॥१७॥

घ्रागाघ्रातुं मुखसुरभितां मानवत्या व्रजेस्त्वं
साप्याश्लिष्येत् पतिमतितरां दंशनाद् बिभ्यती ते ।
यत्रानन्दोल्लसितवचसा स्तोष्यति त्वां सहर्षः[1]
कष्टोन्मुक्तौ हितकृति जने को न सन्तोषमेति ॥१८॥

कुञ्जे कुञ्जे कुसुमनिकरान् जिघ्रतोऽशीघ्रमुच्चै[2]–
र्माध्वीकानि भ्रमर ! पिबतो वारिजातोद्भवानि ।
यत्राशङ्के ननु कतिपये वासरास्ते व्रजेयु–
र्भोगोद्रेको जगति हि मनो नानुबध्नाति कस्य ॥१९॥

आघ्राणाय श्रवणनिहिताम्भोरुहाणां विदूरा–
दायातस्य प्रमुदितहृदा सन्निधानं क्षणेन ।
स्निग्धश्यामं तव निरुपमं रूपमालोकयन्त्यः
कुर्युर्यत्र प्रियपरिभवं केशपाशे युवत्यः ॥२०॥

दृष्टिश्रेणी गगनसरणौ सन्तरन्तं भवन्तं
प्रत्यायास्यत्यलिवर ! यदा कामरूपाङ्गनानाम् ।
उत्पश्यामि प्रियसख ! तदा भावि तत्रान्तरिक्षं
भृङ्गाकृष्टाम्बुजदलमयस्रक्प्रभाप्रेक्षणीयम् ॥२१॥

मल्लीमाल्यप्रचयनिचिता बद्धधम्मिल्लभारा–
स्तारानाथद्युतिविहसिता विद्युता तुल्यभासः ।

1. Y reads 'स हृष्टः'
2. Y reads 'जिघ्रतः शीघ्र–'

भ्रातर्वातप्रचलकमलक्षोभिचक्षुर्विलासाः
श्वासासारीकृतमृगमदा यत्र योषा वसन्ति ॥२२॥

यत्रायातं सरसिजधिया त्वां समीपं मुखस्य
प्रेक्षिष्यन्ते कमलवदना लोचनैर्नर्तितान्तैः ।
नो चेत् तेन भ्रमर ! हृदयानन्दमालप्स्यसे त्वं
वैदग्ध्यानां शिव शिव कथा स्याद् वृथा त्वद्विधेषु ॥२३॥

यत्र स्त्रीणां तरुणहृदयाकृष्टिवैदग्ध्यदक्षा
द्रागुद्यान्ति प्रचलकमलद्रोहभाजः कटाक्षाः ।
यानालोक्य क्षणमपि भवेस्सर्वथा नो समर्थ-
स्त्वं निर्यातुं भवति हि मतिः सौख्यदृष्टिर्जनस्य ॥२४॥

दूरं गच्छ भ्रमरहतक ! प्राणबाधां न कुर्या
ब्रूयाः किंवा सपदि दयितस्यान्तिकादागतोऽसि ।
अत्रायाहि प्रथय दयितोदन्तमित्याप्स्यसि[1] त्वं
निन्दाकूतप्रमुखवचनं यत्र विश्लेषिणीनाम् ॥२५॥

ईषद्धासव्यपगततमस्सञ्चयाः पङ्कजाक्ष्यः
पीयूषाब्धिं वचनरचनैर्लाघवं प्रापयन्ति ।
यासां यत्र प्रियसख ! मुदा सुभ्रुवां पुष्पधन्वा
नित्यं नृत्यत्यधिकमधिकं दृष्टिरङ्गस्थलेषु ॥२६॥

सौधे यत्र स्फटिकघटिते प्रेयसीवक्त्रबुद्ध्या
कान्तः कामं मधुप ! कुरुते चुम्बनं शीतधाम्नः ।
ताराः किञ्च प्रणयिसुरतोत्तीर्णदारस्तनान्त-
र्मुक्ताहारस्खलितगुटिकाभ्रान्तिमुत्पादयन्ति ॥२७॥

1. Y reads '-प्स्यसे'

क्रीडन्तीनां कुवलयदृशां कामिभिर्यत्र साकं
सौम्यावस्थां नयनसुखदां मानसोल्लासभाजाम् ।
दृष्ट्वा दृष्ट्वा मुषितहृदयो मा विलम्बं विदध्याः
कर्मार्तस्य भ्रमर ! बलवत् सर्वतो हि स्वबन्धोः ॥२८॥

स्थानादस्माज्जलनिधिमिवास्तीर्णमंहोऽपनेतुं
सेव्यं देवासुरमुनिगणैर्ब्रह्मपुत्रं परीयाः ।
यत्र स्नातुं फलमतिमहत् प्राप्तुकामा निकामं
सर्वे यान्ति भ्रमर ! मनुजाश्चैत्रशुक्लाष्टमीषु ॥२९॥

आदध्यास्त्वं चपललहरीहस्तपादावघातं
हित्वा तस्मिन् सलिलममृतप्रायमंहःक्षयाय ।
तस्माद् भावी सुकृतनिचयव्याचितस्तेऽन्तरात्मा
ते गण्यन्ते जगदुपरि ये पुण्यभाजो भवन्ति ॥३०॥

तीरे तस्य भ्रमर ! शिखरी भैरवो नाम तस्मि–
न्नास्ते देवस्त्रिभुवनपतिर्भैरवः कालपूर्वः ।
गच्छेस्तत्र त्वमतिनिभृतः[1] सावधानः प्रभूणा–
मग्रे सद्यो भवति महते नम्रता यत्फलाय ॥३१॥

तस्योपेत्य भ्रमर ! निकटे देवदेवस्य शम्भोः
सन्तोषाय श्रवणसुखदध्वानधारां विदध्याः ।
तस्मात् सद्यो विषमसरणेर्निर्गमञ्चार्थयेथाः
कालक्षेपः पथि तनुभृतां यत् स्वकृत्यक्षयाय ॥३२॥

श्रद्धायुक्तस्त्रिपुरमथिनं तन्नमस्कृत्य पश्यन्
पाथोवेगाहतगिरिशिलां कौशिकीं स्वर्णपूर्वाम् ।

1. Y reads '–निभृतं'

गच्छेः क्षिप्रं ललितनगरं नामतः श्रीविहारं
खञ्जीभूय भ्रमर ! वसति प्रायशो यत्र लक्ष्मीः ॥३३॥

दन्तज्योतिर्विजितहिमरुक्कान्तयः स्वर्णभासः
त्रासोद्वेल्लद्विपिनहरिणीवीक्षणाः क्षीणमध्याः ।
हस्ताशस्तीकृतकिसलया नूतनाम्भोदकेश्यो
यूनां यत्र प्रिययुवतयो मानसं मोदयन्ति ॥३४॥

क्रीडाहेतोः कुवलयदृशामागतानां पुरस्तात्
संक्रान्तानि स्फटिकघटिते यस्य सौधे मुखानि ।
दर्शं दर्शं चकितचकितप्रेक्षण[1]व्यग्रनेत्रा
धिक् प्रेयांसोऽधरकिसलयं संशयान्नो धयन्ति ॥३५॥

विद्युन्निन्दानिपुणतनवः पट्टवासो वसाना
नानाभूषाखचितवपुषः कोकिलाद्वेषिवाचः ।
कन्दर्पास्त्रीकृतमुखरुचो हंससञ्चाररम्याः
पीनोत्तुङ्गस्तनभरनता योषितो यत्र सन्ति ॥३६॥

बालोद्यानस्फुटितकुसुमामोदभारापहारी
शैत्याधारीकृतरतपरिक्लान्तकान्ताङ्गयष्टिः ।
यत्रोत्तुङ्गप्रचललहरीशीकरासारवाही
मन्दोत्साही जनयति सुखं तीरसागन्धवाहः ॥३७॥

पीत्वा पुण्यं परमशिशिरं श्रीजटोदाततटाम्भः
स्थाने स्थाने पनसकदलीकाननं वीक्षमाणः ।
पश्येस्तस्मान्मधुकर ! पथा दक्षिणेन क्षणेन
त्वं निर्गच्छन्नमरमहितं मन्दिरं कालिकायाः ॥३८॥

1. Y reads '-प्रेक्षणा-'

सन्निष्क्रम्यासुरवरकृते या भवानीललाटात्
नीलं रूपं सपदि दधती कालिकाख्यां जगाम ।
या चाकाशे धरणिहरितोः सन्निवेश्याधरौष्ठं
पीत्वा रेजे रुधिरमधिकं रक्तबीजासुरस्य ॥३९॥

मूकीभावं चिरमुपगता ये दृशा ये विहीनाः
ये बाधिर्यव्यथितहृदया ये पुनः खञ्जपादाः ।
भक्त्यासक्ता भ्रमर ! भवनद्वारमायान्ति तस्या-
स्तत्तद्दोषव्ययपगमसमुल्लासिनस्ते भवन्ति ॥४०॥

मा भूः पर्याकुलितहृदयः किञ्च कुर्याः सपर्या-
मार्यायास्त्वं सकलजगतीमातुरेकाग्रचित्तः ।
स्थातव्यं चेन्मधुकर ! तदा भक्तयस्तत्समीपे
कर्तव्यास्ते प्रणतिनिरते यद् दया देवतायाः ॥४१॥

नत्वा कालीं कलुषदमनीं भक्तिपूतान्तरात्मा
भ्रातर्जल्पीश्वरमनु सरेद्देवमुद्दिश्य शीघ्रम् ।
शुक्ले वर्णे भवति भविकं यस्य दृष्टे जनानां
श्यामे कामं पुनरलिवर ! ज्ञायतेऽनिष्टयोगः ॥४२॥

भव्याभव्ये मधुकर ! निजे भाविनी ज्ञातुमुच्चैः
श्रद्धायुक्तः प्रणतिनिरतो देवमालोकयेस्त्वम् ।
किञ्च त्रासो न खलु भवता दर्शने तस्य कार्यः
पुण्योद्रेकैर्भवति महतां स्वस्य भाव्यर्थबोध ॥४३॥

फेनस्फीतप्रतनुवसनामुद्यदावर्तनाभी-
मुच्चैर्वीचीनिचयचपलभ्रूविलासाभिरामाम् ।
हंसश्रेणीरचितरसनां कौशिकीं पद्मनेत्रां
किञ्चित् कालं मधुप ! सविधे तस्य विश्रम्य गच्छेः ॥४४॥

भ्राता यस्याः सकलजगतीमन्यथा स्रष्टुकामो
विश्वामित्रः किल सुरपतिस्पर्धया वृद्धतेजाः ।
चक्रे शक्रं नवमभिनवान् ब्रह्मणः सृष्टवान् यो
[1]नव्या न् नव्यं त्रिदिवमसृजन्निर्ममे सप्तलोकान् ॥४५॥

आदौ दूरभ्रमणजनितक्लेशविश्लेषहेतोः
शीतो वातो[2] भ्रमर ! भवता सेवनीयस्तदीयः ।
पश्चादुच्चैर्जनकरचितानेकयज्ञक्रियाभिः
पूतीभूतक्षितिमविकलस्तीरभुक्तिं व्रजेस्त्वम्[3] ॥४६॥

गङ्गातीरावधिरधिगता यद्भुवो भृङ्ग ! भुक्ति-
र्नाम्ना सैव त्रिभुवनतले विश्रुता तीरभुक्तिः ।
भूमिं भित्त्वा समजनि सखे ! सीरकेतोस्तपस्या-
वल्ली यस्याममृतफलदा जानकीकैतवेन ॥४७॥

सीतापाणिग्रहणपिशुनो यत्र पौलस्त्यशत्रो-
र्वीर्योद्रेकप्रथनकुशलो रोदसीरोधशीलः ।
क्षत्रक्षोभाकरभृगुपतिस्वापविच्छेददक्षः
ख्यातः सोऽभूदजगवधनुर्भङ्गजन्मा निनादः ॥४८॥

वृद्धाः श्रद्धानिहितहृदया देवसेवानुरक्ताः
सीताजन्मप्रभृतिकथया यत्र कालं नयन्ति ।
किञ्च न्यायप्रथनकुशलान् पश्यतो धीरवर्गान्
भव्याचारान् भ्रमर[4] ! भवतो भावि साफल्यमक्ष्णोः ॥४९॥

1. Y reverses the order of the first two words.
2. Y reads 'वायुर्भ्रमर'
3. Y reads 'व्रजेथाः'
4. Y reads 'सपदि'

मीमांसाया: श्रवणसरसा शेमुषी तावकी चेत्
चित्ते चेत्ते किमपि कविताकर्णने कौतुकं वा ।
तत्र भ्राम्यन् बुधजनचतुष्पाठिकासु प्रयत्ना[1]–
च्छोभाशालि प्रियसरिसवग्रामरत्नं परीया: ॥५०॥

राजत्सूक्ष्मोत्तरपरिकरा सत्स्वभावोक्तिभव्या–
नेकच्छेकाश्रयणललिता शोभितैकावलीभि: ।
भ्रातर्यत्रामलमतिमत: कोविदस्यास्य रङ्गे
भावासङ्गैरितबहुरसा भारती नृत्यतीव ॥५१॥

तर्कानर्कप्रतिमकृतिभिर्जल्पितानल्पकालं
चैत्यारूढो मधुकर ! यदि श्रोष्यसि श्रोत्रसौख्यान् ।
जाड्यं जन्मावधि मतिभवं ते तदा संप्रणश्येन्
न स्यात् कस्य प्रियसख ! गुणस्सत्समाजाश्रयेण ॥५२॥

तस्मादस्मत्कथितदयितोदन्तचेता भजेथा:
स्फीताकारं बहलसुधया धाम कोटीश्वरस्य ।
स्थानादस्माद् भ्रमर ! भवतो गच्छत: स्वच्छनीरा
सा गम्भीरा सपदि कमला लोचनस्यातिथि: स्यात् ॥५३॥

वर्षाभिन्नेऽप्यसति समये नित्यहर्षानुषक्ता
वन्यामन्यादृशमधिधरं या वहन्ती स्रवन्ती ।
वन्द्या वृन्दारकनरगणै: कल्पते[2]ऽनल्पपाप–
प्रध्वंसाय प्रियसख ! पयोमज्जनानां जनानाम् ॥५४॥

1. Y reads 'पाठिकाभिस्तदा त्वं'
2. Y reads 'कल्प्यते'

तस्याः पाथः परमविमलं सन्निपीयाभिरामा–
गारां कामायुध ! दरभँगा[1]राजधानीमुपेयाः ।
भ्रातर्यस्याः सुरपतिपुरीमूर्ध्वमध्यासितानां
सौधश्रेणी हसति धवलज्योतिषां कैतवेन ॥५५॥

आमोदानुव्रजदलिरवव्याजचाटूक्तिकारी
भ्रातर्गण्डस्थलपरिगतस्वेदपूरापसारी ।
यस्यामालीजन इव शनैः पुष्पसम्भारहारी
केलीखेदं हरति सुदृशां मालयो गन्धवाहः ॥५६॥

यत्सान्निध्ये प्रवहति सदा वाग्वती नाम सिन्धु–
र्बन्धुप्रीतिप्रणिहितमनाः[2] सेव्यमाना सुरेण ।
आस्यादाविर्भवति कविता तत्क्षणादेव यस्याः
पाथःपानात् परमललिता मैथिलानां जनानाम् ॥५७॥

गत्युद्बन्धीकृतकचभरस्रस्तमन्दारमाल्यैः
पादाम्भोजद्वयविगलितैर्यावकानां द्रवैश्च ।
मुक्ताहारैः स्तनपरिसराद्विच्युतैः कामिनीनां
प्रातः पन्था वदति सुतरां मित्र ! यत्राभिसारम् ॥५८॥

यत्र स्त्रीणां सुरतसमये कोपिनीनां सकाशाद्
गच्छन्तीनां खलु हठबलेनावधूयात्मकान्तान् ।
आकर्षाय प्रणिहितकरा वाससां प्राणनाथा
धिग् वञ्चयन्ते निजतनुलताकान्तिपूरच्छटाभिः ॥५९॥

उत्तुङ्गाग्रस्थितजलधरव्रातविभ्राजमाना
नानादिक्षु प्रचलितरुचिर्लक्ष्यते मानसेन ।

1. Y reads 'दड्भिँगा–'
2. The printed edition reads '–मनः'

यत्प्रासादावनिततिरितिभ्रान्तिभाजा जनेन
प्रावृट्काले सुरपतिशिलापट्टकाट्टालिकेव ॥६०॥
त्वञ्चेद् गच्छेः कुवलयदृशां कामकान्ताकृतीनां
पातुं तत्र श्रवणनिहिताम्भोजमाध्वीकसारम् ।
उत्पश्यामः सुरपतिशिलाकुण्डलं किंस्विदेत-
त्कर्णालम्बीत्यलिवर ! तदा स्याज्जनानां वितर्कः ॥६१॥
गच्छन्नच्छाञ्जननिभ ! पुरो भृङ्ग ! तस्या नमस्यं
विष्णुब्रह्मत्रिदशपतिभिर्दक्षिणेशं महेशम् ।
त्वञ्चेत् पश्येर्मनसि भविता ते तदा वाञ्छितानां
सिद्धिः सर्वा यदभिमतदः शङ्करः कस्य न स्यात् ॥६२॥
तस्यादूरे त्रिभुवनपतेर्लोकनेत्राभिरामा
बन्धो ! धीर ! व्रज निवसतिर्ब्रह्मपूर्वा पुरास्ते ।
यस्यामाम्रक्षितिरुहफलं पीतरक्तादिवर्णं
भुञ्जानानाममृतनिकृतिर्जायते मानवानाम् ॥६३॥
संशोभन्ते मधुप ! मधुरस्वादवद्भिः पयोभि-
र्व्याप्ता यत्र प्रचुरकमलव्याचिताः पुष्करिण्यः ।
मल्लीवल्लीपनसकदलीनारिकेलाम्रवृक्षा
यासां वप्रोपरि जनमनो रोपिता मोदयन्ति ॥६४॥
यत्र प्राच्यां हरिति हरते लोचनं चारुताभि-
र्लोकस्याम्भोनिधिरिव सखे ! चाफदाख्यस्तडागः[1] ।
तत्राघ्राय प्रणयिकमलव्रातमेकाहगम्यं
रम्यं धाम त्रिभुवनपतेर्भैरवस्याभ्युपेयाः ॥६५॥

1. 'तलागः' is the alternative reading in the printed edition.

धन्यं धाम प्रियसख ! नमेश्चारुचन्द्रार्धमौले–
र्दूरादेव प्रथमविषयीभूतमूयस्त्वमक्ष्णोः ।
यद्भावल्यप्रकरवलितं मानसे मानवानां
कैलासाद्रेः परमशिखरभ्रान्तिमाविष्करोति ॥६६॥

गत्वा तत्र श्रवणयुगलप्रीतये भूतभर्तुः
कुर्या धीरध्वनिमनिभृतो[1] भूरिशो भाङ्कृतालि ।
नृत्यारम्भप्रमुदितसमुत्तालवेतालकालो–
द्गीतिप्रीतिर्मधुकर ! ततो भाविनी कामशत्रोः ॥६७॥

किंस्वित्कान्तप्रहितदयितोदन्तहारी द्विरेफः
सान्निध्यं मे समुपसरतीत्यादरेणातिदीर्घान्[2] ।
पान्थस्त्रीणां सुभगसरणौ वीक्षमाणः कटाक्षान्
सद्यस्तस्माद् द्रुतमनुसरेस्त्वं विशालापथेन ॥६८॥

ब्रह्मारण्यव्रततिविततावद्धसन्धानकूजद्
भृङ्गीरङ्गव्यतिकरमनस्तोषतुन्दीकृताङ्गः ।
गच्छन् गच्छन् पथि निजवधूविप्रयोगव्यलीकं
चित्तारूढं मधुकर ! भवान् विस्मरिष्यत्यवश्यम् ॥६९॥

देशे देशे ललितललितं भृङ्ग ! तं तं विशेषं
दृष्ट्वा दृष्ट्वा नयननलिनद्वन्द्वहर्षं दधानः ।
गच्छेस्तत्र द्रुततरगतिर्यत्र पुण्यैकदात्री
मर्त्यानेतान् दुरितवपुषः स्वर्धुनी सा पुनीते ॥७०॥

अन्विष्यन्तः सगरतनया वाजिनं वाजिमेधे
भस्मीभूताः कपिलनयनक्रोधवह्निस्फुलिङ्गैः ।

1. Y reads ध्वनिरनिभृतोः'
2. Y reads '–दीर्घात्'

तन्मुक्त्यर्थं धरणिवलये भृङ्ग ! यामानिनीषो-
रासीत् कल्पाधिकमिह तपः श्रीदिलीपात्मजस्य ॥७१॥

देवाः के वा न खलु विलसद्भक्तिभावानुरक्ता-
स्तां सेवन्ते विमलपयसो दर्शने निर्निमेषाः ।
यत्तीरस्था मधुकर ! तपः किञ्च दीर्घं चरन्तः
कल्पं कल्पं परममुनयो निर्विकल्पं विशन्ति ॥७२॥

आलोकेनाप्यमलमहसः पाथसो मित्र ! यस्या
नूनं नृणां प्रभवति महापातकव्रातघातः ।
तत्तीरावस्थितिभिरनिशं किञ्च तद्वारिपानै-
स्तत्र स्नानैः फलमतिमहद्भुक्तमीशो भवेत्कः ॥७३॥

आदौ गत्वा तटभुवि नमेस्तां त्वमष्टाङ्गपातैः
पश्चात् स्नायाः पयसि विमले स्वात्मनः शुद्धिहेतोः ।
सूक्ष्माकारा किमिह यमुनेत्याकुलानां मुनीनां
वेणीबुद्धिं जनयसि पुरा त्वं प्रवाहप्रविष्टः ॥७४॥

पश्यन् पश्यन् परममहसां ध्यानधारा यतीनां
प्राणायामैश्चिरपरिचितैरासनादुत्थितानाम् ।
अध्यारूढः पवनपदवीं प्राप्तपुण्यातिरेकै-
र्लोकैः प्राप्यं ननु हरिहरक्षेत्रमीयाः क्षणेन ॥७५॥

शालग्रामप्रकरवलिताभ्यन्तरा गण्डकी सा
यत्राभ्येति त्रिदिवतटिनीमुत्तराशापथेन ।
यत्कल्लोलैः पयसि गमिताः[1] किञ्च मञ्चानुकारं
वारं वारं कति कति न वा द्राङ् निमज्जन्ति नावः ॥७६॥

1. Y reads 'गमिते'

यस्मिन्नायुर्विगमसमये तीव्रपापौघगेहं
हित्वा देहं हरिहरमयो जायते भृङ्ग[1] ! मर्त्यः ।
तस्माद्धेतोर्ननु हरिहरक्षेत्रहूतिर्बभूव
व्याप्तख्यातिस्त्रिजगति सदातीर्थरत्नस्य तस्य ॥७७॥

तत्कल्लोलाकलनपरमप्रीतचित्तेन तावत्
तस्यादाय भ्रमर ! भवता वारि पापान्तकारि ।
द्रष्टव्या सा चटुलपटनाराजधानीसमानी
भूतव्यूहामरपतिपुरीकिन्नरीगीतकीर्तिः ॥७८॥

लीलालोलप्रमदतरुणीकेशपाशच्युतस्य
भ्रातर्मल्लीस्तबकनिकरस्याभितो विस्तृतस्य ।
रात्रौ रात्रौ विदधति धियं मानसे मानवानां
यस्याः सौधोपरि परिगतास्तारकास्तारभासः ॥७९॥

शीतार्तोऽयं भवति हरिणो मण्डले शीतभानोः
कष्टं तिष्ठन्निति बहुविधान्युद्गिरन्त्यो वचांसि ।
यत्प्रासादे परमकृपया रङ्कुनेत्राभिरामा
रामा रङ्कोरुपरि बहुशो वक्षमासादयन्ति ॥८०॥

भित्तिप्रोद्यन्मरकतशिलाशक्रनीलोत्पलाली–
छायापूरव्यतिकरवलन्मण्डलश्यामलश्रीः ।
सौधस्याधो गगनसरणौ सञ्चरन् स्वप्रतीके
यस्यामङ्के तुहिनकिरणो नूतनोऽपि व्यनक्ति ॥८१॥

यस्याः सौधे सततरुदितक्लान्तनेत्राम्बुजाता–
श्चञ्चच्चूडापरिवृतमुखा स्तन्यपानाभिलाषाः ।

1. Y reads 'यत्र'

भ्रातर्मातुर्मुखधिषणयावर्तमानं पुरस्ता-
दुद्यद्ग्रीवाः सुभगशिशवः संस्पृशन्तीन्दुबिम्बम् ॥८२॥

केलीकोपाकुलितमनसः सुभ्रुवः पुष्पतल्पात्
संप्राप्तायाः स्फटिकवलभीभित्तिखण्डान्तरेषु ।
बिम्बं शोणाम्बुजदलदृशो धर्तुमुद्युक्तबाहोः
पिण्डीभावं व्रजति दयितालिङ्गनं यत्र भर्तुः ॥८३॥

अङ्कासीनं सपदि हरिणं धर्तुमुद्यत्करेण
क्रीडाहेतोः सुभगशिशुना नूनमाकृष्टबिम्बः ।
दूरं नीतो हुतवहधिया विप्रयुक्ताङ्गनाभि-
श्चन्द्रोऽवस्थां मधुप ! विविधां यत्र सौधे प्रयाति ॥८४॥

भग्नो हारो रहसि हृदयात्काञ्चनी किञ्च काञ्ची
कीर्णा कर्णाहितमनुपमं कुण्डलं विच्युतञ्च ।
लुप्ता चर्चा मलयजकृता सर्वमेतत्तरुण्यः
संवीक्ष्यन्ते सुरतविरतौ कातरैर्यत्र नेत्रैः ॥८५॥

स्वर्वाहिन्याः सुभगतरलोत्तुङ्गभङ्गावगाही
रम्यारामप्रचुरकुसुमामोदवाही समीरः ।
श्रान्तिं वर्त्मन्युपगतवतश्चञ्चरीकातिमात्रं
गात्रं यस्यां सुखयति पुरा स्वेदपूरप्लुतन्ते ॥८६॥

यत्प्रासादे ननु विरचिता राजते वाटिकाली
नानापुष्पस्तबकनिकरैः शोभमाना समन्तात् ।
भ्रातर्यस्याः प्रचुरपयसां सारणीपूरणार्थं
हस्तैर्मेघात् कुवलयदृशो गालयन्त्यम्बुधाराः ॥८७॥

तस्यां देवी निवसति सदा यन्महोग्रप्रभावा-
न्नाक्राम्येत प्रिय ! बलवता सा पुरी शात्रवेन ।

अस्मज्जायाविधुरहृदयाश्वासनायाथ याया-
स्तस्याः कृत्वा नतिमतितरामध्वना पश्चिमेन ॥८८॥

शालिक्षेत्रोत्खननपरमक्लान्तहस्ताम्बुजानां
लोलच्चोलान्तिकपरिमलत्कुण्डलैः शोभितानाम् ।
गायन्तीनां मधुरमधुरं मागधीनां वधूनां
दृष्ट्वा चेष्टां मधुकर ! नदं शोणसंज्ञं समीयाः ॥८९॥

पीत्वा पुण्यं जलमथ नदे तत्र भावी यियासोः
काशीमाशीविषरिपुगते ! शीघ्रचारस्तदा ते ।
लोलापाङ्गभ्रमणललिते मागधीनां कटाक्षे
सोपेक्षश्चेन्मधुकर ! भवेर्बन्धुवार्त्तैकचित्तः ॥९०॥

गत्वा तत्र भ्रमर ! सविधं देवायात्राप्रसङ्गा-
दादौ गङ्गाललितशिरसो गच्छ विश्वेश्वरस्य ।
पूर्णः शीतद्युतिरतितरां यन्मठस्योपरिष्टात्-
सायं सायं रजतकलशभ्रान्तिमाविष्करोति ॥९१॥

एते कीर्णा धवलरुचयो लाजपुञ्जाः किमारा-
दित्युद्भ्रान्त्युत्तरलमनसः कौतुकोदञ्चदक्षाः ।
यत्प्रासादक्षितिमुपगता बालकास्तारकालीं
हस्ताम्भोजैर्भ्रमर ! रजनौ चेतुमुच्चैः प्रयान्ति ॥९२॥

प्रेक्षिष्यन्ते प्रचलकमलद्रोहिभिस्त्वां दृगन्तै-
र्यत्रायातं नवतरुणिमोद्भेदवत्यो युवत्यः ।
यानालोक्य भ्रमर ! नियतं तत्क्षणं हास्यसि त्वं
चित्तारूढं निजतरलतागर्वसर्वस्वमुच्चैः ॥९३॥

यत्र भ्राम्यन् त्वमतिकुतुकान्निर्मितं प्रस्तरेण
स्तम्भं पश्येः प्रियसख ! हरिश्चन्द्रभूपालकस्य ।

यत्रासीनः[1] स खलु नृपतिः स्वामिना सन्निदिष्टं
मुक्तारल्लाघं विगलितकृपः पालयामास धर्मम् ॥१४॥
यत्र स्वेच्छाविगलितशिलामन्दिरं सावधानः
पश्येः पुण्योदयपरिचयं माधवं बिन्दुपूर्वम् ।
यद्धाम्नोऽभूद्धवलिमभृतस्तुङ्गिमा भृङ्ग ! तादृक्
भ्रान्तिं यादृक् जनयति हिमग्रावशृङ्गान्तरस्य ॥१५॥
यत्र स्त्रीणां त्रिदिवतटिनीनीरपूरोत्प्लुतानां
सौधासीनः कुतुकतरलः स्नानमालोकयेस्त्वम् ।
उत्तीर्णानां सपदि सलिलात्तत्तटी सौम्य ! यासां
हेमाभिन्ना भवति परितः कायकान्तिच्छटाभिः ॥१६॥
पद्मकोशी[2] मधुप ! कलयन् देवयात्रार्थिलोकैः
साकं नाकप्रतिमसदनामन्नपूर्णां नमेस्त्वम् ।
अन्नप्राप्तिव्यपगतशुचां यत्र यस्याः प्रभावा-
न्निःस्वानामप्यहह न कदाप्याविरासोपवासः ॥१७॥
भूगीर्वाणो विरचिततपाः सर्वदा कुक्कुटाख्यो
यत्र भ्रातर्दिशि निवसति प्रास्तरो दक्षिणस्याम् ।
प्रातर्नामस्मरणवशतो यस्य लोके जनानां
दुःस्वप्नानामपि शुभफलं स्यान्निशावीक्षितानाम् ॥१८॥
यत्रान्येषामपि त्रिदिवसदामश्मरूपं गतानां
कृत्वा भ्राम्यन् हृदयविलसद्भक्तिरालोकनानि ।
यद्भूयोगाद्दुरितवपुषामप्यभावस्य[3] काले
मुक्तिः प्रादुर्भवति नियतं ब्रह्मनालं तदीयाः ॥१९॥

1. Y reads 'यत्रासीनं'
2. Y reads 'पञ्चक्रोशीं'
3. Y reads '–व्यभावाय'

तत्र स्नातः प्रखरदुरितोन्मुक्तये देवदेवं
नत्वा नत्वा त्रिपुरमथिनं कायचेतोवचोभिः ।
अस्मत्कान्ताविरहशमने त्वं प्रवृत्तिं निनीषुः
प्रस्थानाय प्रियतम ! ततश्चित्तमुत्कं विदध्याः ॥१००॥

व्यक्ताकारा प्रवहति सदा पुण्यया भृङ्ग ! यस्मि–
न्नेकीभूय त्रिदिवतटिनी कन्यया तिग्मभानोः ।
अन्तर्धाय स्वतनुमभितो भारती सङ्गमार्थं
यत्रायाति प्रियतम ! तयोस्तं प्रयागं परीयाः ॥१०१॥

क्षामः क्षामः पथि पथि परिश्रान्तिदोषेण तस्मि–
स्तापोच्छेदे पयसि विमले निर्विशेः स्नानहेतोः ।
यावन्त्येव भ्रमर ! नियतं वाञ्छितानि त्वदीये
सन्ति स्वान्ते सपदि भवतस्तावतां स्युः फलानि ॥१०२॥

तत्पानीये पुनरपि सखे ! मज्जनं संविधाय
प्रातः पश्येः प्रणतिनिरतो माधवं सावधानः ।
यद्गेहस्योपरिपरिसरे वर्तमानाः समन्ता–
त्ताराः पारावतचयधिया मानवा निर्दिशन्ति ॥१०३॥

यद्वेलायां निरुपमगुणा राजधानी समन्ता—
दापातालं मिलति परिखा तुङ्गवप्रस्य यस्याः ।
किञ्चोत्तालाः कुवलयदृशस्तस्करासङ्गिनेत्र–
प्रान्तैर्यस्यां सपदि भवतो मानसं हारयेयुः ॥१०४॥

यत्रोद्यानस्तबककुसुमामोदवन्तो वहन्तो
मन्दं मन्दं सरसिजमुखीकेशपाशे लुठन्तः ।
स्नानम्लानाः सुभग ! युवतीः प्रेरयन्तः प्रियेभ्यो
वेणीवाताः सुरतजनितक्लान्तिमुत्सारयन्ति ॥१०५॥

यस्याः सौधे मधुप ! कृतकं मेचकाकारमारा–
द्दत्त्वा रात्रौ तुहिनमहसो मण्डले सैंहिकेयम् ।
वेणीस्नानाकुलितमनसां मानवानामकाले
धूर्तो नित्यं जनयति धियं पर्वणः शीतभानोः ॥१०६॥

दीर्घीभूताः सपदि गमनोत्कण्ठया क्षुद्रभावं
प्राप्ता गात्राभरणनिचया नामसम्पादनेन ।
यस्यामास्ये नवरतिगुरोः कुञ्चिताः कामिनीनां
केलीगेहे दिवसविगमे दृष्टयो निष्पतन्ति ॥१०७॥

उक्तिर्यस्याममृतलहरीजित्वरी दृङ्निपाता
दुग्धाम्भोधिप्रचलमधुलिड्धोरणीभ्रान्तिभाजः ।
हासश्रेणी विकचसुमनोवैरिणी कामिनीना–
मेतत्सर्वं मनसि भवितानन्दकन्दस्तवापि ॥१०८॥

स्थानात्तस्मात् त्रिदिवतटिनीवारिपूताखिलाङ्गः
पश्यन् दीर्घान् सुभग ! सरणौ कामिनीदृङ्निपातान् ।
गच्छ स्वच्छाञ्जननिभपुरीं माथुरीं बन्धुकान्ता–
चेतस्तापोत्करहुतवहोच्छित्तिहेतोर्जवेन ॥१०९॥

सम्मुग्धानां मधुप ! सरलो मूढभावेन चेत–
स्सन्तोषाय प्रियतम ! भवेद्वल्लभानां दृगन्तः ।
स्वय्यारूढे सुरतसदनस्यान्तिकं यत्र सद्यः
किञ्च क्रुद्धा अपि मृगदृशो मानमुत्सारयेयुः ॥११०॥

देहे लेपः किल मृगमदैरञ्जनं दृक्सरोजे
धम्मिल्लानां सुरभिसुमनोदानमभ्यन्तरेषु ।
यस्यां पङ्केरुहदलदृशां गोचरो लोचनानां
लोकानां द्रागपि न सरणावन्धकाराभिसारः ॥१११॥

तुङ्गं दूरादधिपुरि गृहं चारु पश्येर्मदीयं
राजेते तौ कनककलशौ यस्य कोटौ चिरेण ।
याभ्यां तन्व्या रहसि कुचयोस्तुल्यताकारि तस्या
भूयो भूयो मधुकर ! मया केलिकौतूहलेन ॥११२॥

स्तम्भद्वन्द्वं मरकतमणेः स्फाटिकी यस्य भित्तिः
शोणेनोर्द्ध्वावरणमभितो यस्य सौम्योपलेन ।
स्थाने स्थाने मघवमणिभिर्यद्विचित्रीकृतं त —
ज्जानीयास्त्वं भ्रमर ! भवनं नेत्रहारि प्रियायाः ॥११३॥

पश्येर्द्वारि भ्रमर ! लिखितं राजहंसं मया तं
मत्सौहार्दान्मम दयितया वीक्ष्यतेऽनुक्षणं यः ।
मन्दं मन्दं विहग ! गमनं शिक्षयेत्यालपन्ती
तन्वी यश्च स्पृशति निभृतं पाणिना कौतुकेन ॥११४॥

बालोद्यानं द्रुततरगतिर्मे परीयाः पुरस्ता—
न्मद्गेहानां विकचसुमनोराशिभिः शोभितानाम् ।
यत्पुष्पाणामहह रचिता मालिका राधिकार्थं
स द्रष्टव्यो मधुप ! भवता तत्र केलीकदम्बः ॥११५॥

गच्छेः क्रीडाविपिनभवनं केलिकौतूहलेन
प्रेयस्याहं सह बहुतरं नीतवान् यत्र कालम् ।
जाते कोपे कुवलयदृशो मां विधूय व्रजन्त्याः
पश्येः पादाम्बुजविगलितं नूपुरं तत्र तस्याः ॥११६॥

पश्येस्तीरोन्नतिविषमताकष्टसंप्राप्यनीरां
गम्भीराम्भःशिशिरलहरीं कन्यकां तत्र भानोः ।
दृक्पाथोदाञ्जनसहितया यानुकच्छं गतायाः
श्यामीभूता नयनपयसां धारयेव प्रियायाः ॥११७॥

बालाशोकं त्वमथ कलयेश्चक्षुषा मत्प्रियायाः
पादाघातैः कमलमृदुलैः पुष्यति प्रत्यहं यः ।
शङ्के यस्य प्रणयवशतो मद्वियोगेऽपि नो सा
मुञ्चेत् किञ्च प्रचुरसलिलैस्सारणीपूरणानि ॥११८॥

अस्मत्क्रीडाविपिननिकटे नीलकण्ठं चरन्तं
पश्येः प्राणाधिकमविरतं तं नदन्तं प्रियायाः ।
अत्र प्रस्वापयसि किममुं जन्तुमित्थं मयोक्ते
तल्पान्निर्वासयति सुमुखी तन्नवं कीररत्नम् ॥११९॥

वापीयष्टेरुपरि दयितो राजहंसोऽस्ति तस्याः
प्रेम्णा वर्षास्वपि न खलु यो जायते मानसोत्कः ।
किञ्च स्नेहोत्तरलहृदयो यः प्रदोषे प्रियायाः
प्रयासन्ने सपदि शयने संविशत्यस्तभीतः[1] ॥१२०॥

धात्रा स्रष्टुं वदनमतुलं कल्पितो निष्कलङ्कं
शीतज्योतिर्व्यरचि चपला निश्चला कर्तुमङ्गम् ।
रक्तं मुक्ताफलमुपहितं दन्तसृष्ट्यै प्रियायाः
किन्नापूर्वं विरचनविधौ संविधानं व्यधायि ॥१२१॥

आकृष्योच्चैर्नवजलमुचः सारभागं विधात्रा
तस्याः पङ्केरुहदलदृशो निर्मितः केशपाशः ।
तन्मध्ये या कनकरुचिरा भाति सीमन्तरेखा
विद्युल्लेखा स्फुरति करका[2]पुष्पगुच्छच्छलेन ॥१२२॥

यद्विद्वेषोऽजनि जलधरे शैवले यन्निकारो
जातो भृङ्गावलिषु यदमून्यकृतिर्निर्निमित्तम् ।

1. Y reads '–भीवः'
2. Y reads '–गुच्छपुष्प–'

तस्याः केशान् किल विदधतः पद्मयोनेः प्रयत्नात्
किन्तत्पापादिव समभवत् कुन्तले कुञ्चितत्वम् ॥१२३॥

शङ्के चारु व्यरचि विधिना कार्मुकं मीनकेतो–
स्तस्या इन्दीवरदलदृशो भ्रूलताकैतवेन ।
यत्तूणीरं सुभग ! ससृजे[1] पक्ष्मयुग्मापदेशा–
त्तन्मध्ये यत्स्फुरति नितरां लोचनाम्भोजबाणः ॥१२४॥

भ्रुयुग्मस्य भ्रमर ! न भवेत् [2]भुग्नतावाच्यतायाः
पात्रं धाता कथमपि सखे ! सुभ्रुवः कान्तिसिन्धोः ।
चापभ्रान्त्या सपदि मदनस्तत्पुनः सृष्टमात्रं
दृष्ट्वा हर्षाकुलितहृदयश्चेदधिज्यं न कुर्यात् ॥१२५॥

वैलक्षण्यं सरसिजभुवा कर्तुमिन्दोर्द्वितीया–
दारब्धस्तन्मुखहिमकरः षोडशैश्चन्द्रखण्डैः ।
पूर्णः पञ्चाधिकदशकलायोगतोऽभूत्समन्ता–
दुद्वृत्तं यच्चिबुककपटात् षोडशी सा कलैव ॥१२६॥

तस्या नासा बहलसुरभिश्वासधाराधुरीणा
वीणावाचस्तिलसुमनसामाहृतश्रीर्विभाति ।
धात्रा सृष्टा मृगमदमहासौरभस्नेहभूमि–
र्मन्ये कामक्षितिपतिमणेः सा कुतूः कौतुकाय ॥१२७॥

तस्याः पङ्केरुहदलदृशः पूर्णपीयूषभानो–
रुद्धृत्यार्द्धं निरुपमगुणं निर्ममे यल्ललाटम् ।
तस्योत्कर्षावधिविरचने चारु कस्तूरिकाभिः
सीमासेतुर्व्यरचि विधिना भ्रूयुगस्यच्छलेन ॥१२८॥

1. Y reads 'सदृशे'
2. Y reads 'भग्नता-'

सर्वोत्कृष्टे भवति विषये दृष्टिदोषप्रचार–
स्तन्निर्माणे: किमु नयनयोश्चारुतासारभाजो: ।
इत्थं चिन्ताचपलमनसा वेधसा गुप्तिहेतो:
पक्ष्मव्याजादुपरि रचिते तद्दृशो: प्रावृती मे[1] ॥१२९॥

किंन्निर्माणं नयनयुगलं चारुताहेतवे चेत
चित्रं नाभूत्तदिति सततोद्विग्नचेता विरञ्चि: ।
ताराव्याजादधृत मकरं तत्र वैचित्र्यहेतो–
स्तत्तारल्यादजनि बहुशश्चञ्चलत्वं तदक्ष्णो: ॥१३०॥

तद्भ्रूयुग्मं विदधति विधौ कालकूटैरधस्तात्
दत्तो बिन्दुर्निजकरतलेनारुचेर्यस्तदीय: ।
तारासंज्ञां नयनतटिनीमध्यपाती स लेभे
तत्संयोगादजनि शबलस्तत्कटाक्षप्रवाह: ॥१३१॥

दृष्टान्तार्थं तुहिनकिरणे[2] वेधसा स्थापितेऽग्रे
सृष्ट्यारम्भे सुभग ! समये तन्मुखाम्भोरुहस्य ।
सम्यग् जातं गगनजलधौ यन्मम[?]जाग्रमुच्चै–
रास्यं तस्या: कथमथ भवेदन्यथा निष्कलङ्क: ॥१३२॥

मन्ये नाभीह्रद उरसिजश्चक्रनामा मृणालं
बाहुश्चक्षु: कमलममलं शैवल: केशपाश: ।
दृष्टिश्रेणी प्रचलशफरप्रौढनृत्यं व्यधायि
क्रीडाहेतोर्भ्रमर ! सरसी सा मनोजाधिपेन ॥१३३॥

क्रीडाहेतो: कुसुमधनुष: कञ्चुके पञ्जरे किं
निक्षिप्तं तत्कुचयुगमिषाद्वेधसा चक्रयुग्मम् ।

1. Y reads 'ते'

2. Y reads 'किरणं'

तस्य स्वेच्छाशनविरहितस्याथ हारापदेशा-
दाहारायान्तिकमुपदधे यन्मृणालम्मनोजः ॥१३४॥

आस्यं तस्यास्तुहिनकिरणो नूनमिन्दीवराक्ष्याः
पीयूषं यत् पिबति नितरां तत्र नैत्र[1] चकोरः ।
लग्ना पश्चाच्चिकुरनिकरस्यापदेशेन भक्ति
पत्युर्नित्यं मधुकर ! निशा कुर्वती यद् विभाति ॥१३५॥

शङ्के नाभीसरसि करिणो मज्जतो मीनकेतो-
र्मूर्ध्नः कम्पैर्भ्रमरनिकरो गण्डतो निर्जगाम ।
सद्यस्तस्यास्सरसिजदृशस्तस्य हस्तावघात-
त्रासात्तेषां ततिरुपगता रोमराजीच्छलेन ॥१३६॥

नाभीकुण्डे वपुरनुपमं पश्यतां नागराणां
चेतोधैर्यं हविरुपचितं पञ्चबाणो जुहाव ।
तस्माद् धूमप्रकरलहरी निर्जगामोर्ध्वभागं
धत्ते भ्रान्तिं कुवलयदृशः सैव रोमावलीति ॥१३७॥

आस्यं लास्यं नयनयुगलं चातुरीं माधुरीं वा-
गालस्यं वा गमनमचिरात् पाठनीयं स्मरेण ।
इत्यालोच्य व्यरचि विधिना रोमकूटापदेशात्
राजीवाक्ष्या मरकतचतुष्पाठिका पाठहेतोः ॥१३८॥

नाभीलीलासरसि करिणा पञ्चबाणेन जाने
शुण्डादण्डः सलिलमुपरि क्षेप्तुमूर्ध्वं कृतो यः ।
तस्याः पङ्करुहदलदृशश्चारुरोमावलित्वं
स प्रायासीदिति समभवत् किंवदन्ती जगत्सु ॥१३९॥

1. Y reads 'नेत्रं'

उत्पश्यामः कुसुमधनुषा नाभिकूपात् ग्रहीतुं
लावण्याम्भः स्तनकलशयोर्या समायोजि रज्जुः ।
तस्यास्त्रस्यद्विपिनहरिणीव्यालसच्चक्षुषस्सा
रोमश्रेणीमतिमतितरां मानवानाङ्करोति ॥१४०॥

अध्यारूढात् स्मरतनुपुरीं यौवनात् भूमिभर्तु-
स्त्रासान्मध्यस्त्रिवलितटिनीमभ्युपेतोऽतिभीरुः ।
इत्याशङ्काकुलितहृदयः स्वान्तभस्त्रं ग्रहीतुं
तस्या जालं तदुपरि ददौ रोमराजीच्छलेन ॥१४१॥

आचक्राम स्तनगिरितटीं रोमराजिः कुचश्री-
र्बाह्वोः सीमाक्रमणमकृताक्रामि नेत्रेण कर्णः ।
मध्यस्तस्या वलिपरिभवं शङ्कमानोऽतिभीरुः
क्वापि प्रागादिति समभवत् तुच्छता तत्र तस्याः ॥१४२॥

मत्प्रेयस्या भ्रमर ! भुवनक्लेशदाता विधाता
शङ्के श्रोणीफलककपटाच्चारुचक्रं चकार ।
हा धिक् ! ध्मातुं विरहदहनापाकगर्ते मदीयं
यत्राधाय भ्रमयति मनो मन्मथः कुम्भकारः ॥१४३॥

राजत्यूर्ध्वावरणमभितः संयतः केशकूट-
श्चिल्लीबन्धः फुरति तदधः किञ्च चक्षुर्गवाक्षः ।
ऊरुद्वन्द्वं तुलयति सखे ! स्तम्भमम्भोरुहाक्षी
मन्ये मायागृहविलसितं साद्य चित्ते विधत्ते ॥१४४॥

निम्ना धारा इव तनुनदीकान्तिवेगावलीना-
माधिक्यं तत्पदयुगनखश्रेणयः शीलयन्ति ।
अन्यद् ब्रूमः किसलयतनोः प्रार्थनायास्य भासः
शोभन्ते तच्चरणपतिताः किङ्कलाः शीतभानोः ॥१४५॥

आसीनाया निजसहचरीसन्निधौ मत्कथाभि—
र्गाढोत्कण्ठामुपशमयितुं वासरे दैर्घ्यभाजि ।
विज्ञातव्यं भ्रमर ! भवता लक्षणं पक्ष्मलाक्ष्या-
स्तत्तद्हृद्युतिविवरणोद्गारिणा वर्णनेन ॥१४६॥

सा विज्ञालीकतिपयकथाकर्णनाक्षिप्तवृत्ती—
रुद्वेगेभ्यः कथमपि निजस्थानमासादयन्ती ।
याचेऽहं त्वां सुरभिसमयारम्भयोग्यैर्वियोगे
नो [1]भाङ्कारैर्भ्रमर ! भवता बाधनीया वराकी ॥१४७॥

तन्वी प्रीतिं वहति विषये कृष्णरूपे समस्ते
तस्मात्तस्या न खलु भवता तत्र भेतव्यमन्तः ।
यत्सा निन्दत्यभिनवघनं तत्र नो तस्य रूपं
हेतुः किन्तु स्तनितनिवहो दुस्सहो मत्प्रियायाः ॥१४८॥

तत्पूर्वस्यां हरिति भवता गच्छता पश्चिमाशां
स्थेयं तेन त्वयि वरतनोः स्यान्मदीयत्वबुद्धिः ।
मद्विश्लेषावधि मधुकर ! प्रेयसी प्राप्तकष्टा
प्राचीकाष्ठानिहितनयना वर्तते सा वराकी ॥१४९॥

जानीहि त्वं प्रियसहचरीसार्थकैर्मत्कथाया-
मारब्धायामलिवर ! भुजावीर्यवैचित्र्यभाजि ।
बाष्पोत्पीडस्थगितनयनप्रेरणाहुङ्कृतानि
व्यातन्वाना तव नयनयोस्तत्र सा वत्स्यतीति ॥१५०॥

जानीहि त्वं लघु लघु मया कल्पिते तन्निदेशात्
द्राङ्मद्वाणीस्मरणवदनोद्भूतवैस्वर्यवाचा ।

1. Y reads 'झाङ्कारै-'

मत्प्रेयस्या निभृतनिभृतं पाठिता गद्यपद्ये
तत्राग्रे ते मधुकर ! शुकी गद्गदं वक्ष्यतीति ॥१५१॥

जानीहि त्वं मृगमदरसैश्चर्चिता चञ्चलाक्षी
सा मन्मात्रोपहितसलिलादानबद्धप्रतिज्ञाम् ।
कृत्वैव द्राङ्मदनुकरणं सारिकां पाययन्ती
तत्रापस्ते मधुप ! नयने कौतुकं नेष्यतीति ॥१५२॥

जानीहि त्वं रहसि लिखितं मत्प्रतिच्छन्दकं द्राक्
दृष्ट्वा स्वीये हृदयफलके स्थापयन्ती करेण ।
तत्र प्रोद्यत्पुलकपटलीपूरिताङ्गी निकामं
सा तन्वङ्गी तव नयनयोर्गोचरं यास्यतीति ॥१५३॥

जानीहि त्वं मधुरमधुरध्वानमारभ्यमाणे
चित्तासक्त्यै किसलयतनोरालिवर्गेण गाने ।
नादोत्थाभिर्मधुकर ! समं मूर्च्छनाभिर्वराकी–
मुन्मूर्च्छन्तीं शिव शिव भवांस्तत्र तां द्रक्ष्यतीति ॥१५४॥

जानीहि त्वं चिरविरहिणं किञ्चिदालोक्य चित्रे
शोच्यावस्थं जनमविरतं निश्श्वसन्ती सबाष्पम् ।
सा धुन्वाना मधुकर ! शिरस्तत्र चित्रालयस्था
शोचन्ती मां तव नयनयोर्मार्गमायास्यतीति ॥१५५॥

जानीहि त्वं कथमपि गता प्रार्थनाभिः सखीनां
बालोद्यानं विषमविरहोत्तापनिर्वापणाय ।
मत्प्रेमान्धा मम तनुरुचा तत्र तुल्यं तमालं
सालिङ्गन्ती सुभग ! विषयं ते दृशोरेष्यतीति ॥१५६॥

जानीहि त्वं प्रमदविपिने कोकिलाकूजितानि
श्रुत्वा कम्पस्थगितवचना भीतिमुद्भावयन्ती ।

उन्मादेन ग्लपितहृदया भ्रान्तिवादं वदन्ती
सा शोच्याङ्गी मनसि करुणां तत्र ते धास्यतीति ॥१५७॥

जानीहि त्वं कविसहचरी तत्र विद्यालयस्था
वारं वारं नयनसलिलप्रोञ्छनव्यग्रहस्ता ।
कष्टात् कष्टं मम करलिपिं पुस्तके वाचयन्ती
सा मृद्वङ्गी तव तु हृदये मोदमाधास्यतीति ॥१५८॥

जानीहि त्वं निजनिवसतिप्राप्तये शीघ्रचारो
यो यः कश्चिद् व्रजति पथिको वर्त्मना पश्चिमेन ।
तं तं रुद्ध्वा प्रणयविवशा मामकोदन्तमुच्चैः
पृच्छन्ती सा नयनकलुषं तत्र ते मार्क्ष्यतीति[1] ॥१५९॥

बाले नीलाचलतटवने वल्लभस्तेऽस्ति कृष्णो
वर्षारम्भे स तु कुशलवानेष्यति त्वत्समीपम् ।
इत्याश्वास्य प्रबलविरहोद्दाहखिन्नाखिलाङ्गी-
मङ्गीकारप्रणयनरते तां त्वमेतद्वदेथाः ॥१६०॥

वारं वारं तव गुणगणाख्यानदत्तैकचित्तः
स्मारं स्मारं नयति सुहृदाश्लेषमह्नः शतानि ।
अध्यासीनो गिरितटवनीं पुष्पपुञ्जप्रकाशा-
मस्मद्वाचा सुमुखि ! किमपि[2] त्वत्प्रियस्त्वां ब्रवीति ॥१६१॥

यः प्रागासीदमृतकिरणः शीतलस्त्वत्समीपे
हन्तेदानीं दहनविषमैर्बाधते सोंऽशुजालैः ।
किञ्चोत्तापं कलयति तनौ दक्षिणोऽपि प्रकामं
वातो धातुस्तदिह विषमा निन्दनीयैव सृष्टिः ॥१६२॥

1 Y reads 'मोक्ष्यतीति'

2 Y reads 'किमपि सुमुखि'

यस्यां चन्द्रद्युतिभिरभितो व्याचितायां विना त्व-
द्गाढाश्लेषं कमलवदने ! न क्षणोऽपि व्यरंसीत् ।
दीर्घीभूतां तव विरहतस्तां वियोगाग्निदग्धो
मुग्धे ! हा धिक् ! क्षणमपि कथं यामिनीं यापयामि ॥१६३॥

वाणी वैरी तव परभृतः पल्लवः पाणिशत्रु-
र्वामोरु ! त्वन्मुखजलरुहः शात्रवः शीतरोचिः ।
भृङ्गश्रेणी चिकुरनिकरस्पर्द्धिनी सर्वमेतत्
प्राणाभिन्नं तव नवतनो ! मां विदित्वा निहन्ति ॥१६४॥

द्रष्टुं किञ्चित् प्रणयिनि समुन्मीलिते दृक्सरोजे
त्वन्मूर्तीनां दिव शिव शतं दृश्यते दिङ्मुखेषु ।
ध्याने कस्याप्यहह भवति ध्यानधारा त्वदीया
दूरस्थापि त्यजसि न मनाक् कान्तनेत्रे ! ममान्तः ॥१६५॥

देहे तापं यदपि कुरुते पङ्कजातं निकामं
श्रीमच्चक्षुस्सदृशमिति मे सुप्रियन्तत्तथापि ।
भृङ्गश्रेणीरवमुखरिते दिङ्मुखे विप्रयोगे
कान्ते ! कस्मादहमिह चिरं जीवितं धारयामि ॥१६६॥

पद्मश्रेणी विरहवदनं वेत्ति गात्रोपनीता
मूमीयं मे जगदनुपमे ! बाष्पधारामवैति[1] ।
भूषा भूयो निखिलवपुषां तानवस्यास्ति वेत्त्री
चित्तादन्यः क इह गमको मन्मथीयव्यथायाः ॥१६७॥

स्वप्ने दृष्टा त्वमथ हतया निद्रया विच्युतोऽहं
पश्चादेतत् भवनमखिलं शून्यमालोकयामि ।

1 '–मुपैति' is the reading in the printed text.

तस्माद् ध्यातुं मनसि भवतीं यावदिच्छां करोमि
व्यूढो मोहः कमलनयने ! तावदेवाभ्युपैति ॥१६८॥

बिम्बे रागो जलदपटले नीलिमानन्दकत्वं
पीयूषांशौ किल मधुरिमा कोकिलाकाकलीषु ।
स्थाने स्थाने यदपि दयिते ! वर्तते सर्वमेतद्
द्रागेकस्थं क्वचिदपि वयं त्वां विना तन्न विद्मः ॥१६९॥

आस्यं हास्यं सपदि विजहौ तन्वि ! तत्याज चेतो
धैर्यं लज्जा बत नयनयोः किञ्च मामुन्मुमोच ।
प्रायः प्राणाः कमलनयने ! मां त्यजेयुः समन्ता–
दाशापाशैर्यदि न नितरां हन्त ! बद्धा भवेयुः ॥१७०॥

इत्येवं त्वं कथितदयितोदन्तमन्तर्निधाय
स्वेच्छाचारी विचर नितरामीरितान्नीवृतस्तान् ।
कुञ्जे कुञ्जे मधुकर ! पिबन् पौष्पमाध्वीकधाराः
सम्प्रोत्फुल्लत्सुरभिकुसुमालोकनासादितश्रीः ॥१७१

इति कवीन्द्रगङ्गानन्दविरचितं भृङ्गदूताख्यं काव्यं समाप्तम् ।

कर्णभूषणम्

प्रथमः परिच्छेदः

कस्ते वक्षसि वारिराशिमथनोत्पन्नो मणिः कौस्तुभः
सोऽयं मत्सहजस्ततः सुतनु ! ते वासस्थले स्थापितः ।
इत्थं व्याहरतोः परस्परमुखप्रेक्षानमन्नेत्रयो-
र्लक्ष्मीकैटभवैरिणोर्विहसितं त्वामापदस्त्रायताम् ॥१॥

अस्ति स्वस्तिवहा दृशां निवसतिर्लक्ष्म्या भुवो भूषणं
वीकानेरिपुरी कुबेरनगरीसौभाग्यनिन्दाकरी ।
कैलासाचलचारुभास्वरपृथुप्रासादपालिद्युति -
व्याजेनोपहसत्युपर्युपगतां या राजधानीं हरेः ॥२॥

तत्रास्ते धरणीपतिः पृथुयशाः श्रीकर्ण इत्याख्यया
गोविन्दाङ्घ्रियुगारविन्दविलसच्चित्तालिरत्युन्नतः ।
राधेयभ्रममात्मनि त्रिजगतां चित्ते स्थिरीकुर्वता
दीयन्तेऽर्थिगणाय येन सततं हेमाश्वहस्त्यादयः ॥३॥

आज्ञया तस्य भूमीन्दोर्न्यायकाव्यकलाविदः ।
गङ्गानन्दकवीन्द्रेण क्रियते कर्णभूषणम् ॥४॥

नाहमभ्यर्थये तावदिह सज्जनदुर्जनौ ।
तयोर्गुणागुणाख्यानं स्वभावो नापगच्छति ॥५॥

करोति श्रोत्रसाफल्यं यत्सुवर्णविनिर्मितम् ।
तस्मिन्निह कृती कर्णभूषणे को न रज्यति ॥६॥

तत्र रसाः कथ्यन्ते-

श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।

बीभत्साद्भुतशान्ताख्या रसा नव समीरिताः ॥७॥

एषां रसानां मध्ये रसः श्रृङ्गार एव मुख्यत्वेन गीयते । तत्र श्लोकः –

"कृष्णाधिदैवते कृष्णे मुख्यकृष्णावलम्बने ।

उत्तमप्रकृतौ लोके श्रृङ्गारे को न रज्यति ॥८॥" इति ।

सर्वात्मना कृष्णाधिष्ठितत्वेनाभ्यर्हितस्य शृङ्गाररसस्य निष्पादकजिज्ञासायां विभावानुभावव्यभिचारिण एव निरूप्या भवन्ति । तदुक्तं भरतेन–

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।" इति ।

तेषां च पुरःस्फूर्तिकतया विभावा निरूप्यन्ते–

लोके कारणनामानो भावयन्ति विशेषतः ।

ये रसान् ते निगदिता विभावाः काव्यनाट्ययोः ॥९॥

भावयन्ति आविर्भावयन्ति । आविर्भावस्तु विभावनरूपव्यापारद्वारैव ।

विभावनं तु बीजादिश्लथीभावाङ्कुरत्ववत् ।

सामाजिकात्मरत्यादेरुन्मुखीकरणं विदुः ॥१०॥

विभावनं रत्यादेरुन्मुखीकरणमित्यन्वयः । दृष्टान्तमाह–बीजादीति बीजादेः श्लथीभाववदङ्कुरत्वदशाप्राप्तिवदित्यर्थः ।

उद्दीपनालम्बनाख्या विभावा द्विविधा मताः ।

उद्दीपनाख्या आलम्बनाख्याः ।

उद्दीपनविभावास्ते ये रसोद्दीपका मताः ॥११॥

आलम्बनविभावास्ते यानालम्ब्य रसोद्गमः ।

अथ श्रृङ्गारस्योद्दीपनमाह––

उद्दीपनं चञ्चरीकरवचन्द्रघनादिकम् ॥१२॥

आदिशब्दात्कोकिलालापमलयानिलादयः। एतेषामुद्दीपनानां मध्ये श्रेष्ठा भगवतः श्रीकृष्णस्य रासक्रीडाधाराः शरन्निशा उदाह्रियन्ते। यथा—

दृष्ट्वा निशां विकचकैरवशोभिताशां
कृष्णः स्वयं शरदि रन्तुमना बभूव।
आलोकितुं रमणमिन्दुमिषेण तस्य
पूर्वा हरिद्वदनमुन्नमयाञ्चकार ॥१३॥

चन्द्रे रमावदनविभ्रममादधानः
स्पर्शं तदीयतनुवत्सुखमिन्दुधाम्नः।
संशील्य तत्र विपिने कमलाहितान्तः
कृष्णो मनोभववशो रमणेच्छुरासीत् ॥१४॥

आहृत्य गाढतिमिरावरणाम्बराणि
दिक्सुभ्रुवामुदयभूमिधराधिरूढः।
कृष्णं कदम्बशिखराभिगतं सुधांशु-
रस्मानयन्निखिलवस्त्रहरं व्रजस्त्रीः ॥१५॥

ये ये मुरारिविपिने न कदाचिदेव
भूमीरुहाः प्रसुवते कुसुमानि तत्र।
शीतद्युतेः किरणयोगवशेन दृष्टा-
स्ते पुष्पिता इव कुलैर्व्रजसुन्दरीणाम् ॥१६॥

आकृष्य तत्र विपिने नवमल्लिकानां
कोषाद्रजांसि मलयानिलकम्पितानाम्।
चिक्षेप भृङ्गरवमन्त्रमुदीर्य दूरा-
द्गोपीविमोहकरणाय करैरिवेन्दुः ॥१७॥

तत्र क्षणे व्रजनिवासिविलासिनीभि-
र्नाक्षत्रमौक्तिकगणावृतमण्डलश्रीः।

जेतुं जगज्जिगमिषो र्मदनाधिपस्य
श्वेतातपत्रमिव शीतकरो व्यलोकि ॥१८॥

दूर्वाभिरामतनुकामनृपः कलङ्क-
व्याजेन शीतकिरणं पृथुलोपधानम् ।
आलम्ब्य शास्ति जगदेतदिति व्यतर्कि
चित्ते तदा व्रजसरोजविलोचनाभिः ॥१९॥

श्वेतान्तरीयमिह किं विभुना व्यधायि
कृष्णेन योगपतिना निजवासहेतोः ।
इत्थं वितर्कशतमाविरभूद् व्रजस्त्री-
वृन्दस्य तां शरदि वीक्ष्य निशां सचन्द्राम् ॥२०॥

आयातः किं विधुवलयिताहीशतल्पं गृहीत्वा
क्षीराम्भोधिर्मम परिसरे रन्तुकामस्य विष्णोः ।
इत्थं तर्कः समजनि तदा मानसे श्रीमुरारे-
र्दृष्ट्वा शीतद्युतिरुचिचयव्याचिताकाशमुच्चैः ॥२१॥

इत्याद्युद्दीपनविभावाः ।

शृङ्गारस्यालम्बनविभावास्तु नायकनायिकादयस्तेषां मध्ये भगवान् कृष्णो गोप्यश्चाभ्यर्हितत्वेनाभिमताः । अतस्तदुदाहरणमेवोचितम् । यथा-

आलोक्य तां रजनिमिन्दुकराचिताशां
मन्दानिलोल्लसितमल्लिसुगन्धिसौम्याम् ।
योगीश्वरोऽपि मदनेन वशीकृतान्त-
र्वंशीमवादयत गोपशशी स कृष्णः ॥२२॥

उद्गायतो यदुपतेरमृतस्वरेण
कामोऽपि लब्धवपुरास स रासहेतोः ।
मन्ये तदा कुसुममार्गणगोपपत्यो-
रन्योन्यमेव वशवश्यकभाव आसीत् ॥२३॥

तत्र क्षणे भगवतो मधुरस्वरेण
चौरेण वेणुविवरं विनिविश्य तेन ।
चित्तं धनं भवनकृत्यपरायणानां
गोपारविन्ददलहारिदृशामहारि ॥२४॥

गोप्योऽपि तं मधुरवेणुनिनादमुच्चैः
श्रुत्वा तदा मनसि विस्मृतसद्मकृत्याः ।
स्विद्यद्वपुःपुलकपालिपरीतगात्राः
कृष्णस्य चारु चरितं ललितं जगुस्ताः ॥२५॥

काश्चिद्विभिद्य पतिबद्धपुटं कपाटं
कामोद्धुरा मधुरिपुं सहसाभिजग्मुः ।
भित्त्वा जनेन रचितं महतः प्रयत्ना-
त्सेतुं समुद्रमिव तीव्रजवास्तटिन्यः ॥२६॥

वेणुस्वरे श्रवणसीम्नि गते स्मरार्ता
काचित्तदा मुरजितः सविधं प्रतस्थे ।
मेघागमे जलधरस्य निनादमादा—
वाकर्ण्य मानसमिव स्थलराजहंसी ॥२७॥

कस्याश्चिदम्बुजविलोचनसंनिधानं
तस्मिन् क्षणे जिगमिषोर्व्रजवारिजाक्ष्याः ।
दत्तः प्रियेण बहुशोऽपि हितोपदेशः
कामेषुजर्जरतरे हृदये न तस्थौ ॥२८॥

गाढं विभिन्नहृदया मदनाशुगेन
काचित्तदा यदुपतेर्निकटं व्रजन्ती ।
प्रीत्यान्धतामुपगता व्रजवारिजाक्षी
वात्येव मण्डलमितस्ततं आततान ॥२९॥

वंशीरवश्रवणकम्पितदेहयष्टेः
कस्याश्चिदम्बुरुहसुन्दरलोचनायाः ।
अङ्कात्पपात तनयोऽल्पतनुर्लतायाः
वृन्तान्नवं फलमिवानिलदोलितायाः ॥३०॥

तत्याज काचिदशनं विषवद्विखिन्ना
भिन्ना शरेण मदनस्य ततः प्रतीमः ।
उच्चाटको मनुरिव व्रजसुन्दरीषु
पीताम्बरेण मुरलीनिनदः प्रयुक्तः ॥३१॥

कस्याश्चिदश्रुपरिपूरितलोचनाया
गात्रेषु तत्र पुलकावलयो विरेजुः ।
जानीमहे कुसुममार्गणमग्नबाण–
श्रेणीसमुल्लसितपक्षशिखा स्फुरन्ति ॥३२॥

कंसद्विषा भगवता रचिता तदानी–
माभीरवारिरुहसुन्दरलोचनानाम् ।
चेतांसि चारुमुरलीध्वनिधोरणी सा
लौहा निचुम्बकशिलेव समाचकर्ष ॥३३॥

तं शृण्वतो मुरलिकानिनदं व्रजस्त्री–
वृन्दस्य बाष्पनिवहाः परितो निपेतुः ।
मन्ये तदीयहृदयैश्चपलैस्तदानीं
धैर्यापदं न सलिलाञ्जलयो वितीर्णाः ॥३४॥

चन्द्रांशुभिर्धवलिते भुवने व्रजस्त्री
काचिन्मुरारिसविधं सहसा व्रजन्ती ।
रेजे गलद्वसनविस्फुटदेहकान्ति
सौदामिनीव शरदम्बुधरस्य मध्ये ॥३५॥

काश्चित्तदा यदुपतेः सविधं विमुक्त-
दोलायमानचिकुरप्रकरा व्रजन्त्यः ।
रेजुश्चलद्भ्रमरपङ्क्त्यनुगम्यमाना
वातोद्धता इव लता व्रजबन्धुराक्ष्यः ॥३६॥

काचित् तदा प्रतिपदं पथि(भिश्र)लन्ती
गायन्त्यनुद्धतपदं स्वरभङ्गयुक्तम् ।
यान्ती सरोजनयनस्य समीपदेशं
मत्तेव सीधुभिरतीव रराज गोपी ॥३७॥

इत्थं हरेः सविधमेत्य मृगीदृशस्ता
आरेभिरे बहुविधाः किल कामचेष्टाः ।
वंशीधरोऽथ कुशलं व्रजवासिनां स
पप्रच्छ विच्छवियुता अभवन्न तस्याः ॥३८॥

उद्भाव्य तेन कुलपांशुलतादिदोषान्
कंसद्विषा भगवता विनिषेध्यमानम् ।
नैव न्यवर्तत ततो व्रजवारिजाक्षी—
वृन्दं विमुक्त इव शाश्वतविष्णुलोकात् ॥३९॥

तासामवेत्य हृदयेषु विनिश्चयं तं
कृष्णः सदा शरणवर्तिजने दयालुः ।
मन्दानिले रविसुतापुलिने तदानीं
चिक्रीड ताभिरभितो व्रजसुन्दरीभिः ॥४०॥

अथ प्रार्थितं वेणुमादातुकामं
करं केशवः पङ्कजाताभिरामम् ।
स कस्याश्चिदाकृष्य गोपाङ्गनाया-
श्चुचुम्बाननं चारुचन्द्राननायाः ॥४१॥

नभस्वत्समुद्वेल्लिताम्भोजसृष्टा
निरीक्ष्यान्यतो गोपिका कापि दृष्टा ।
कृते पुष्पजातैर्निशानाथकल्पे
हरिं प्रेरयामास सङ्केततल्पे ॥४२॥

कयाचित् समं वीक्ष्य कृष्णं वदन्तं
कयाचिच्च साकं सलासं हसन्तम् ।
समुद्भाव्य कोपं व्रजन्त्याः सहर्षः
स पाणिं परस्याः प्रियायाश्चकर्ष ॥४३॥

मुरारिः कयाचित् समालिङ्ग्यमानः
स्फुरद्रोमहर्षेण विभ्राजमानः ।
यथा वीरुदालिङ्गितः स्वच्छशाखी
लसत्कोरको दीव्यति स्माभिलाषी ॥४४॥

मुखं वीक्ष्य कस्याश्चिदिन्दुप्रकाशं
व्रजन्तं हरिं गोपिकायाः सकाशम् ।
अथान्वग्ययुर्गोपवध्वः समस्ताः
करिण्यो यथा नागमुत्तालहस्ताः ॥४५॥

लपन्ती मृदुस्मेरवक्त्राभिरामा
क्षिपन्ती दृशौ दिक्षु लोले सकामा ।
व्रजन्ती समीपं हरिं गोपकन्या
पुरस्तात्समुल्लासयामास धन्या ॥४६॥

सुगानं तदा तन्वती किं च काचि–
न्नटन्ती च काचिद्धसन्ती च काचित् ।
उपेत्याच्युतस्यान्तिकं लोलदृष्टि–
र्मनो मोहयामास सञ्जातहृष्टिः ॥४७॥

पिबन्ती मुरारेर्मुखं लोचनाभ्यां
स्मितं कुर्वती स्मेरपद्मोपमाभ्याम् ।
निरीक्ष्यागतास्ता अभूत्कामजूर्ति–
र्हरेर्गोपिकासंख्यका तत्र मूर्तिः ॥४८॥

शुभंयुस्वरं गीतमुच्चारयन्त्या
कयाचित् समं स्मेरमास्यं वहन्त्या ।
ननर्ताच्युतश्चारुचाणूरजैत्रः
समुत्फुल्लपाथोरुहद्रोहिनेत्रः ॥४९॥

सनालं कराभ्यां वितन्वन्नुदारं
दृशालोकयन् सुस्तनीर्लोलतारम् ।
हरन्तीर्मनो नाट्यदोषैर्निरस्ता
हरिर्नर्तयामास गोपीः समस्ताः ॥५०॥

स कस्याश्चिदास्यं समाघ्राय हृष्टः
प्रयातः कयाचित् करेणातिकृष्टः ।
कयाचित् कटाक्षैः पुनर्वीक्ष्यमाणः
शशाक प्रयातुं न पक्षीन्द्रयानः ॥५१॥

समुल्लास्य सर्वाः स्मितैर्गोपनारी–
र्दृशा लोलया कौतुकी वीक्ष्य हीरीः ।
पुनर्वंशिकां वादयित्वा स कृष्ण–
स्तिरोऽभूद् व्रजस्त्रीविवृद्धातितृष्णः ॥५२॥

अन्तर्हिते भगवति व्यथमानचित्ता
गोपाम्बुजातनयना गलदश्रुपूराः ।
मेघावलीभिरभितः पिहिते निशायां
चन्द्रे चकोरवनिता इव चुक्रुशुस्ताः ॥५३॥

काचित्तदीयचरणाङ्कपथे व्रजन्ती
निश्वासशुष्यदधरा करुणार्तनादा ।
तद्यापनं व्रजसरोरुहसुन्दराक्षी
तत्र स्वकान्तमिव रात्रिषु चक्रवाकी ॥५४॥

भो वृक्षराज ! वद कुत्र तवास्ति मित्रं
यः कृष्ण इत्यभिहितस्तव कान्तियोगात् ।
इत्यूचिरे व्रजसरोजदृशस्तमाल–
भूमीरुहं कृतकराञ्जलयः प्रणम्य ॥५५॥

हे मल्लिके ! कथय नीरधराभिरामो
दृष्टस्त्वयेह विचरन्नरविन्दनेत्रः ।
नालोकितः स च मयेति समीरयोग—
सञ्चाल्यमानविटपच्छलतो ब्रवीषि ॥५६॥

कङ्केलिपादप ! हरेः कथय प्रवृत्तिं
मन्येऽथवा स भवता विचरन्न दृष्टः ।
पश्येर्यदा भगवतः करकान्तिमुच्चै–
र्व्यक्तीकरिष्यसि तदा किमु पल्लवानि ॥५७॥

भ्रातर्द्विरेफ ! पदवीं वद पार्थबन्धो–
र्नूनं न वा तव दृशोः स च गोचरोऽभूत् ।
आलोकयेर्यदि हरेर्वदनारविन्दं
किं ते तदा विपिनपुष्पचये रतिः स्यात् ॥५८॥

इत्थं प्रलप्य बहुशो व्रजसुन्दरीणां
वृन्दानि लोचनगलत्सलिलोच्चयानि ।
चन्द्रांशुभिर्धवलिते गगने तदानी–
मारेभिरे भगवतोऽनुकृतं मुरारेः ॥५९॥ (कुलकम्)

संपश्य तत्कमलसोदरलोचनानि
तासां मुखानि शरदिन्दुसमप्रभाणि ।
यावत्य एणनयना हरिणा तदानीं
तावत्य एव रचिताः किल मूर्तयस्ताः ॥६६॥

एकां तदा रसमये स्म तदेकमूर्ति-
रन्यां सरोजनयनां च तदन्यमूर्तिः ।
इत्थं विलासमवलोक्य मुरारिगोप्यो-
र्देवासुरा नभसि विस्मयमापुरन्तः ॥६७॥

मामेव केवलमयं भजते विलासी
नान्यासु गच्छति मनागपि मां विहाय ।
इत्यात्मनः कलयति स्म कृतार्थतां सा
क्रीडा यया सह चकार सरोजनेत्रः ॥६८॥

कृष्णः कयापि सह संविलसन्निकामं
तन्मानकालमवगम्य तिरोबभूव ।
मत्वाथ तां स गलदश्रुविनिश्वसन्ती-
माविर्भवत्पुरत एत पुनश्चुचुम्ब ॥६९॥

कृष्णः स्पृशन् करतलेन कठोरमुच्चैः
कस्याश्चिदुन्नतपयोधरमण्डलं सः ।
सस्मार पाणिकमले बत वर्तमानं
गोवर्धनक्षितिधरं पृथुबाहुवीर्यः ॥७०॥

सञ्जातमाननमितानतमुद्वहन्त्याः
कस्याश्चिदम्बुरुहसुन्दरलोचनायाः ।
वंशीधरो मृदुकथाकथनच्छलेन
गत्वा श्रवःपरिसरं वदनं चचुम्ब ॥७१॥

काचित् करेण मुरलीं दधती वहन्ती
मस्ते शिखण्डमरविन्ददृगायमाना ।
आरादचारयदरण्यधरासु शष्प-
युक्तासु काश्चिदथ धेनुकुलायमानाः ॥६०॥

कृष्णायमानतनुरम्बुविगाहिनीनां
कन्यायमानवपुषां व्रजसुन्दरीणाम् ।
कासाञ्चिदम्बरचयानपहृत्य कूलात्
काचित् कदम्बशिखराणि समारुरोह ॥६१॥

याशोदरूपमनुकृत्य कयापि दाम्ना
बद्धोदरे तमनुहृत्य शिशुं चलन्ती ।
तालद्वयानुकरणं सुदृशौ दधत्यौ
केचित्तदा झटिति पातयति स्म काचित् ॥६२॥

काचित् त्रिभङ्गिवलितं विरचय्य देहं
कण्ठे निधाय ललितां वनमालिकां च ।
कृष्णाकृतिं विदधती व्रजवारिजाक्षी
धारस्वरेण बत वादयतिस्म वंशीम् ॥६३॥

इत्थं व्रजाम्बुजदृशामतिभक्तिभाजां
विज्ञाय भावमखिलं करुणार्द्रचेताः ।
तासां पुरः कनककुण्डलशोभिगण्डो
मन्दस्मितो विधिरिवाविरभून्मुकुन्दः ॥६४॥

नीलोत्पलद्युति मनोहरमग्रतस्तं
संवीक्ष्य पीतवसनं स शिखण्डमुच्चैः ।
सेन्द्रायुधं सतडितं व्रजयोषितस्ता
मेघं मयूरवनिता इव मोदमापुः ॥६५॥

इत्याद्यालम्बनम् ।

यद्यप्येतत्सम्भोगविप्रलम्भयोरुदाहरणमुचितम्, तथापि आलम्बनं विना तयोरुदाहरणं दातुमशक्यत्वादिति ।

अथ हास्यादीनां विभावानाह—

विकृताकृतिवचोवेषं विपरीतविभूषणम् ।
हास्यस्यालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ॥७२॥

विकृताभिधानादय ऊह्याः । यथा—

चन्द्रे दृष्ट्वा नृत्यन्मायाशिशुरुत्क्षिपन् बाहुम् ।
नय मम हस्ते विधुमिति रुदन् यशोदापदे पतति ॥७३॥

अत्र चन्द्रदर्शनेन नर्तनशाली मायाशिशुरालम्बनम्, बाहूत्क्षेपरोदनाद्युद्दीपनम् ।

करुणालम्बनं प्राहुर्विनष्टसुहृदादयः ।
उद्दीपनं पुनस्तस्य दाहादि विनिगद्यते ॥७४॥

अत्र प्रथमादिशब्दात् बन्धुदारिद्र्यतद्बन्धनादयः, द्वितीयादिशब्दात्तु तन्नयनमुद्रणाद्यवस्था गृह्यन्ते ।

यथा—

तात ! त्वयीदृशदशे सति यद्भवामि
नाहं पुनर्भवदवस्थ इतः प्रतीमः ।
आत्मैव पुत्र इति यन्निगदन्ति वेदाः
प्रामाणिकाः सकलमेव तदप्रमाणम् ॥७५॥

अत्र गतासुः पिता आलम्बनम्, तन्नयननिमीलनादिदशाविशेष उद्दीपनम् ।

रौद्रस्यालम्बनं शत्रुमाहुस्तस्य क्रियाः पुनः ।
रूक्षोक्तिमुष्टिपाताद्या उद्दीपनमुदाहृतम् ॥७६॥

आदिशब्देन पौरुषप्रकाशादयः कथ्यन्ते । यथा—

उद्दामद्युतिदुर्दिनीकृतसमिद्युद्धावरुद्धद्विष-
त्सन्दत्तद्रुतचित्तसाध्वसरसा सेयं गदा निर्दया ।
वस्त्रं कृष्टवतः पतत्वधिशिरो दुःशासनस्याद्य तत्
पाञ्चाली चिकुरं चिराय विततं बध्नातु निर्बन्धनः ॥७७॥

अत्र दुःशासन आलम्बनम्, द्रौपदीवस्त्रकर्षणमुद्दीपनम् ।

विजेतव्यादयो वीररसस्यालम्बनं मतम् ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनतां गताः ॥७८॥

विजेतव्यः प्रतिपक्षः । आदिशब्दात् सम्प्रदानीभूतो द्विजादिः, दुर्गतश्च गृह्यते । तेन युद्धवीरस्यालम्बनं विपक्षः । दानवीरस्यालम्बनं द्विजादिः । दयावीरस्यालम्बनं दुर्गतभक्त्यादयः । वीरस्यैषां चेष्टादारिद्र्याद्युद्दीपनम् ।

युद्धवीरस्य विभावो यथा—

अयं त्रिलोकीजयदीर्घदर्पो
दशाननोऽभ्येति कृतान्तकल्पः ।
इतीरितं वालिसुतेन रामो
निशम्य तत्राश्रुतवच्चकार ॥७९॥

अत्रालम्बनं दशाननः, त्रिलोकीजयाद्युद्दीपनम् ।

दानवीरस्य विभावो यथा—

पायाद्वो भृगुनन्दनः स भगवान् सम्भ्रान्तरीयान्वितं
विप्रो याति विपश्चितो वितरतः सर्वंसहो मण्डलम् ।
क स्थातासि कुतश्चरिष्यसि धरां दत्त्वेति बन्धूक्तयः
प्रापुः पूर्णतरप्रमोदपिहिते चित्ते न यस्य स्थितिः ॥८०॥

अत्रालम्बनं विप्रः, तस्य पाण्डित्याद्युद्दीपनम् ।

दयावीरविभावो यथा—

कृपालुता यस्य निकामदीन-
सुदामसौधावलिकैतवेन ।

सुपुष्पिता सर्वजनैर्व्यलोकि

नमोऽस्तु तस्मै गरुडध्वजाय ॥८१॥

अत्रालम्बनं सुदामा, तस्य दैन्यमुद्दीपनम् ।

केचित्तु—

'राज्यं च वसु देहश्च भार्याभ्रातृसुताश्च ये ।

यच्च लोके ममायत्तं तद्धर्माय सदोद्यतम् ॥८२॥

इति युधिष्ठिरवाक्ये वीररसचतुर्थं भेदं धर्मवीररूपमुदाहरन्ति, तच्चिन्त्यम् । धर्मवीरस्य देवादिविषयरतावन्तर्भावादन्यथाभक्त्यादीनां सर्वेषां भावानामतिरिक्तरसत्वापत्तेः । किं च निरहङ्कारदशायां धर्मवीरस्य शान्तरसेऽन्तर्भावात् ।

न यत्र दुःखं न सुखं न चिन्ता

न द्वेषरागौ न च काचिदीहा ।

रसः स शान्तः कथितो मुनीन्द्रैः

सर्वेषु भावेषु शमः प्रधानः ॥८३॥

इत्येवंरूपः शान्तरसः । सुखाभावोऽत्र वैशेषिकसुखाभावः, न तु तृष्णाक्षयसुखाभावः । उक्तं हि—

'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।

तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥८४॥' इति ।

यतः पदार्थाद्भयमाविरस्ति भयानकालम्बनमूचिरे तम् ।

उद्दीपनं तस्य पुनर्वदन्ति चेष्टां महाघोरतरां सुधीराः ॥८५॥

यथा—

दैत्यद्रोहप्रयुक्तप्रलयघनघटाघोरनिर्घोषरोष—

व्यक्तव्यात्ताननान्तप्रचलहुतवहज्वालजालाभजिह्वा ।

वेगावेशोत्थवातोद्धतधरणिधरालोकनोत्कम्पितान्तः

सिद्धश्रेणीकृतातिस्तुतिनतिरवताद्भद्रदा भद्रकाली ॥८६॥

अत्रालम्बनं भद्रकाली, मुखव्यादानाद्युद्दीपनम् ।

दुर्गन्धिकव्यमेदांसि बीभत्सालम्बनं मतम् ।
उद्दीपनं पुनस्तस्य कृमिपातादि कथ्यते ॥८७॥

यथा—

दन्ताकृष्टविदष्टसास्थिपललव्रातानि निर्यन्त्रण-
क्रूराक्रान्तिसमुद्भवत्कटकटत्कारक्रियाभैरवः ।
हस्तव्यस्तशवालिमस्तकसरन्मज्जाम्बुनिर्वापित-
प्रौढिप्राप्तचिताग्निरुद्धटतमः प्रेतोऽयमुज्जृम्भते ॥८८॥

अत्र पललमालम्बनम्, दन्ताकृष्ट्याद्युद्दीपनम् ।

लोकातिगः पदार्थः स्यादद्भुतस्यावलम्बनम् ।
उद्दीपनं भवेदस्य तद्गुणातिशयः पुनः ॥८९॥

मायेन्द्रजालादय ऊहनीयाः । यथा—

दंष्ट्राकोटिप्रविष्टक्षितिधरणिधरव्यूहनिष्पातलोक-
व्यक्तव्यालोपशङ्कानिभृततरपरित्यक्तनिश्वासवातः ।
बालाग्राविद्धतारागणजनितलसन्मौक्तिकश्रेणिबुद्धि-
र्दुष्टद्रोहवती वः कलयतु कुशलं कोऽपि कोलावतारः ॥९०॥

अत्र कोलावतार आलम्बनम्, तस्य दंष्ट्रामहत्त्वाद्यतिशय उद्दीपनम् ।

इन्द्रजालं यथा—

शरदिन्द्रजालिवेषा प्रतिनिशमेषा वियद्वलयम् ।
फलयति हिमकरकपटात्ताराव्याजेन पुष्पयति ॥९१॥

अनित्यत्वेन निःसारं शान्तस्यालम्बनं जगत् ।
उद्दीपनं पुनस्तीर्थपुण्यारण्यनगादयः ॥९२॥

आदिपदान्महापुरुषोपदेशादयः । यथा—

संसारे सकले विनाशिविषयाधारे परिभ्राम्यता
हा धिक् कष्टमनिष्टलब्धिविषयः कालो मया यापितः ।

नो जाने परिहृत्य सङ्गमखिलं चित्ते परं ध्यायतः
पुण्यारण्यनिकेतने वद कदा यास्यन्ति मे वासराः ॥९३॥

अत्रानित्यविषयाधारत्वेनासारं जगदालम्बनम्, पुण्यारण्याद्युद्दीपनम् ।

केचित्तु–

'यदाह धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥९४॥'

इत्यत्र दशमं वत्सलाख्यं रसमुदाहरन्ति, तच्चिन्त्यम् । पुत्रादिविषयरतिभावे तस्यान्तर्भावात् । न च स्थायिभावभेदेन रसो भिद्यते । तस्मादस्य स्थायी भावः स्नेहस्तद्भेदाद्भेदोऽस्येति वाच्यम् । स्नेहस्यापि रत्यात्मकत्वादिति दिक् ।

इतिः श्रीमहाराजाधिराजश्रीकर्णसिंहकारिते मैथिलश्रीगङ्गानन्दविरचिते कर्णभूषणे विभावनिरूपणो नाम प्रथमः परिच्छेदः ।

द्वितीयः परिच्छेदः

अथानुभावा निरूप्यन्ते—

बहिः प्रकाशयन् भावमुद्बुद्धं स्वस्वकारणैः ।
लोके कार्याभिधो यः सोऽनुभावः काव्यनाट्ययोः ॥१॥

स्वैः स्वैः कारणैरालम्बनोद्दीपनरूपैरुद्बुद्धं रत्यादिकं भावं बहिः प्रकाशयन् लोके यः कार्यमित्यभिधीयते स पुनरनुभावरूपव्यापारवत्त्वात्काव्ये नाट्ये चानुभावः कथ्यते ।

धरणीधामसंयोगादक्षुण्णां कुरु काण्डवत् ।
विषयीकरणां व्यक्तेरनुभावनमुच्यते ॥२॥
स चानुभावो धीरेण चतुर्भेदो निगद्यते ।
कायिको मानसश्च स्यादाहार्यः सात्त्विकोऽपरः ॥३॥
कायिकश्च कटाक्षादिः प्रमोदादिश्च मानसः ।
नाट्ये चतुर्भुजत्वादि ज्ञानमाहार्य उच्यते ॥४॥
सात्त्विकः स्वेदरोमाञ्चस्तम्भादिः कथ्यते बुधैः ।
अथानुभावाः कथ्यन्ते शृङ्गारस्य स्मितादयः ॥५॥

आदिशब्दात्कटाक्षभ्रूविक्षेपादयः । यथा—

किञ्चित्किञ्चिदुदञ्चितस्मितसुधाधौताधरोपान्तया
तिर्यक्पर्यवचालिताञ्चलपटीसुव्यक्तवक्षस्त्विषा ।
मुक्तास्तत्र तया कलिन्दतनयाकल्लोलहिन्दोलन-
लुब्धक्षीरसमुद्रलोललहरीस्पर्धासमृद्धा दृशः ॥६॥

अत्र स्मितादयः ।

ननु वीक्षितेषु कटाक्षादिषु कामिनो रसोत्पत्तिर्भवतीत्यनुभवसिद्धमेतत् । अतस्तेऽप्युद्दीपनविभावा भवितुमर्हन्तीति चेत्, सत्यम् । नायिकायाः स्वात्मनि रसानुभव-

करणत्वेन कटाक्षादयोऽनुभावा नायकस्य पुनर्दृष्टिपथगता मनो विकारयन्ति, अतस्तं प्रति ते च विषयत्वेनोद्दीपनविभावाः। तथा च कटाक्षादीनां करणत्वेनानुभावकता विषयत्वेनोद्दीपकता चेति ध्येयम्।

अष्टाविंशतिसंख्याकान् भावादीननुभवलक्षणयोगादनुभावानाह–

हावभावौ तथा हेला त्रयस्तेऽङ्गसमुद्भवाः।
शोभा कान्तिश्च दीप्तिश्च प्रगल्भत्वमुदारताः ॥७॥
माधुर्यं धैर्यमित्येतान् सप्त प्राहुरयत्नजान्।
तथा लीला विलासश्च बिब्बोकः किलकिञ्चितम् ॥८॥
विच्छित्तिर्विभ्रमो मौग्ध्यं विकृतं तपनं मदः।
मोट्टायितं कुट्टमितं ललितं च कुतूहलम् ॥९॥
विक्षेपो हसितं केलिस्तथा चकितमित्यपि।
भावादयोऽत्र धैर्यान्ता नायकेष्वपि ते दश ॥१०॥

एषां क्रमेण लक्षणमाह–

जन्मतः प्रभृति स्वान्ते विकारपरिवर्जिते।
उद्बुद्धमात्रः प्रथमं विकारो भाव उच्यते ॥११॥

यथा–

स एव यमुनातीरसङ्गी सखि! समीरणः।
तदेवोपवनं चित्तमन्यादृशमिदं कुतः ॥१२॥

विकारैर्लोचनादीनां सम्भोगेच्छाप्रकाशकः।
अल्पसंलक्ष्यवैकृत्यो भावो हावः प्रकीर्तितः ॥१३॥

यथा –

अनिमिषदृशा सरस्यां पश्यन्ती चक्रवाकमिथुनानि।
किञ्चिदुदञ्चितपुलकैर्मुग्धवधूर्भावमाख्याति ॥१४॥

हेलात्यर्थसमालक्ष्यविकारो भाव एव च।

यथा—

रेखाञ्जनस्य सरलापि कृतातियत्नात्
कौटिल्यमेव भजते नयने यदस्याः ।
वाच्येषु यद्भणितयः सकलेषु वक्रा
जानीमहे मदनजीवनमम्बुजाक्षी ॥१५॥

ननु भावादयस्त्रय आन्तरा धर्माः कथमतीन्द्रियस्य रसस्यानुभावत्वेन ज्ञापका भविष्यन्ति, शारीरा धर्माः कटाक्षादयस्तस्यानुभावकत्वेनोक्ता इति चेन्न ।[1]

आन्तरोऽप्यनुभावः कथितोऽस्ति । प्रमोदादिस्तस्य ज्ञानमेवानुभावकम् । तच्चैन्द्रियकं मानसं वेति न कश्चिद्विशेषः ।

उक्तं हि भरतेन–

"नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदैश्च ।
विविधैरङ्गविकारैस्तस्याभिनयः प्रयोक्तव्यः ॥१६॥" इति

रूपलालित्यतारुण्यभोगैः शोभाङ्गभूषणम् ॥१७॥

यथा–

पाणिः प्रवालसुभगस्तव कुन्दवृन्द-
निन्दाकरी जयति सुन्दरि ! दन्तपङ्क्ति ।
चक्षुः सरोजसुषमं मुखमिन्दुबन्धु-
र्जीवी जनो भवति कस्तव नैव वश्यः ॥१८॥

कामोन्मेषातिविस्तीर्णा शोभा कान्तिर्निगद्यते ।

यथा–

हरसि कुचयोः कान्त्या हेमाचलश्रियमुन्नतां
सुमुखि ! वदनं लक्ष्मीमिन्दोर्बलादिह कर्षति ।

1. Here, obviously, some lines of the text appear to be missing.

नयनयुगलं गृह्णात्यम्भोरुहद्युतिसम्पदं
भुवनविजये कामः कोषं किमालि ! समीहते ॥१९॥

अत्यन्तविस्तृता कान्तिः सैव दीप्तिरुदीरिता ॥२०॥

यथा–

एतस्याः करपल्लव(स्य रुचिभिश्शोणं समीक्ष्याम्बरं)
(मध्याह्नेऽपि रथाङ्गनाम)मिथुनं सन्ध्याधिया सीदति ।
किञ्च प्राञ्चति यत्र यत्र सुमुखी तत्राङ्गदीप्त्या पुनः
(सर्वं वस्तु सुवर्णनिर्मितमिव प्रेक्ष्यं किमाचक्ष्महे) ॥२१॥

सर्ववस्तुषु रसोद्दीप्तिर्भवति । अत उद्दीपनविभावत्वमासां युक्तम्, न पुनरनुभावत्वमिति चेत्, सत्यम् ।

दृष्टे हि शोभादौ कामिनां रसोद्दीपकत्वान्न उद्दीपनविभावा भवन्ति । ना[1] . . .
. . 'णादयः ।

यथा–

गोप्योऽपि तं मधुरवेणुनिनादमुच्चैः
श्रुत्वा तदा मनसि विस्मृतसद्मकृत्याः ।
स्विद्यद्वपुः पुलकपालिपरीतगात्राः
कृष्णस्य चारु चरितं ललितं जगुस्ताः ॥२२॥

यथा वा–

वंशीरवश्रवणकम्पितदेहयष्टेः
कस्याश्चिदम्बुरुहसुन्दरलोचनायाः ।
अङ्कात्पपात तनयोऽल्पतनुर्लताया
वृन्तान्नवं फलमिवानिलदोलितायाः ॥२३॥

यथा वा–

1. Here also several lines of the text appear to be missing.

काश्चित्तदा यदुपतेः स . . .विमुक्त-
व्यालोलचारुचिकुरप्रकरा व्रजन्त्यः ।
रेजुश्चलद्भ्रमरपङ्क्त्यनुगम्यमाना
वातोद्धता इव लता व्रजबन्धुराक्ष्यः ॥२४॥

सविधो . . .कोऽतिगर्वेण पापीष्टेऽर्थे तिरस्कृतिः ।

यथा-

मानापनोदनकृते किल दीयमानं
कृष्णेन कौस्तुभमणिं तमनर्घ्यमूल्यम् ।
ईषद्विलोक्य नयनाम्बुरुहेण गोपी
काचित्पुरोगतमवीक्षितवच्चकार ॥२५॥

स्मितक्रोधश्रमत्रासशुष्करोदनकर्मणाम् ॥२६॥
प्रियसङ्गमजाद्धर्षात्साङ्कर्यं किलकिञ्चितम् ।

यथा-

त्रसन्ती हसन्ती वृथा संरुदन्ती
स्मितं कुर्वती कोपमुद्भावयन्ती ।
परीरम्भणायाथ शौरेस्तदानीं
मनो मोहयामास काचित् सुवाणी ॥२७॥

नेपथ्यरचनाल्पापि विच्छित्तिः कान्तिपोषिका ॥२८॥

यथा-

हारो नोरसि नाञ्जनं नयनयोः कर्णे न वा कुण्डलं
शोभाधिक्यमियं तथापि स परीधत्ते कपाले तव ।
जानीमः कुसुमायुधस्य नृपतेस्त्वं केतुयष्टिस्ततः
केतुस्ते न सुलोचने ! त्वदुपरि स्वीयः समारोपितः ॥२९॥

प्रियागमनकर्मादौ त्वराहर्षादिसम्भवः ।
अलङ्कारादिविन्यासः प्रस्थाने विभ्रमः स्मृतः ॥३०॥

विपर्यस्तो न्यासो विन्यासः ।   यथा–

आयाति प्रणयी तवेति वचनं श्रुत्वा सखीभाषितं
भूषान्यासविधिं तनौ मृगदृशा सम्पादयन्त्या तया ।
केयूरं पदपङ्कजे परिहितं बाहौ धृतं नूपुरं
काञ्ची कण्ठतटे न्यधायि जघने न्यस्ताश्च पुष्पस्रजः ॥३१॥

अज्ञानादिव कामिन्या ज्ञातस्यापि हि वस्तुनः ।
यः प्रश्नः क्रियते पत्युः पुरस्तन्मौग्ध्यमुच्यते ॥३२॥

यथा–

किं सरस्तत्क वा भूमौ कृष्ण केन विनिर्जितम् ।
यत्पद्ममेतदत्रास्ति पञ्चशाखे पदे तव ॥३३॥

वक्तव्यसमयेऽपि स्याद्वचो विकृतं ह्रिया ।

यथा–

कान्ते तं तं कथय यमुनातीरवानीरकुञ्जे
वृत्तान्तं मे त्वमिति कुतुकात् पृच्छ्यमाना मया सा ।
न ब्रूते स्म स्वयमवनता किन्तु सर्वं तदानीं
गात्रप्रोद्यत्पुलकपटली पङ्कजाक्षी जगाद ॥३४॥

तपनं प्रियविश्लेषे कामवेगोत्थिता क्रिया ॥३५॥

यथा–

विलुठति बहुशः क्षितौ निकामं
क्षिपति यतस्तत एव बाहुवल्लीम् ।
श्वसिति समधिकं सरोरुहाक्षी
बत करुणाविमुखो विधेर्विलासः ॥३६॥

मदो विकारः सौभाग्यतारुण्याद्यवलेपजः ।

यथा–

घनमलयजपङ्कलेपमङ्गे
विरचय मा मम केलिकारणेन ।
सुमुखि ! यमुपगूहनान्तरायं
पतिरवगम्य वियोगिवद् बिभेति ॥३७॥

यथा वा—

उपवनकुसुमावलोकनेषु
प्रियसखि ! नैव समुत्सुकाहमस्मि ।
युगपदभिमुखं निपत्य तस्मिन्
विदधति वीक्षणवारणानि भृङ्गाः ॥३८॥

यथा वा—

मामेव केवलमयं भजते विलासी
नान्यासु गच्छति मनागपि मां विहाय ।
इत्यात्मनः कलयति स्म कृतार्थतां सा
क्रीडां यया सह चकार सरोजनेत्रः ॥३९॥

दयितस्य कथारम्भे चित्ते तद्भावभाविते ॥४०॥
तन्मोट्टायितमाचख्युः कर्णकण्डूयनादि यत् ।

यथा—

आलीजनेन दयितस्य कथासु तासु
सञ्चारितासु सुदृशः करपद्ममस्याः ।
आरोपितुं प्रियकथामिव कर्णसीम्नि
कण्डूयनस्य कपटेन करोति खातम् ॥४१॥

ग्रहे कचस्तनादीनां हर्षे सत्यपि सम्भ्रमात् ॥४२॥
ऊचुः कुट्टमितं नेति मस्तकम्पनधूननम् ।

यथा—

अधरमधुरसे निपीयमाने
सति हरिणा व्रजबल्लवाङ्गनायाः ।
चिकुरमधुकरालिरीर्षयेव
क्षणधुतमस्तकबोधिता[1] चचाल ॥४३॥

अङ्गानां सौकुमार्येण विन्यासो ललितं भवेत् ॥४४॥

यथा–

हरन्त्यो मत्तकुम्भीन्द्रदर्पं हंसोपहासिकाः ।
राधिकागतयोऽत्यर्थं रेजुर्मन्मथमन्थराः ॥४५॥

रम्यार्थस्यावलोकेन चाञ्चल्यं स्यात्कुतूहलम् ।

यथा–

अजानन्ती कचात् पुष्पं पतत् पादाच्च नूपुरम् ।
गोवर्धनं दधानं तं द्रष्टुं काचिद् ययौ द्रुतम् ॥४६॥

भूषणस्यार्धनिर्माणं वृथा विष्वग्निरीक्षणम् ॥४७॥
ईषद्वचो रहस्यस्य विक्षेपो दयितान्तिके ।

यथा–

बदति रहस्यं किञ्चिच्चकितां सर्वत्र दृष्टिमाधत्ते ।
अर्धविनिर्मितमक्ष्णोः कज्जलमेषा करोति तन्वङ्गी ॥४८॥

हसितं तु वृथाहासो यौवनोद्भेदसम्भवः ॥४९॥

यथा–

अकस्मादेव हासोऽस्या यन्मुखादेव निर्ययौ ।
तन्मन्ये तूर्णतः पुष्पबाणः कामेन दर्शितः ॥५०॥

क्रीडितं सह कान्तेन विहारे केलिरुच्यते ।

यथा–

कृष्णः कयापि सह संविलसन्निकामं
तन्मानकालमवगम्य तिरोबभूव ।

1. The printed text reads '—बौधिता'.

मत्वाथ तां स गलदश्रु विनिश्वसन्ती-

माविर्भवन् पुरत एव पुनश्चुचुम्ब ॥५१॥

चकितं भयसम्भ्रान्तिः कुतोऽपि दयिताग्रतः ॥५२॥

यथा—

वासापुष्पं वने वीक्ष्य व्यात्तसर्पाननभ्रमात् ।

बिभ्यती चकितं गाढमालिलिङ्गाङ्गना प्रियम् ॥५३॥

एतेषामनुभावानां मध्ये दश भावादयः पुंसामपि भवन्ति, नायिकानां तु सर्वे ।

ननु भावादयः सर्वे नायिकानामलङ्कारत्वेन गणितास्तत्कथमनुभावा भवन्ति, इति चेत् सत्यम् । अलङ्क्रियतेऽनेनेत्यलङ्कारो रसानुभवगोचरतां नयतीत्यनुभावश्चेत्युभयलक्षणयोगादेतेषां भावादीनामुभयात्मकत्वमविरुद्धम् ।

उक्तं हि—

"उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः ।

तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि ॥५४॥" इति ।

तद्रूपा अनुभावरूपाः ।

केचित्तु—नायिकानां शृङ्गारचेष्टा हावः । स च स्वभावजः । तासां कः पुनरसावित्याह भरतः—

"लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् ।

मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ॥५५॥

विकृतं च—" इति ।

विभ्रमाः पुंसामपि सोपाधिका भवन्ति, स्त्रीणां पुनः स्वभावजा एव । इयान् विशेषः । उद्दीपने सति स्त्रीणां तेषामाविर्भाव उद्दीपनाभावे तिरोभाव इति वदन्ति । उदाहरणं तु पूर्वोक्तमेव । हावत्वमनुभावत्वमविरुद्धम्, अनुभावत्वस्य व्यापकधर्मत्वात् अलङ्कारत्वस्य च व्याप्यधर्मत्वादिति संक्षेपः ।

अथ सात्त्विकभावा निरूप्यन्ते—

स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः ॥५६॥

सत्त्वं नामात्मविश्रामप्रकाशकारी आन्तरः कश्चन धर्मविशेषः । तत्सम्भूताः सात्त्विकाः । केचित्तु 'सत्त्वं जीवच्छरीरं तस्य धर्माः सात्त्विका भावाः ।" वदन्ति । व्यभिचारिणः स्थायिनश्चान्तरा धर्मा न इतु शारीराः ।

क्रमेण लक्षणम्––

मनस्तापभयक्रोधहर्षलज्जाश्रमादिना ।
वपुर्जलोद्गमः स्वेदः सुधीभिः परिकीर्तितः ॥५७॥

यथा––

एतद्भूषणकौशलं तव तनौ पश्येत्तदा माधवो
राधे ! तत्सविधे तु चेतसि चले चेद्धैर्यमाधास्यति ।
इत्थं जल्पति शिल्पकारिणि जने तस्याः स्मरन्त्या हरिं
सद्यः स्वेदसरिद्व्यलुम्पदमलं पत्रावलीमण्डलम् ॥५८॥

विषादविस्मयक्रोधहर्षरागभयादिभिः ।
गतेर्निरोधः सत्यङ्गधर्मत्वे स्तम्भ उच्यते ॥५९॥

अङ्गधर्मत्वे सतीति विशेषणदानादपस्मारनिद्रादीनां व्यावर्तनम् । प्रलये तु चेष्टानिरोधो न तु गतिनिरोधः ।

यथा––

परस्परोदञ्चितरोमकण्टकैः
परस्परं कीलितनेत्रपात्रयोः ।
परस्परस्तम्भनिबद्धदेहयो––
रभूत्प्रयासो विफलायितस्तयोः ॥ ६० ॥

हर्षक्रोधभयाश्लेषतुहिनाद्भुतसम्भवम् ।
रोमोत्थानं तु रोमाञ्चः कथ्यते सर्वकोविदैः ॥६१॥

यथा--

कस्याश्चिदश्रुपरिपूर्णविलोचनाया
गात्रेषु तत्र पुलकावलयो विरेजुः ।
जानीमहे कुसुममार्गणमग्रबाण-
श्रेणीसमुल्लसितपक्षशिखाः स्फुरन्ति ॥६२॥

वैस्वर्यं स्वरभङ्ग स्यात्: क्रोधहर्षमदादिभिः ।

यथा--

प्रच्छादयसि किं तन्वि ! पुलकं वसनाञ्चलैः ।
कथयत्यखिलं भावं स्वरभङ्गो मनोगतम् ॥६३॥

भावत्वे सति हर्षादेः स्पन्दो देहस्य वेपथुः ॥६४॥

भावत्वे सतीति विशेषणं सूचकस्पन्दव्यावर्तनाय ।

यथा--

आदायाश्रुजलं दृशाभिमिलितः पत्युः पुरो धावितं
दत्तं चारुतनोः स्तनेन विदलत्कुर्यात्सरूप्यासनम् ।
चक्रेऽभ्यर्चनमङ्गकेन विलसद्रोमाञ्चदूर्वाङ्कुरैः
प्राप्टच्छद्रसनारवेण कुशलं कम्पः कुरङ्गीदृशः ॥६५॥

मोहक्रोधमनस्तापभयश्रममदादिजः ।
वर्णानामन्यथाभावो वैवर्ण्यं कथ्यते बुधैः ॥६६॥

यथा--

धारावलीमौक्तिकहारहीन-
स्त्यक्तस्तडित्कान्तिचयेन दीनः ।
व्यधत्त देहे खलु पाण्डिमानं
प्रावृड्वियोगव्यथयाम्बुवाहः ॥ ६७ ॥

दुःखक्रोधप्रहर्षादेरश्रु नेत्रोद्भवं पयः ।

यथा--

तं शृण्वतो मुरलिकानिनदं व्रजस्त्री-
वृन्दस्य बाष्पनिवहाः परितो निपेतुः ।
मन्ये तदीयहृदयैश्चपलैस्तदानीं
धैर्याय हन्त ! सलिलाञ्जलयो वितीर्णाः ॥६८॥

प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥६९॥

यथा—

अन्योन्यनिविडाश्लेषनिचेष्टसकलाङ्गयोः ।
यूनोर्जीवनमाख्याति वपुषः पुलकोद्गमः ॥७०॥

जृम्भापि नवमो भावः प्रोक्तो भानुकवीश्वरैः ।

भावः सात्त्विक इति शेषः । न चाङ्गाकृष्ट्यादेः सात्त्विकभावत्वापत्तिरिति वाच्यम् । तस्य भावलक्षणाभावात् । जृम्भा तु विकारजन्या । विकारनिवृत्तौ जृम्भानिवृत्तिः । अङ्गाकृष्टिनेत्रमर्दनादयो लोकैः स्वेच्छया क्रियन्ते । तेषां विकारजन्यत्वाभावात् ।

यथा--

मानावसानसमये वदने प्रियाया
जृम्भां विलोक्य कुसुमालिमिवाकिरन्तीम् ।
हस्ताङ्गुलीध्वनिमिषेण मृदङ्गशब्दं
प्राकेलिताण्डवविधेरकरोन्मुरारिः ॥७१॥

अथ हास्यानुभावाः स्युर्वदनस्मेरतादयः ॥७२॥

आदिशब्दान्नासाकपोलस्पन्ददृष्टिकुञ्चनादयः ।

यथा--

स्त्रीवासः परिधाय लोचनयुगे न्यस्याञ्जनं कर्णयो-
स्ताटङ्के च निवेश्य बिल्वयुगलं वक्षःस्थले स्थापितम् ।

तत्पश्यन्नसकृन्मुहुरुरोदेशे तदायोजय-
न्नाकुञ्चन्नयनं जनेन हसता मायाशिशुर्वीक्षितः ॥७३॥

अत्राक्षिसङ्कोचः ।

करुणस्यानुभावाः स्युर्वैवर्ण्यं परिदेवनम् ।
भूमिपातो दैवनिन्दा निश्वासो मुखशोषणम् ॥७४॥
प्रलापः क्रन्दनं मोहागमोरस्ताडनादयः ।

यथा--

शक्त्या विद्धं समिति पतितं लक्ष्मण ! त्वां विलोक्य
व्यातन्वानः स्तनितनिचयच्छद्मनाक्रन्दमुच्चैः ।
विद्युद्व्याजादयमपि घनः पश्य सन्तापवह्निं
बिभ्रद्बाष्पं सृजति नितरां वारिधाराच्छलेन ॥७५॥

अत्राक्रन्दनादयः ।

रौद्रेऽनुभावा भ्रूभङ्गो दन्तैरधरपीडनम् ॥७६॥
आत्मावदातकथनं शस्त्रक्षेपश्च तर्जनम् ।
बाहुस्फोटनवैवर्ण्य एवमाद्याः प्रकीर्तिताः ॥७७॥

यथा--

भीमोऽहं राजपुत्रीचिकुरपरिकराकृष्टिदृष्टिप्रवृद्ध-
द्रोहो दुःशासनोरःस्थलरुधिरपयःपानबद्धप्रतिज्ञः ।
यद्दोर्दण्डप्रतापे प्रतपति परितः कौरवीणां चमूनां
[1]गोष्पुदुर्योधनस्य व्रजति पृथुतरः शुष्कतां गर्वपङ्कः ॥७८॥

अत्र प्रतिज्ञादयः ।

अथ वीरानुभावाःस्युः स्थैर्यधैर्यपराक्रमाः ।
विनयदानप्रभावविक्षेपान्वेषणादय ऊहनीयाः ।

युद्धवीरानुभावो यथा--

1. The printed text reads 'गोपु-'

आयात्येव कृतान्तभीषणतनुर्दिव्यास्त्रपारङ्गमो
दोर्दण्डेन वशीकृतत्रिभुवनः श्रीदीप्तदर्पोद्धुरः ।
इत्युक्त्वाङ्गुलिसंज्ञया परिजनैर्विज्ञापितं रावणं
वीक्ष्यावीक्षितवच्चकार निभृतं दृष्ट्या रघूणां पतिः ॥७९॥

अत्र स्थैर्यधैर्ये ।

दानवीरानुभावो यथा——

पश्यन् वामनरूपिणं क्षितिसुरं वैरोचनिः कौतुक-
व्यग्रान्तःकरणो न तस्य सहसा सस्मार सम्भाषणम् ।
मह्यं देहि पदप्रमाणधरणीमित्युक्तिकर्त्रे पुन-
स्तस्मै लोचनयोः प्रमोदसलिलव्याजेन सोऽर्द्धं ददौ ॥८०॥

अत्राश्रु ।

दयावीरानुभावो यथा——

कण्ठान्तिकं यावदुपैति कृष्ण-
नामार्तिभाजः करटीश्वरस्य ।
तावन्महाकोमलमानसस्तं
ग्राहाननान्मोचयति स्म कृष्णः ॥ ८१ ॥

अत्र प्रभावः ।

भयानकानुभावाः स्युर्गद्‌गदस्वरभाषणम् ॥८२॥
वैवर्ण्यपुलकाश्रूणि स्वेददिक्प्रेक्षणादयः ।

यथा- -

गीतं कुण्डलिकन्यया तव यशः श्रीकर्ण ! शेषान्तिके
सन्तोषेण विधूतमूर्धनि पुनस्तस्मिन् भवद्वैरिणः ।
त्वत्सेनागमनानमत्क्षितितलक्षोभाशया कुर्वते
गुप्ताः कुञ्जगृहोदरेष्वशरणं हाहारवगर्भा गिरः ॥८३॥

अत्र हाहाकारः ।

बीभत्सस्यानुभावाः स्युर्दृगास्याच्छादनादयः ॥८४॥

आदिपदात्सर्वाङ्गसंहारनिष्ठीवनादयः ।

यथा––

हन्त दुःशासनासृग्भि पिबन्तं भीममाहवे ।
वीक्ष्य प्रच्छादयामासुः करैर्नेत्राणि सैनिकाः ॥८५॥

स्पष्टम् ।

स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गश्च सम्भ्रमः ।
विलोचनविकाराद्या अनुभावा रसेऽद्भुते ॥८६॥

यथा––

पयोधावतलस्पर्शे सेतुं रामेण निर्मितम् ।
संवीक्ष्य राक्षसाः सर्वे तस्थुश्चित्रार्पिता इव ॥८७॥

अत्र स्तम्भः ।

अनुभावो रसे शान्ते सर्वत्र समदृष्टिता ।
रोमाञ्चादय ऊहनीयाः ।

यथा––

मुरारे ! कंसारे ! भवजलधितारे हिततर[1] !
हरे ! शौरे ! लक्ष्मीरमण ! रघुवीरेति जपतः ।
समीकृत्य प्रेक्षां जगति सकले संकलयतः
कदा गोदातीरे कथय मम यास्यन्ति दिवसाः ॥८८॥

अत्र समदृष्टित्वम् ।

प्रसङ्गादाह—

द्रष्टा दर्शयति व्रीडां नैव सम्मुखमीक्षते ॥८९॥
अतिक्रान्तं भ्रमन्तं वा प्रच्छन्नं पश्यति प्रियम् ।

1. The printed text reads 'हिततरे'

पृच्छ्यमानापि बहुशो मन्दं मन्दं नतानना ॥९०॥
किञ्चित् सगद्गदं प्राणनाथं प्रायेण भाषते ।
अन्यैः प्रियकथां शश्वत्प्रारब्धामेकमानसा ॥९१॥
अन्यत्रन्यस्तनयना कर्णयत्यनुरागिणी ।
इत्यादीनि······गीतानि कन्यकामुग्धयोः···॥९२॥

शृङ्गारानुभावाः दिङ्मात्रमुदाह्रियन्ते ।

यथा—

मत्सम्मुखे मृगाक्षी तस्थौ वदनं परावर्त्य ।
अथ निर्याते मयि सा पथि मे निदधे दृशौ दीने ॥९३॥

अथ सकलकामिनीनामनुरागेङ्गितान्यनुभावाः कथ्यन्ते—

प्रियस्य निकटे वासं चिराय बहु मन्यते ।
प्रियस्याक्षिपथं याति न कदाप्यनलङ्कृता ॥९४॥
काचिदूर्ध्वस्थवस्तूनां ग्रहणव्यपदेशतः ।
बाहुमूलं कुचौ नाभीपङ्कजं परिदर्शयेत् ॥९५॥
आनन्दयति सूक्तेन प्रियस्य परिचारकम् ।
अस्य मित्रेषु विश्वासमादरं च करोति सा ॥९६॥
ब्रूते गुणान् सखीमध्ये ददाति स्वधनान्यपि ।
प्रिये सुप्ते स्वपित्यस्य दुःखे दुःखं दधाति च ॥९७॥
सुखेऽस्य सुखमाधत्ते म्लानेऽस्मिन् मलिना भवेत् ।
तिष्ठत्यक्षिपथे शश्वत्प्रिये पश्यति दूरतः ॥९८॥
आभाषते परिजनं प्रियस्याप्यनुरागिणी ॥
यत्किञ्चिदपि संवीक्ष्य हसितं कुरुते मुधा ॥९९॥
कर्णकण्डूयनं बाला कुरुतेऽस्य कथासु च ।
संमार्ज्य चिकुरं गेहे बध्नात्यागच्छति प्रिये ॥१००॥

जृम्भते स्फोटयत्यङ्गं बालमाकृष्य चुम्बति ।
वयस्यायास्तथा भाले कुरुते तिलकक्रियाम् ॥१०१॥
निरीक्षते कटाक्षेण लिखत्यङ्गुष्ठकोटितः ।
स्वाधरं दशति ब्रूते प्राणनाथमधोमुखी ॥१०२॥
विमुञ्चति न तं देशं दृश्यते यत्र नायकः ।
कार्यव्याजेन कान्तस्य गृहमागच्छति स्वयम् ॥१०३॥
दत्तं च प्रेयसा वस्तु निधायोरसि वीक्षते ।
हृष्यति प्रेयसो योगे वियोगेऽतिकृशा भवेत् ॥१०४॥
तच्छील साधु मनुते तत्प्रियं मन्यते प्रियम् ।
अल्पमूल्यानि वस्तूनि प्रार्थयत्यात्मनः प्रियम् ॥१०५॥
विकारं सात्विकं तस्य संमुखी नाधिगच्छति ।
सूनृतं भाषते नित्यमनुरागयुता वधूः ॥१०६॥
एतेषु च प्रगल्भाया हतलज्जं विचेष्टितम् ।
मध्यलज्जं तु मध्याया बहुलज्जं नवस्त्रियः ।
तथापि गतलज्जं तु वेश्यायाश्च परस्त्रियाः ॥१०७॥

इत्यादीन्यनुरागेङ्गितानि सकलकामिनीनां शृङ्गारानुभावा दिङ्मात्रमुदाह्रियन्ते ।

यथा—

कर्षन्ती शिरसो वासः करेणाच्छादितुं मुखम् ।
व्रजन्ती पङ्कजाक्षी मां पथि दर्शयति स्तनौ ॥१०८॥

इति श्रीमहाराजाधिराजश्रीकर्णसिंहकारिते कर्णभूषणे मैथिल-श्रीगङ्गानन्दकविराजविरचितेऽनुभावनिरूपणो नाम द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः

अथ व्यभिचारिणो निरूप्यन्ते--

विशेषेणाभितः काये स्थायिनं चारयन्ति ये ।

अनुभावादिहेतूंस्तान् वदन्ति व्यभिचारिणः ।

यद्वा –

व्यभिचारणयोगित्वाद् व्यभिचारिण ईरिताः ॥१॥

व्यभिचारणं व्यापारः। रत्यादेरीषद्व्यक्तस्य प्राकट्यं हि तत् । रसेषु इतस्ततो गामित्वं वा व्यभिचारित्वम् । स्थिरे हि रत्यादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरन्तीति व्यभिचारिणो वा ।

के ते पुनरित्याह—

निर्वेदग्लानिशङ्कामदधृतिसहितापस्मृतिस्वप्नहर्षा-

सूयावेगावहित्थाः समरणजडतात्रासनिद्राविबोधाः ।

चिन्तौत्सुक्यौग्र्यमोहाः श्रममतिसहितामर्षलज्जाविषादा

उन्मादव्याधितर्काः स्मरणचपलतादीनतालस्यगर्वाः ॥२॥

एतेषां क्रमेण लक्षणमाह—

निर्वेदः स्वावमानः स्यात्—

तत्त्वज्ञानाज्जिहीर्षादिर्विभावोऽस्य समीरितः ।

चिन्तास्वेदप्रकाशाद्या अनुभावाः प्रकीर्तिताः ॥३॥

यथा--

पठितं न विवेकवाञ्छया

भुवने पर्यटितं दुराशया ।

रघुवीरपदानुचिन्तया

सफलं नैव जनुः कृतं मया ॥४॥

—ग्लानिर्निर्बलता मता ।

रत्यायासो वियोगोऽस्या विभावास्तृट्क्षुधादयः ।

अनुभावस्तु कार्श्यादिः पुनरस्याः प्रकीर्तितः ॥५॥

यथा—

वियोगेनापचीयन्ते तनवोऽस्याः प्रतिक्षणम् ।

दिवाकरकराक्रान्ताः कला इव कलानिधेः ॥६॥

शङ्कानिष्टानुसन्धानम्—

विभावोऽस्याः परक्रौर्यदुर्णयादिः समीरितः ।

अनुभावाः पुनः कम्पस्वक्रियागोपनादयः ॥७॥

यथा—

मिथ्याकल्पनशिल्पिनः परिजनाः कान्तः कृतान्तोपमः

किं चेयं प्रतिवेशिनी मम महाकुत्साभिरुत्साहिनी ।

सख्यो नापि तथा कथासु कुशलाः किं स्यादिति व्यग्रया

विन्यस्तोऽधरपल्लवे मृगदृशा निश्वस्य लाक्षारसः ॥८॥

—हर्षोत्कर्षो मदः स्मृतः ॥९॥

उत्कर्षस्तु दुःखासम्भिन्नसुखानुभावः ।

विभावो मदिरापानमस्य धीरेण कथ्यते ।

निद्रोत्तमस्य हसितं मध्यमस्याधमस्य च ॥१०॥

रोदनादीनि विद्वद्भिरनुभावाः प्रकीर्तिताः ।

निद्रात्र इन्द्रियसम्मोहरूपा घूर्णनादिसादृश्येन निद्रेव निद्रा । हर्षव्यभिचारिभावे नातिव्याप्तिः । तत्र उत्कृष्टनिष्ठाया जातेरभावात् । स तु मनःप्रसादरूपः, मदस्तु मनोमोहस्वरूपः । हर्षे पुलकादयोऽनुभावाः, मदे तु रोदनादय इति जातिस्वरूपानुभावानां भेदादस्य भेदः ।

यद्यपि 'तिष्ठ तिष्ठ क्षणं मूढ मधु यावत् पिबाम्यहम्' इत्यादौ वीररसे मदोऽस्ति, न पुनस्तत्र रोदनादयो दृश्यन्ते, तथापि शृङ्गारे रोदनादयोऽनुभावाः। वीरे तु नयनारुण्यचमत्कारादय इत्यनुभावभेदो रसभेदेन सामान्ये च मदे नेत्रघूर्णन-वाक्स्खलनादयश्चानुभावा इति दिक्।

यथा--

चन्द्रानुबिम्बमभितश्चषके निरीक्ष्य
वाराङ्गनाः परिणतामृतधाममुख्यः।
निर्विश्य मृद्वदनमत्र पिबत्यजस्रं
सीधुद्रवानिति हसन्ति परस्परेण ॥११॥

सन्तोषो मानसे दुःखाबुद्धिर्वा धृतिरुच्यते ॥१२॥
ज्ञानेष्टाधिगमादिस्तु विभावोऽस्या निगद्यते।
अनुभावस्तु निर्व्यग्रभोगास्योल्लासनादयः ॥१३॥

यथा--

वाञ्छन्ति केचिदवनीधवतां धनेषु
सौख्यानि कश्चिदनुविन्दतु वन्दनीयः।
अस्माकमुन्नततपःफलमेतदेव
यद् भिक्षयापि मितया भरणं तनूनाम् ॥१४॥

अपस्मृतिर्मनःक्षेपः--
शून्यस्थितिरपाविव्र्यं धातुवैषम्यमेव च।
दुःखाधिक्यं ह्यावेशो विभावोऽस्याः प्रकीर्तितः ॥१५॥
निश्वासफेनभूपातरसनाचालनानि च।
लालादयस्तु विद्वद्भिरनुभावाः प्रकीर्तिताः ॥१६॥

यथा--

खे खेलद्व्रककैतवेन परितो मुञ्चन्ति फेनोच्चयं
स्यन्दन्ते प्रविलोलयन्ति रसनाः सौदामिनीच्छद्मना ।
लालाः किञ्च समुद्गिरन्ति पयसां धारापदेशादमी
मूर्च्छन्ति ग्रहवत्र्मनिग्रहकृतावेशा इवाम्भोधराः ॥१७॥

अत्र मूर्च्छान्तर्भाव. ।

——निद्रां प्राप्तस्य देहिनः ।
विषयानुभावोऽस्तु स स्वप्नः संकथ्यते बुधैः ।
त्यक्त्वान्यदिन्द्रियं मनस्त्वचि यदा वर्तते तदा स्वप्नः ।
वि ावोऽत्र क्लमालस्ये स्वभावपरिचिन्तनम् ॥१८॥
अनुभावाः पुनर्नेत्रस्पन्दो भ्रूचलनं तथा ।
भ्रमोक्तिः पार्श्वकरणं स्वप्नालोकादयो मताः ॥१९॥

यथा——

उपायातस्तल्पं मम कुसुमकल्पं मधुरिपुः
समारेभे वाचा मधुरसमुचा चाटुशतकम् ।
अथारब्धे माने सहचरि मयानेककपटा—
द्विधाता मन्निद्रामहरत तदानीमसहनः ॥२०॥

मनःप्रसादो हर्षः स्यात्——
विभावोऽत्र प्रियालोकपुत्रजन्मादिरेव च ।
अनुभावास्तु धीरेण रोमाञ्चादय ईरिताः ॥२१॥

यथा——

गोप्योऽपि तं मधुरवेणुनिनादमुच्चैः
श्रुत्वा तदा मनसि विस्मृतसद्मकृत्याः ।
स्विद्यद्वपुः पुलकपालिपरीतगात्राः
कृष्णस्य चारु चरितं ललितं जगुस्ताः ॥२२॥

—परोत्कर्षासहिष्णुता ॥२३॥

परानिष्टचिकीर्षा वासूया धीरेण कथ्यते ।
विभावोऽस्यास्तु दौर्जन्यं मदादिः कथ्यते बुधैः ॥ ४॥
अनुभावा भ्रुवो भेदो दोषोद्घोषादयो मताः ।

यथा–

प्रतिपक्षमृगीदृशा समं
रममाणं दयितं शरन्निशि ।
समुदीक्ष्य वधूः कुरु ध्वनी–
निति वेत्रेण निहन्ति कुक्कुटम् ॥२५॥

आकस्मिकेष्टानिष्टाप्तेरावेगः सम्भ्रमो मतः ॥२६॥
तद्विभावा अभीष्टार्थश्रुत्यरिप्रेक्षणादयः ।
अनुभावास्त्वरा देहवसनस्खलनादयः ॥२७॥

यथा—

श्रुत्वा सूर्यसुतानिकुञ्जकुहरोद्भूतं मुरद्रोहिणः
सङ्केतागमनाय वेणुनिनदं न प्रेक्षितो दुर्जनः ।
वासो विस्खलितं न संवृतमथ व्यस्तोऽसमूलद्वये
बद्धो नैव कचः पुरः प्रचलितं प्रेमान्धया राधया ॥२८॥

अवहित्थाकारगुप्तिः—

विभावोऽत्र भयं लज्जागौरवादिः प्रकीर्तितः ।
अनुभावोऽन्यसम्भाषान्यथाकारोऽन्यदर्शनम् ॥२९॥

यथा––

भीमो भीमपराक्रमो मुरजिता सम्बद्धसख्योऽर्जुन–
स्तस्माद् भूमिरियं विभज्य भवता धर्मात्मने दीयताम् ।

इत्युक्तिं विनिशम्य संसदि गुरोर्द्रोणस्य दुर्योधनः
स्मेरस्मेरमुखः शिखण्डिनिवहं नृत्यन्तमालोकते ॥३०॥

—मरणं प्राणनिर्गमः ।

विभावा अत्र धीरेण शरपातादयो मताः ।
अनुभावाः पुनः प्रोक्ताः पृथिवीपतनादयः ॥३१॥

यथा--

कृष्णेन पातितां भूमौ पूतनां वीक्ष्य बल्लवाः ।
मानसे मेनिरे भ्रष्टामिव कंसजयश्रियम् ॥३२॥

जडताशेषकर्तव्याक्षमज्ञानत्वमुच्यते ।

कर्तव्येति व्यवहारेत्यर्थः ।

विभावास्तत्र गदिता इष्टानिष्टेक्षणादयः ॥३३॥

इष्टानिष्टापरिच्छेदनिर्निमेषेक्षणादयः ।
अनुभावा निगदितास्तत्रालङ्कारवेदिभिः ॥३४॥

मूर्च्छापस्मारनिद्राभ्यो ज्ञानविरहादस्या भेदः । त्रासालस्यभीतिभ्यः कतिपय-व्यवहारसत्त्वादस्याः पुनर्भेदः । यथा--

कुम्भकर्णवपुषोऽतिमहत्त्वं
वृद्धविन्ध्यधरणीधरतुल्यम् ।
निर्निमेषनयनाः कपिवर्गा
वीक्ष्य चित्रलिखिता इव तस्थुः ॥३५॥

त्रासो मानसविक्षोभः –

आकस्मिको मनोविक्षोभस्त्रासः । विचारेण मनोविक्षोभो भीरिति विशेषः ।

तत्र–

विभावा घोरसत्त्वादिदर्शनश्रवणादयः ।
अनुभावास्तु रोमाञ्चकम्पस्तम्भादयो मताः ॥३६॥

यथा–

कर्णोऽभ्येत्ययमित्युदीर्य सुखितां मे त्वद्गुणाकर्णना–
दित्यादिस्तुतिमाचरन्ति कवयो यावद्भवद्वैरिणाम् ।
तावत्ते भवदागमभ्रमभृतः श्रीकर्ण ! भूमीपते !
वेपन्ते गमने स्खलन्ति बहुशो गच्छन्ति कुञ्जोदरम् ॥३७॥

—निद्रा चेतोनिमीलनम् ॥३८॥

विभावास्तत्र कथिताः श्रमालस्यमदादयः ।
अनुभावाः समुच्छ्वासजृम्भाक्षिमिलनादयः ॥३९॥

यथा–

जृम्भारम्भविजृम्भमाणदशनज्योत्स्नाभिरामानना–
मीषद्गात्रविवर्तविश्लथभुजावल्लीमुदञ्चद्वलीम् ।
अर्धोन्मीलितलोचनामनिभृतं निश्वासमातन्वती–
मुत्स्वप्नायितविभ्रमं विदधती तां संस्मरामि प्रियाम् ॥४०॥

विबोधश्चेतनावाप्तिः––

निद्राभ्रंशो विभावोऽत्रानुभावाः कथिताः पुनः ।
जृम्भाङ्गाकृष्टिदृङ्मर्दा अङ्गुलिस्फोटनादयः ॥४१॥

यथा–

जृम्भाविसर्पितसुगन्धसुवासिताश–
मङ्गुष्ठमूलपरिमर्दितनेत्रयुग्मम् ।
प्रातर्मुरारिपरिदर्शितदर्पणं वः
क्षेमं करोतु वदनं कमलालयायाः ॥४२॥

—चिन्ता ध्यानं निगद्यते ।

ध्यानं चित्तैकाग्रता । तेन स्मृतौ नातिव्याप्तिः ।

इष्टनाशादयस्तत्र विभावाः परिकीर्तिताः ।
अनुभावाः पुनस्तापपाण्डुताशून्यतादयः ॥४३॥

यथा—

तापो गात्रं ग्लपयति तव श्वासधाराधिका ते
ज्ञातेऽप्यर्थे न च परिचयोद्भावनं दृश्यते ते ।
किं च क्षामा भवति भवती प्रत्यहं पाण्डुकान्ति—
र्जानीमस्ते वपुरुपगता कापि चिन्तापिशाची ॥४४॥

कालासहिष्णुतौत्सुक्यम्—

प्रियस्मृत्यादयस्तत्र विभावाः कथिता बुधैः ।
चित्रतापत्वरादीर्घनिश्वासस्वेदबिन्दवः ।
वपुर्गौरवतन्द्राद्या अनुभावाः प्रकीर्तिताः ॥४५॥

यथा—

न नितम्बगुरो गतिक्रियायां
कुरु विघ्नं हरिरस्ति कुञ्जभूमौ ।
यदि तस्य मुखं विलोकयेयं
त्वयि धास्ये रसनां तदा सरत्नाम् ॥४६॥

—औग्र्यं निष्कृपता मता ॥४७॥

तत्र शौर्यापराधाद्या विभावाः परिकीर्तिताः ।
अनुभावाः शिरःकम्पतर्जनादय ईरिताः ॥४८॥

यथा—

उद्दामद्युतिदुर्दिनीकृतसमिद्युद्धावरुद्धद्विष—
त्संदत्तद्रुतचित्तसाध्वसरसा सेयं गदा निर्दया ।

वस्त्रं कृष्टवतः पतत्वधिशिरो दुःशासनस्याद्य तत्
पाञ्चालीचिकुरं चिराय विततं बध्नातु निर्बन्धतः ॥६४॥

मोहो विचित्तता[1]--

दुःखावेगार्थचिन्ताद्या विभावास्तत्र भाषिताः ॥५०॥
अनुभावाः पुनर्गात्रघूर्णनादर्शनादयः ।

यथा—

यामीत्यप्रियवादिनि प्रियतमे कम्पैर्वपुर्व्याचितं
पादादेकपदावलम्बिनि पुनर्भ्रष्टं करात्कङ्कणम् ।
दृग्विच्छेदपथं गते पुनरविज्ञातात्मदुःखोद्गते–
र्वात्येवाङ्गलता जुघूर्ण सहसा तस्याः कुरङ्गीदृशः ॥५१॥

–खेद आयासप्रभवः श्रमः ।

रतिगत्यादयस्तत्र विभावा गदिता बुधैः ॥५२॥
अनुभावाः पुनर्दीर्घश्वासस्वेदादयो मताः ।

यथा--

माला म्लानरुचिर्विलोचनयुगं निष्पन्दतामागतं
व्यस्तोऽसौ परितः सरोरुहदृशो धम्मिल्लमल्लोत्तमः ।
भग्नं कङ्कणमङ्कतस्तु कुचयोः श्रीखण्डलेपो गतः
साधु श्वास ! सखे ! तदेव हि तव प्राखर्यमुज्जृम्भते ॥५३॥

नयमार्गानुसरणादर्थनिर्धारणं मतिः[2] ॥५४॥
शास्त्रचिन्तादयस्तत्र विभावाः पण्डितैर्मताः ।
करचालनशिक्षाद्या अनुभावाः प्रकीर्तिताः ॥५५॥

1. The printed edition reads 'विचित्रता'
2. The printed edition reads 'रतिः'

यथा–

त एव जगदाराध्यास्त एव सदनं श्रियः ।
ये मुरारिपदाम्भोजचिन्तया गमयन्त्यहः ॥५६॥

उपदेशोपालम्भनयविनयानुनया मतावन्तर्भवन्ति ।

हितैषितयाज्ञातज्ञापनमुपदेशः ।

यथा–

भक्तिर्गुरौ विधेया गेया कीर्तिः सदा विष्णोः ।
अपवादादवधेयं खलसङ्गमनं त्वया हेयः ॥५७॥

अपराधज्ञानमुपालम्भः ।

यथा––

अङ्गे वह्निस्फुलिङ्गप्रतिमशरशतं वर्षतः प्रौढहर्षा-
द्वात्सल्यं मीनकेतोर्मयि नियतिहते मास्तु ते निर्दयस्य ।
अस्त्रं सर्वस्वभूतं भुवनजयकृते यत्र वास्ति प्रसूतं
तस्मिन् देहेषु भस्मीभवति तव कथं नानुकम्पाप्रकाशः ॥५८॥

यथा वा–

मोच्छाहेउत्तणमिह जुज्जइ विससोअरम्मि चन्दम्मि ।
सिरिहंडरणवधूतं सि कइं पुण पवण तावेसि[1] ॥५९॥

इत्यनेकदिशोपालम्भस्य बहवो भेदा भवन्ति । ते च ग्रन्थगौरवभयादिह नोक्ताः ।

सामदानाद्युपायव्यवस्थितिर्नयः ।

यथा–

1. The *gāthā* may be rendered into Sanskrit in the following way–

मूर्च्छाहेतुत्वमिह युज्यते विषसोदरे चन्द्रे ।
श्रीखण्डारण्यावधूतोऽसि कथं पुनः पवन ! तापयसि ॥

यदपि स्तुतोऽसि साम्ना तदपि न चेन्दो जहासि तापकताम् ।
जीवधनं प्रियविरहे लज्जाकरमेतदादत्स्व ॥६०॥

सन्तोषप्रकाशकः क्रियाविशेषो विनयः ।

यथा——

मा सम्भावय मां गिरा मधुरया कुर्यां न चित्तोत्सवं
वातान्दोलविलोलपङ्कजदलद्रोहस्पृशा वा दृशा ।
आयाते मयि यच्चकार भवती कृत्यौचिती सम्भ्रमं
तेनैवाद्य ममेन्दुसुन्दरमुखि ! स्वात्मा महेन्द्रीयति ॥६१॥

अपराधक्षमापनमनुनयः ।

यथा–

कान्ते ! स्वान्ते कथय विहितः कोऽपराधो मया ते
यस्मान्नालीजनहितवचः कर्णपालीमुपैति ।
मानम्लानं न कुरु वदनं पश्य नो कस्य चित्ते
धत्ते मोदं मनसिजमहासिद्धिरम्भोधरश्रीः ॥६२॥

परगर्वक्षयप्रौढसमीहामर्ष उच्यते ॥६३॥

निन्दाक्षेपापमानादिविभावोऽत्र समीरितः ।
अनुभावाः शिरःकम्पनयनारुण्यतादयः (?) ॥६४॥

यथा–

भवेदाज्ञा भर्तुर्यदि समरदीक्षागुरुरहं
त्रसत्पौरारब्धप्रखरतरहाहाध्वनिमतीम् ।
तदा लङ्कां शङ्काकुलदशमुखाश्लेषसहितां
पयोधौ प्रक्षिप्य प्रलयमिह कुर्यां पलभुजाम् ॥६५॥

धाष्ट्याभावो भवेल्लज्जा—

दुराचारादयस्तत्र विभावाः कथिता बुधैः ।
अनुभावाः पुनः प्रोक्तास्तत्राक्षिनमनादयः ॥६६॥

यथा—

पृष्टायाः कुतुकवशात् किमपि रहस्यं सरोजनेत्रायाः ।
नमितविलोचनयुग्मं स्मरामि निभृतस्मितं वदनम् ॥६७॥

—विषादः सत्त्वसंक्षयः ।

विभावास्तत्र कथिता उपायागमनादयः ।
उपायचिन्तनं श्रेष्ठे मध्यमे विमनस्कता ॥६८॥
अधमे मुखशोषादिरनुभावः समीरितः ।

यथा—

गेहाद् बहिर्यदि मनागपि सञ्चलामि
श्वश्रूस्तदा मयि करिष्यति दुष्टतर्कम् ।
तिष्ठामि चेदिह तदा यमुनानिकुञ्ज-
वर्ती हरिर्मम वचांस्यनृतानि वेत्ति ॥६९॥

चेतसो भ्रम उन्मादः —

विभावाः कान्तविश्लेषसम्पन्नाशादयो मताः ।
अनुभावा वृथाक्रन्दवृथाहास्यादयो मताः ॥७०॥

यथा—

उन्मीलत्कुसुमानि पश्यति मुहुस्तस्याः स्मितस्याशया
वीरुत्पल्लवमुल्लसत्करधिया धर्तुं पुनर्धावति ।
बुद्ध्या तद् वचसः पिकस्य विरुते दत्ते तदैवोत्तरं
सङ्गः किं न करोति भिन्नहृदयः पञ्चेषुपञ्चेषुभिः ॥७१॥

—ज्वरादिर्व्याधिरुच्यते ॥७२॥

धातुप्रकोपकामोत्थक्लेशभीत्यादयो मताः ।
विभावा अनुभावास्तु शरीरोत्कम्पनादयः ॥७३॥

यथा—

मा शीतोदकशीतलैर्मलयजक्षोदैर्मनोजानल—
ज्वालां दीपय किं च वर्धय न वा तां तालवृन्तानिलैः ।
सोऽयं निर्दयमानसो यदुपतिर्लब्धावकाशोऽधुना
सन्तापज्वरजर्जरात्सखि हृदो हा हन्त निर्यास्यति ॥७४॥

तर्को विचारः ।

तत्र विप्रतिपत्त्यादेः समुद्भावनमुच्यते ।
विभावोऽथानुभावश्च भ्रूशिरोऽङ्गुलिनर्तनम् ॥७५॥

आदिशब्दात् संशयसाधकबाधकसमुद्भावनादयो गृह्यन्ते । वितर्कश्चतुर्विधः विप्रतिपत्त्यात्मा, संशयात्मा, विचारात्मा, अनध्यवसायात्मा चेति ।

उत्कटकोटिकः संशयोऽनध्यवसायात्मा ।

क्रमेणोदाहरणं यथा—

किं कल्पद्रुमपल्लवं भुजजयस्तम्भस्य किं तोरणं
किं वा लोकदृशां रसायनपुटं किं वा कुटीरं त्विषाम् ।
श्रीमत्कर्णमहेन्द्र (देव) ! भवतः किं कीर्तिमुक्ताखनिः
किं वा बाहुभुजङ्गमाधिपफणा किं वा करस्तावकः ॥७६॥

अयं कः कोदण्डं वहति परिपूर्णो हिमकरः
कुरङ्गस्तत्रायं कथय हृदयं मोहयति कः ।
इदं किं वा चक्रद्वयमुपरि धत्ते सुरधुनी-
मधस्तस्येयं का वद मधुपपङ्क्तिर्विजयते ॥७७॥

राधाचक्रमिदं धनुर्धरधराधीशातिगर्वापहं
दायादव्यसनोपशान्तविशिखाभ्यासोऽधुना फाल्गुनः ।
एते कर्णमुखाः खलाः परिसरे तिष्ठन्ति तत्केवलं
बीभत्सोरिह साहसस्य फलदं भावि द्विजाशीर्वचः ॥७८॥

एतद्वारिरुहं भवेदिह पुनः पाथो न सन्दृश्यते
चन्द्रोऽयं हरते दृशौ दिशि सरत्यस्य प्रकाशोऽहनि ।
आनन्दः प्रकटीभवत्ययमितः सोऽमूर्तिमान् विश्रुतः
कान्तालम्बिमुखं किमेतदिति मे चेतो मुहुर्मुह्यति ॥७९॥

—संस्कारजन्यं ज्ञानं स्मृतिर्भवेत् ।
सदृशज्ञानचिन्ताद्या विभावास्तत्र कीर्तिताः ।
अनुभावाः पुनः प्रोक्ता भ्रूसमुन्नयनादयः ॥८०॥

संस्कारजन्यत्वेन प्रत्यभिज्ञायास्तु संग्रहः ।

प्रत्यभिज्ञा यथा—

उन्नमति भ्रूयुगलं तव पुलकं गात्रमुद्वहति ।
तस्मादिह सखि ! कञ्चित् पुरानुभूतं विलोकयसि ॥८१॥

स्मृतिर्यथा—

गन्तुं तावत् परवशतया नो तयाहं निषिद्धः
प्रत्यावृत्त्यै छलविरचितप्रार्थनं चिन्तयन्त्या ।
यत्ताम्बूलोपहरणमिषादञ्जलिर्मञ्जुलाक्ष्याः
प्रारब्धो मे गमनसमये शल्यतुल्यं तदन्तः ॥८२॥

क्रियाशैघ्र्यं चपलता—

द्वेषरागादयस्तत्र विभावाः परिकीर्तिताः ।
अनुभावास्तु पारुष्यस्वच्छन्दाचरणादयः ॥८३॥

यथा—

तृष्णातुङ्गतरङ्गसङ्गगहने संसारवारांनिधौ
दुष्पारे प्लवनात् सदैव भवता खेदः परं लभ्यते ।
दुष्कर्माचरणावलीकृतमहासन्तापसन्तापिनी
रे चित्तारऽऽ····चण्डिकाचरणयोश्चिन्ताः किमुत्ताम्यसि ॥८४॥

—दुःखाधिक्यं तु दीनता ॥८५॥
विभावास्तत्र विश्लेषदुर्गतत्वादयो मताः ।
अनुभावाः समाख्याताः कायक्लेशादयः पुनः ॥८६॥

यथा—

असुशरणमकाण्ड एव कण्ठ-
स्तनुशरणं नवपल्लवं हिम च ।
शिव शिव शरणं न किञ्चिदक्ष्णो-
र्भवति भवत्पथमन्तरेण तस्याः ॥८७॥

अन्यच्च,

कर्तव्याशक्तिरालस्यं—
गर्भादयो निगदिता विभावास्तत्र सूरिभिः ।
अनुभावाः पुनः ख्याताः क्रियाकातरतादयः ॥८८॥

यथा—

प्रेरयति नैव हस्तं समीपमानेतुमिष्टमपि वस्तु ।
पश्यति निभृतनिमेषं गर्भवती कातरा गौरी ॥८९॥

—गर्वः सर्वाधिकत्वधीः ।
विभावास्तत्र लावण्यबलैश्वर्यादयो मताः ।
अनुभावाः पुनः प्रोक्ताः पौरुषख्यापनादयः ॥९०॥

यथा–

यावच्छ्वाससमीरणो बहिरितो निर्याति नासापुटा-
ल्लोकानां नयनाम्बुजेषु वलते यावन्निमेषोदयः ।
द्रोणद्रोणिविकर्णकर्णनिखिलक्षोणीश्वरै रक्षितं
तावत् पश्य सुयोधनस्य सकलं व्यापादयामो वयम् ॥९१॥

कस्मिन् रसे के व्यभिचारिण इत्याकाङ्क्षायामाह —

न सम्भोगे जुगुप्सा तु न चालस्यं न चोग्रता ।
विप्रलम्भे श्रमग्लानिनिर्वेदाः स्मृत्यपस्मृती ॥९२॥
शङ्का निद्रा तथौत्सुक्यमुन्मादो जडता तथा ।
सुप्तं विबोध आलस्यविषादव्याधयस्तथा ॥९३॥
दैन्यमोहो तथा त्रास एते स्युर्व्यभिचारिणः ।
हास्येऽवहित्थालसता प्रबोधा व्यभिचारिणः ॥९४॥
करुणे मोहनिर्वेददैन्यजाड्यान्यपस्मृतिः ।
विषादश्च तथा व्याधिर्भ्रम उन्माद एव च ॥९५॥
स्मरणं च तथालस्यं भवन्ति व्यभिचारिणः ।
रौद्रे स्मृतिश्चपलतावेगामर्षादयोग्रता ॥९६॥
उत्साहस्मृतिगर्वाख्या भवन्ति व्यभिचारिणः ।
वीरेऽमर्षस्तथावेगगर्वौग्र्यादिमतिस्तथा ॥९७॥
वृत्तिस्तथैव धीरेण कथिता व्यभिचारिणः ।
भयानके चपलतास्वेदस्तम्भविवर्णताः ॥९८॥
शङ्कागद्गदतामोहावेगप्रलयमूर्च्छनाः ।
रोमाञ्चापस्मृती दैन्यत्रासौ स्युर्व्यभिचारिणः ॥९९॥
बीभत्सेऽपस्मृतिर्व्याधिरावेगोऽपि मतिस्तथा ।
तथा ग्लानिश्च मोहश्च विज्ञेया व्यभिचारिणः ॥१००॥

हर्षादयोऽद्भुते ज्ञेयाः शान्तेऽपि व्यभिचारिणः ।
यस्मिन् रसे येऽनुकूलास्ते ज्ञेया व्यभिचारिणः ॥१०१॥
स्थायिपदव्यपदेश्या शृङ्गारे रतिरनुच्छिन्ना ।
हासः पुनरुत्पाद्यो व्यभिचारी तत्र कथ्यते धीरैः ॥१०२॥

तदुक्तम्—

"रसावस्थः परं भावः स्थायितां प्रतिपद्यते ।"

हासः पुनरुत्पाद्यमानो व्यभिचार्येव । व्यभिचारिलक्षणयोगात् ।

तत्राह—

स्थायिनोऽपि रसे क्वापि भवन्ति व्यभिचारिणः ।
क्रोधो वीरे रतिः शान्ते हास्येऽपि करुणे तथा ॥१०३॥
हासो भयं तथा शोकः शृङ्गारे परिकीर्तितः ।
भयानके जुगुप्सा स्यादुत्साहो रौद्रहास्ययोः ॥१०४॥
शान्ते जुगुप्सा कथिता हासो वीरे प्रकीर्तितः ।
उत्साहविस्मयौ सर्वरसेषु व्यभिचारिणौ ॥१०५॥

अथ दशाः —

अभिलाषः स्मृतिश्चिन्ता प्रलापो गुणकीर्तनम् ।
उन्मादो जडता व्याधिरुद्वेगो मृतिरेव च ॥१०६॥
विपश्चिता निगदिता एताः कामदशा दश ।
औत्सुक्येनाभिलाषस्तु गतार्थः कथितो बुधैः ॥१०७॥
गुणाख्यानात्मकस्मृत्या गतार्थं गुणकीर्तनम् ।
उन्मादेन प्रलापस्तु व्याप्तोऽन्यत्प्रागुदाहृतम् ॥१०८॥

इति श्रीमहाराजाधिराजश्रीकर्णसिंहकारिते मैथिलश्रीगङ्गानन्दकविराजविरचिते कर्णभूषणे व्यभिचारिभावनिरूपणो नाम तृतीयः परिच्छेदः ।

चतुर्थः परिच्छेदः

रसानामनुकूलो यो विकारो भाव एव सः ।
विकारस्त्वन्यथाभावः स पुनर्द्विविधो मतः ॥१॥
नानाभिनयसम्बद्धान्भावयन्ति रसान् यतः ।
तस्माद् भावा अमी प्रोक्ताः स्थायिसञ्चारिसात्त्विकाः ॥२॥

तदुक्तम्—

"सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् ।"

सात्त्विकव्यभिचारिभावौ प्रागुक्तौ । इदानीं स्थायिभावमाह—

यद्वा,

विरुद्धैरविरुद्धैर्वा यो भावैर्न पिधीयते ।
आस्वादाङ्कुरकन्दः स स्थायिभावः प्रकीर्तितः ॥३॥

यद्वा,

सजातीयविजातीयैर्भावैर्यो न पिधीयते ।
सोऽन्यभावात्मभावत्वग्राहकः स्थायिशब्दभाक् ॥४॥

अन्येति अन्येषां भावानामात्मीयभावत्वग्राहक इत्यर्थः । रत्यादीनां स्थायिनां निर्वेदादयो व्यभिचारिणः, पुलकादयः सात्त्विकाश्च भावाः, इति सर्वजनसिद्धा प्रतीतिः । ननु निर्वेदादीनां पुलकादीना सात्त्विकादीनां वा रत्यादयो भावाः । नन्वेवं हर्षादावतिव्याप्तिरिति चेत्, न । तस्य सजातीयविजातीयैस्त्रासादिभिरभिभाव्यत्वात् ।

तद्भेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चाष्टौ स्थायिनो नवमः शमः ॥५॥
अभिव्यञ्जकवैकल्यादसम्पूर्णा रसा अमी ।

अमी रत्यादयः । अभिव्यञ्जका विभावानुभावव्यभिचारिणः प्रागुक्ताः । क्रमेणैषां लक्षणमाह –

मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं रतिः ॥६॥

यथा–

सत्पात्रस्थोऽप्युपचितवपुःस्नेहसम्भारयोगा-
दुद्यन्नेव प्रतिहतमनोदुःखदीर्घान्धकारः ।
दोलाखेलां पिशुनपवनैर्नीयमानः कियन्तं
कालं तिष्ठेत् परिमितदशः सुभ्रुवः प्रेमदीपः ॥७॥

अत्र परिमितदशत्वादपूर्तिः ।

वागादिवैकृतैश्चेतोविकासो हास इष्यते ।

यथा–

बालोऽयं चारुनीलोत्पलमृदुलतनुश्चेत्पतेदस्य हस्ता-
त्तुङ्गो गोवर्धनोऽसौ वयमिह हि तदा चूर्णिताः स्याम सर्वाः ।
इत्थं प्रोद्यद्भयानां व्रजहरिणदृशां मानसाश्वासनाय
प्रोद्यत्किञ्चिदुक्तं चिरमवतु दरस्मेरमास्यं हरेर्वः ॥८॥

अत्र दरशब्दोपादानादपूर्णः ।

इष्टनाशादिभिश्चेतोवैक्लव्यं शोक उच्यते ॥९॥

यथा–

अवलोकयतो धरां विदूरात्
तरणेरुग्रकरावलीविदीर्णाम् ।
जलबिन्दुमिषेण वारिदानां
बत बाष्पस्य कणः समुज्जिहीते ॥१०॥

अत्र कणपदादपरिणतः ।

प्रतिकूलेषु तैक्ष्ण्यस्य विबोधः क्रोध उच्यते ।

यथा—

उत्क्षिप्योच्चैः सकलसलिलान्यम्बुराशेः कराभ्यां
सेनामेनां गमनसरणिं दर्शयन्नेत्य लङ्काम् ।
किञ्चिद्बद्धभ्रुकुटिकुटिलो राक्षसाधीशवक्षः
सोऽहं हेलाविजितपविना मुष्टिना स्फोटयामि ॥११॥

अत्र किञ्चिद्बद्धभ्रुकुटीति विशेषणादपूर्णः ।

कार्यारम्भेषु संरम्भः स्थेयानुत्साह इष्यते ॥१२॥

युद्धवीरोत्साहो यथा—

पुत्रभ्रातृसुहृद्गणैः सह समायान्तं रणे रावणं
कोषोत्पाटितचन्द्रहासरुचिभिर्विध्वंसयन्तं तमः ।
तं दृष्ट्वा पुलकोच्चयाञ्चिततनुः किञ्चिद्घृणाघूर्णिता-
मानन्दाश्रुपरिप्लुतां रघुपतिश्चिक्षेप चापे दृशम् ॥१३॥

अत्र किञ्चिद्घृणाघूर्णितामिति विशेषणादपूर्णः ।

दानवीरोत्साहो यथा—

सप्तद्वीपवती त्वया भगवता दत्ता धरित्री पुनः
सप्ताधो भुवनानि देहि सपदीत्याकर्ण्य विप्रोदितम् ।
मीमांसातिवशीकृतेन मनसा हस्तेन जग्राह तत्-
सङ्कल्पाय दृशोः प्रमोदसलिलं देवो भृगूणां पतिः ॥१४॥

अत्र मीमांसोपन्यासादपरिपूर्णः ।

दयावीरोत्साहो यथा—

दारिद्र्यदर्शनपयःप्रतिवर्धिताया
दीनं दृशा कलयतो भृगुनन्दनस्य ।
स्नेहस्मितद्युतिमिषेण कृपालुतायाः
प्रादुर्बभूव कुसुमस्तबकप्ररोहः ॥१५॥

अत्र प्ररोहशब्दादपूर्णः ।

भयं चित्तस्य वैक्लव्यं रौद्रादिजनितं विदुः ।

रौद्रः सिंहादिः यथा —

करी शोणे समुद्वीक्ष्य कण्ठीरवशिशोर्दृशौ ।
स्वल्पशुष्यन्मदश्चक्रे पलायितुमुपक्रमम् ॥१६॥

अत्र स्वल्पपदादपरिणतम् ।

जुगुप्सा गर्हितार्थानां दोषसन्दर्शनादिजा ॥१७॥

यथा—

सन्ध्यापयोदपललं समुदीक्ष्य दूरात्
तारास्थिखण्डपटलं च नभो विकीर्णम् ।
गर्हायुता इव हरिद्वनिताः पिधातुं
प्रारेभिरे निजमुखानि तमोऽञ्चकेन ॥१८॥

अत्र इवपदादसम्पूर्णः ।

विस्मयश्चित्तविस्तारः पदार्थातिशयादिभिः ।

यथा—

वीर्योद्रेकैस्त्रिभुवनमिदं शक्यते यैर्विजेतुं
तेषां राज्याद् वननिवसतिं पाण्डवानां निरीक्ष्य ।
आसीच्चित्रार्पित इव गुरुर्द्रोणमुख्यो न तादृग्-
जातो भीष्मः श्रुतिगतहरिश्चन्द्रभूभृच्चरित्रः ॥१९॥

अत्र न तादृक्पदादपूर्णः ।

शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम् ॥२०॥

यथा—

ध्यायंस्तेजः परं हेम्नि मृत्खण्डे समदर्शनः ।
निर्विण्ण इव लोकेषु नयामि समयं कदा ॥२१॥

अत्र निर्विण्ण इति पदादपरिपूर्णः ।

शृङ्गारादौ चमत्कारदर्शनादनुमीयते । किं तदित्याह—

मनोविकारो मुख्योऽस्ति यत्र तत्राद्भुतो रसः ।
यत्रामुख्यः पुनस्तत्र शृङ्गाराख्यो रसो भवेत् ॥२२॥

मुख्यो यथा—

अपूर्णोऽयं राकारमणरुचिराकारविजयी
विधुः स्वाङ्के रङ्गी नटयति कुरङ्गीयुगमिदम् ।
धुनोत्याहो पाशं प्रचलमधुपाशङ्कनकरं
न जानीमो मायामतनुरयमायाति कियतीम् ॥२३॥

अत्र विस्मयस्य प्राधान्यादद्भुतोऽङ्गी, शृङ्गारोऽङ्गम् ।

अमुख्यो यथा—

नटयति नयनं वरोरु ! चेतो
हरति परं मम कोऽपि खञ्जरीटः ।
वदनमभिमुखीकरोमि बाले !
कलयति कोऽपि कुतूहलं कलावान् ॥२४॥

अत्र शृङ्गाराङ्गमद्भुतो गौणः ।

इति श्रीमहाराजाधिराजश्रीकर्णसिंहकारिते मैथिलश्रीगङ्गानन्दकविराजविरचिते कर्णभूषणे स्थायिभावनिरूपणो नाम चतुर्थः परिच्छेदः ।

पञ्चमः परिच्छेदः

अथ रसो निरूप्यते ।

विभावेनानुभावेन तथैव व्यभिचारिणा ।
अभिव्यक्तीकृतस्थायी रस इत्यभिधीयते ॥१॥

लोके ये कारणकार्यसहकारिणोऽभिधीयन्ते त एव विभावानुभावव्यभिचारण-रूपव्यापारवन्तः काव्ये नाट्ये चालौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्या भवन्ति, तैरभिव्यक्तीकृतो रत्यादिः स्थायिभावो रस इति संज्ञां लभते इत्यर्थः ।

ननु किंनिष्ठो रस इत्याह–

साधारण्याद् विभावाद्यैः प्रतीतैः सभ्यचेतसि ।
अभिव्यक्तो दधिन्यायात् स्थायी रत्यादिको रसः ॥२॥

साधारण्यात् प्रतीतैः प्रतीयमानैः सभ्यचेतसि सभ्यात्मनि दधिन्यायात् यथा दुग्धमेवाम्लसंयोगेन दधिसंज्ञां भजते तथा विभावादिसंयोगेन स्थायी रत्यादिरेव रस-पदाभिधेयतां लभते । अयमर्थः –विभावादिज्ञानदशायां रत्यादेः स्थौल्यमाविर्भावो रसपदव्यवहार्यत्वात् । विभावाद्यज्ञानदशायां सौक्ष्म्यं तिरोभावः ।

स्थायिपदव्यपदेश्यत्वाच्च साधारण्यमाह–

स्वीयत्वपरकीयत्वतटस्थीयत्वबुद्धयः ।
यदा तेषु न जायन्ते साधारण्यं तदा मतम् ॥३॥

तेषु विभावादिषु । अयमर्थः –एते विभावादयो मदीया एव न मदीया एव, परकीया एव न परकीया एव, तटस्थीया एव न तटस्थीया एवेति नियतसम्बन्धा-परिचयात्साधारण्यम् ।

काव्याभिनयरूपाणामुपायानां स्वभावतः ।
साधारण्यं विभावादेरसाधारणतावतः ॥४॥

साधारण्ये त्वनुभवः प्रमाणं सभ्यचेतसि ।
अलौकिकविभावादिशब्दवाच्या अतोऽप्यमी ॥५॥

रत्यादिना विभावादिसाधारण्यधियः क्षणे ।
सभ्यमात्रात्मनिष्ठत्वाभावात्साधारणेन च ॥६॥
स्वगोचरीकृतो ब्रह्मास्वादसौख्यसहोदरः ।
अलौकिकचमत्कारः स्वप्रकाशसुखात्मकः ॥७॥
प्रपानकरसन्यायाच्चर्व्यमाणो रसो मतः ।
विविच्य ग्रहणं यस्माद्विभावादेर्न जायते ॥८॥
अलक्ष्यक्रमव्यङ्ग्यत्वमत एव रसे मतम् ।
रसोऽतः पानकरसं दृष्टान्तीकृत्य साधितः ॥९॥
पानके तु मरीचादेर्न विशिष्य ग्रहो भवेत् ।
तथैवात्र विभावादेर्न विशिष्य ग्रहक्रमः ॥१०॥
अजन्यता रसे प्रोक्ता यदि स्याज्जन्यता पुनः ।
निमित्तस्य विभावादेस्तदा नाशादनाशिता ॥११॥
निमित्तदण्डनाशेन घटनाशो न हि क्वचित् ।
विभावादिपरामर्शात्प्रागसिद्धो रसो यतः ॥१२॥
अनुमातुं न शक्योऽस्ति तस्मान्न ज्ञाप्यता रसे ।
पूर्वसिद्धो व्याप्तिबलाद् वह्न्यादिर्ह्यनुमीयते ॥१३॥
व्यञ्जितस्तु विभावाद्यैश्चर्वणीयो भवेद्रसः ।
अलौकिकविभावाद्यैर्व्यञ्जितस्य रसस्य यत् ॥१४॥
अलौकिकत्वमाहुस्तद् भूषणं न तु दूषणम् ।
यच्चर्वणविनिष्पत्त्या निष्पत्तिरुपचर्यते ॥१५॥
तस्माद्रसस्य कार्यत्वमुपचारेण कथ्यताम् ।
स्वसंवेदनवेद्यत्वाद् रसो ज्ञेयोऽपि कथ्यताम् ॥१६॥
वै शिष्ट्यभाननियमाद्विभावप्रभृतेरिह ।
रसज्ञाने च तज्ज्ञानं तस्मान्नो निर्विकल्पकम् ॥१७॥

स्वसंवेद्यत्वान्न तज्ज्ञानं स्वभिन्नसविकल्पकम् ।
उभयाभावरूपत्वमुभयात्मत्वमस्य च ॥१८॥

लोकोत्तरचमत्कारकारित्वान्न विरोधिता ।
निर्विकल्पकता तस्य स्थायित्वसमये भवेत् ।
सविकल्पकता तस्य रसत्वसमये पुनः ॥१९॥

अतो विरोधो नैवास्योभयाभावोभयात्मनः ।
केचिदाहुर्नटे पक्षे रामत्वारोपयोगिनि ॥२०॥

रसस्यानुमितिर्हेतुविभावाद्यैः सभासदाम् ।
तेषां मते भवेद् दोषः स पुनः श्रूयतां यथा ॥२१॥

रसस्यानुमितर्नास्ति चमत्कारः सभासदाम् ।
चन्दनानुमितिर्नैव कस्याप्याह्लादकारिणी ॥२२॥

कश्चिन्नटगतो नैव नानुकार्यगतो रसः ।
किन्तु काव्ये तथा नाट्ये भावकत्वाभिधेन च ॥२३॥

व्यापारेण विभावादिसाधारण्यं प्रकुर्वताम् ।
साधारणीकृतः स्थायिभावः सामाजिकात्मनि ॥२४॥

सत्त्वोद्रेकचिदानन्दविश्रान्तिसदृशेन च ।
भोगेन सचमत्कारमनुभूयत ऊचिरे ॥२५॥

एतन्मते भवेद् दोषो व्यापारद्वयकल्पनम् ।
मिलितैस्तु विभावाद्यै रसोपस्थितिरिष्यते ॥२६॥

एकैकस्मिन् विभावादौ तदन्यद्वययोः सति ।
आक्षेपेण रसोद्बोधो मिलितैस्तैरिति स्थितिः ॥२७॥

असाधारण एकोऽपि विभावादिर्भवेद् यदि ।
रसस्तदा न चाक्षेपः कष्टकल्पनदोषतः ॥२८॥

साधारणो विभावादिर्यत्रैको द्वितयोऽथ वा ।
सन्निबद्धो भवेत्तत्र विरोधान्न रसस्थितिः ॥२९॥
आक्षेपापेक्षणं तत्र विरोधस्य विनाशकम् ।
भवेदेव रसोद्बोध इति कैश्चिन्निगद्यते ॥३०॥

ननु करुणभयानकबीभत्सानां दुःखमयत्वाद्रसत्वं न स्यादिति चेन्न, काव्योपनिबद्धानां तेषां सुखमयत्वात् । यदि च तेषां दुःखमयत्वं स्यात्तदा तदुपस्थापके काव्यादौ न कोऽपि प्रवर्तेत, सचेतसां दुःखहेतौ प्रवृत्त्यभावदर्शनात् ।

यद्यपि दुःखहेतवो रामवनवासादयो न सुखोत्पादका भवितुमर्हन्ति तथापि लौकिकास्ते लौकिकदुःखहेतवो भवन्ति । काव्ये नाट्ये पुनरलौकिकविभावादिशब्दवाच्यतां लभमानास्त एवालौकिकरसनिष्पादका भवन्तीत्यविरुद्धम् ।

किञ्च तेषामलौकिकत्वमिदमेव यद् दुःखकारणत्वेन प्रसिद्धानां काव्यादौ सुखोत्पादकता भवति । अन्यच्च दुःखहेतुभ्यो दुःखं सुखहेतुभ्यश्च सुखं जायत इति व्यवस्थितिर्लोक एव, न तु काव्यादाविति संक्षेपः ।

सामान्यतो रसे ज्ञाते तद्विशेषजिज्ञासायां शृङ्गारादय एव विशेषा निरूप्या भवन्ति । अतस्त एव क्रमेण निरूप्यन्ते—

शृङ्गं हि मन्मथोद्भेदस्तस्यागमनहेतुकः ।
उत्तमप्रकृतिः प्रायो रसः शृङ्गार उच्यते ॥३१॥
स्थायिभावो रतिर्यस्य स वा शृङ्गार उच्यते ।
वर्णः श्यामो भवेदस्य दैवतं विष्णुरुच्यते ॥३२॥
स्वकीया कन्यका वास्य नायिकालम्बनं मतम् ।
नायको दक्षिणादिस्तु तदालम्बनमिष्यते ॥३३॥

यदि कन्यका शृङ्गाररसालम्बनं न स्यात्तदा सकलजनसिद्धस्य मालत्यादिरतिशृङ्गारस्याभासतापत्तेः । परोढायाः शृङ्गाररसस्यानालम्बनत्वे युक्तिं वक्ष्यामः ।

सम्भोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ।

दर्शनस्पर्शनालापचुम्बनादिक्रियोद्भवम् ।

अन्योन्यं यत्सुखं यूनोः सम्भोगः स समीरितः ॥३४॥

यद्यपि चुम्बनालिङ्गनादिक्रियाणामानन्त्येन सम्भोगस्य बहवो भेदाः भवितुमर्हन्ति, तथापि तत्संख्यां कर्तुमशक्यतया सम्भोगत्वमेकमुपाधिमादाय एक एव सम्भोगो गण्यते। स चादौ नारीगतो वर्णितः सन्नधिकहृदयङ्गमो भवति। तदुक्तम्–

'पूर्वं नारी भवेद्रक्ता पुमान् पश्चात्तदिङ्गितैः।' इति।

इङ्गितानि प्रागुक्तानि। स पुनः प्रथमं पुरुषगतो वर्ण्यते चेत्तदा दोषो न भवति किन्त्वस्य तादृशहृदयङ्गमत्वे संशयः।

यथा रासक्रीडायाम्–

लपन्ती मृदुस्मेरवक्त्राभिरामा
क्षिपन्ती दृशौ दिक्षु लोले सकामा।
व्रजन्ती समीपं हरिं गोपकन्या
पुरस्तात् समुल्लासयामास धन्या ॥३५॥

अत्र गोपकन्या आलम्बनम्। प्रकरणप्राप्तश्चन्द्र उद्दीपनम्। स्मेरेत्यादिना स्मितमनुभावः। दिक्प्रेक्षणादिना व्यञ्जिता शङ्का व्यभिचारी। एतैरभिव्यक्तः सामाजिकरतिभावः शृङ्गाररसरूपतां भजते। विप्रलम्भं विना न सम्भोगः पुष्टिमाप्नोति। तदुक्तम्–

'न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।
काषायिते च वस्त्रादौ भूयान् रागोऽनुषज्जते ॥३६॥' इति।

यथा–

कृष्णः कयापि सह संविलसन्निकामं
तन्मानकालमवगम्य तिरोबभूव।
मत्वाथ तां स गलदश्रु विनिश्वसन्ती-
माविर्भवन् पुरत एव पुनश्चुचुम्ब ॥३७॥

पुष्टिः पुनरस्य रासक्रीडायां प्रागुदाहृतायां द्रष्टव्या ।

भावो यत्र रतिर्नाम प्रकर्षमधिगच्छति ।
नाधिगच्छति वाभीष्टं विप्रलम्भः स उच्यते ॥३८॥

प्रकर्षोऽत्र विभावादिसम्बन्धः ।

विप्रलम्भो बुधैः पञ्चप्रकाराः समुदीरिताः ।
आद्योऽभिलाषहेतुः स्यादन्यो विरहहेतुकः ॥३९॥
तृतीयः शापहेतुः स्यादीर्ष्याहेतुश्चतुर्थकः ।
प्रवासहेतुकः प्रोक्तः पञ्चमः शास्त्रवेदिभिः ॥४०॥

क्रमेणयथा—

भूयादत्र सखे ! स कोऽपि समयो यत्रारविन्देक्षणां
मज्जीवातुमिवेन्दुबन्धुवदनामालोकयेयं प्रियाम् ।
यस्याः क्रूरकटाक्षबाणनिवहैर्विद्धोऽधुनाहं पुन-
र्दीर्घश्वासशरीरतापसुलभां मूर्च्छां लभेऽनुक्षणम् ॥४१॥

अत्राभिलाषहेतुकः ।

किं कस्मिन्नपि यौवने पथि रतो नैतद्विचारक्षमं
यत्सक्तं मयि तस्य मानसमहो कस्मादसौ नागतः ।
इत्थ चन्द्रमुखी विचिन्त्य दयितोदन्तं सबाष्पेक्षणा
दीर्घश्वाससमीरशुष्यदधरा दैवज्ञकं पृच्छति ॥४२॥

अत्र विरहेणोत्कण्ठिताया विरहहेतुकः ।

नेत्रे संयोजिते पाण्डौ मद्रराजतनूजया ।
तद्गतः पाण्डुतां धत्ते शापपापमवाप्नुहि ॥४३॥

अत्र माद्र्याः पाण्डोर्दर्शनं जायते । परन्तु शापत्रासात् स्पर्शनादिरूपसम्भोगो न भवतीति शापहेतुको विप्रलम्भः ।

चेन्नम्रीकुरुषे मुखं कुरु तदा किञ्चिन्न च ब्रूमहे
सोऽयं ते कठिने हनिष्यति हठं प्राप्तप्रसादो विधुः ।
मौनं चेद् भजसे तदा भज पुनर्लब्धावकाशा स्वयं
वाणीभिर्विवशां करिष्यति सखि ! त्वामद्य सद्यः पिकी ॥४४॥

अत्रेर्ष्याहेतुकः ।

प्रवासो भिन्नदेशत्वमुक्तं तरुणयोर्बुधैः ।
भवन् भावी च भूतश्च प्रवासस्त्रिविधो मतः ॥४५॥

भवन् यथा—

प्रस्थानहेतोर्भवतो विशुद्धा
यात्राधुना ते न बभूव धीरः ।
यदेष धारानिकरेण वारा-
मकालवर्षी नयनाम्बुदोऽस्याः ॥४६॥

भावी यथा—

गच्छामीति प्रिय ! ब्रूहि मा यामीति कदाचन ।
स्मरणोपस्थिता यामी यातना बाधते ध्रुवम् ॥४७॥

भूतो यथा—

स्वैरं स्वैरं गमनपदवीमागते शीतभानौ
दूरादेव क्षितिधरदरीमभ्यगादन्धकारः ।
तापस्तावन्निखिलजगतां वर्तुलीभूय भूयः
शङ्के पङ्केरुहदलदृशो मानसे निर्विवेश ॥४८॥

यथा वा—

सुधांशुः सन्तापी न खलु ममता पीतवसने
शरैः कामो हन्ता प्रतिपलमहं तावदबला ।

शरत्सेयं जाता विकचजलजातालिविषमा
ममानर्थापातादिह जगति पाता भवतु कः ॥४९॥

एषु प्रवासहेतुकः ।

प्रवासे तनुवस्त्राणां मालिन्यं तनुता तथा ।
एकवेणीधरं मस्तं निश्वासरुदिते तथा ॥५०॥
उच्छ्वासो भूमिपतनं तथा कम्पादि जायते ।
अरुचिर्वस्तुवैराग्यं तापस्तु विरहज्वरः ॥५१॥
असौष्ठवमनायत्रिः (?) सर्वत्रारागिता धृतिः ।
शून्यता मानसस्य स्यादनालम्बनतापि च ।
तन्मयत्वं तत्प्रकाशो बाह्याभ्यन्तरतस्तथा ॥५२॥

अन्यच्च—

असौष्ठवं तनौ तापः पाण्डुता कृशतारुचिः ।
अनालम्बत्वमधृतिस्तन्मयोन्माद एव च ॥५३॥
मूर्च्छना च मृतिश्चैव दश स्मरदशा इह ।
पूर्वरागात्मको मानः प्रवासकरुणात्मकः ।
विप्रलम्भरसः कैश्चिच्चतुर्धा परिकीर्तितः ॥५४॥

तत्र—

दर्शनश्रवणाभ्यां यो यूनोरुत्पन्नरागयोः ।
दशाविशेषोऽप्राप्तौ स पूर्वरागः समीरितः ॥५५॥
स्वप्नेन्द्रजालचित्रेषु प्रोक्तं साक्षाच्च दर्शनम् ।
वयस्यावन्दिदूतादिमुखेभ्यः श्रवणं भवेत् ॥५६॥
अभिलाषः स्मृतिश्चिन्ता प्रलापो गुणकीर्तनम् ।
उन्मादो जडता व्याधिरुद्वेगो मृतिरेव च ॥५७॥

इत्यत्र दश कामदशाः । उदाहरणं तु प्रागुक्तम् ।

रसभङ्गभिया नैव मृतिरत्र प्रवर्ण्यते ।
वर्ण्यते जातसदृशी चेतसावगता तथा ॥५८॥

क्रमेण यथा–

आकर्ण्य मत्तमधुपावलिझाङ्कृतानि
कष्टेन जीवमबला बत सा वहन्ती ।
पाटीरकाननसमीरमथानुभूय
किं वा भवेत् प्रियतमेति न निश्चिनोमि ॥५९॥

कामः क्रूरशरैर्निहन्तु सकलं देहं सुधादीधिति-
र्दाहं मे वितनोतु षट्पदरवो निर्मातु कर्णज्वरम् ।
कुर्यान्मन्दतरं वहन्मरुदसौ मर्मव्यथां सर्वथा
प्राणाः पञ्च धराधरातिगुरवो निर्यान्तु निर्यान्तु मे ॥६०॥

अदूरभाविप्रत्युज्जीवनरूपस्तृतीयो भेदो नात्रोदाहृतः,युक्तिं तत्र वक्ष्यामः ।

"नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः ।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ।
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः" ॥६१॥

इति केचिद्वदन्ति ।

'पूर्वं नारी भवेद्रक्ता पुमान् पश्चात् ' इत्यादिना पूर्वरागः प्रथमं स्त्रिया एव वर्णितश्चमत्काराधायक इति प्रायिकम् । सम्भवतः प्रथमं पुरुषानुरागस्य वर्णनेऽपि न कापि क्षतिः, तस्यापि चमत्कारित्वात् । किन्तु विरलप्रचार इति विशेषः ।

त्रिधा कुसुम्भमञ्जिष्ठानीलीरागात् स भिद्यते ।

स पूर्वरागस्त्रिविधो भवति–कुसुम्भरागः, मञ्जिष्ठारागः नीलीरागश्चेति ।

कुसुम्भरागः स प्रोक्तः शोभते यश्च नश्यति ॥६२॥
मञ्जिष्ठाराग उक्तः स यो नापैत्यतिशोभते ।
नीलीरागोऽचलो व्यूढः सुशोभो रामसीतयोः ॥६३॥

अथ मानः—

मानः कोपः । स च द्विविधः, ईर्ष्यामानः प्रणयमानश्चेति भेदात् ।

भर्तुरन्यप्रियासङ्गो दृश्यतेऽथानुमीयते ।
श्रूयते वा यदा स्त्रीणामीर्ष्यामानस्तदा भवेत् ॥६४॥

भर्तुरन्याबलासङ्गानुमितिः स्त्रीणां तदुत्स्वप्नायितगोत्रस्खलनभोगचिह्नैर्हेतुभिर्भवतीति ।

उपाया मानभङ्गाय षडेव परिकीर्तिताः ।
साम भेदश्च दानञ्च नत्युपेक्षे रसान्तरम् ॥६५॥

साम प्रियवचो भेदः सख्योपार्जनमुच्यते ।
भूषादेर्व्याजतो दानं पतनं पादयोनतिः ॥६६॥
परिक्षीणे तु समादौ स्यादुपेक्षावधीरणम् ।
त्रासकौतुकहर्षादेरीर्ष्यानाशो रसान्तरम् ॥६७॥

एषामुदाहरणमूह्यम् ।

कौटिल्यगामिना प्रेम्णा कोपो यस्मादहेतुकः ।
यूनोः प्रणयमानः स प्रोक्तः सानन्दयोरपि ॥६८॥

स च त्रिविधः, नायकगतः नायिकागतः तदुभयगतश्चेति । दिङ्मात्रमुदाह्रियते । यथा—

स्थितयोर्विमुखीभूय यूनोर्नतमुखाब्जयोः ।
अन्योन्यं वक्रितग्रीवं पश्यतोः कुपितं कुतः ॥६९॥

एष उभयगतः । अस्य भेदस्यानुनयपर्यन्तासहत्वान्न विप्रलम्भत्वम्, किन्तु सम्भोगव्यभिचारीर्ष्याभावत्वम् ।

यथा—

विनिवारितापि दृष्टिस्तत्र जने सखि ! पुनः पतति ।

वक्रोक्तिवचनसमये भवति पुनर्वाच्यविस्मरणम् ॥७०॥

अथ प्रवासः । स तु प्रागुक्त एव ।

अथ करुणविप्रलम्भाख्यः ।

एकतरस्मिन् यूनोर्निर्गतजीवे पुनर्लभ्ये ।

अथवेतरतनुलभ्ये भवेत्करुणविप्रलम्भाख्यः ॥७१॥

उदाहरणं तु कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्तः । तत्र प्रथमं करुण एवाकाशवाणीश्रवणसमनन्तरमेव सङ्गमप्रत्याशायां रतेरुद्भवात् करुणाख्यविप्रलम्भ-शृङ्गारः । न चायं प्रवासात्मको भेदः, सङ्गमप्रत्याशानन्तरमेव भवतो विप्रलम्भ-शृङ्गारस्य तत्त्वादिति वाच्यम् । जीवतोर्यूनोरेव प्रवासो न त्वेकतरस्मिन्मृते मरणरूपविच्छित्तिविशेषात्तद्भिन्न एवायमिति । अत्र विचार्यते––पूर्वरागात्मकस्या-भिलाषहेतुके विप्रलम्भे मानात्मकस्येर्ष्याहेतुके विप्रलम्भेऽन्तर्भावः । महाश्वेता-पुण्डरीकवृत्तान्तस्तु शुद्धकरुणरसविषयो न तु विप्रलम्भशृङ्गारविषयः । रतेस्तु करुणव्यभिचारित्वेनोद्भासनात्, न तु विप्रलम्भस्थायित्वेन । अन्यथा––

'सतीव योषित्प्रकृतिश्च निश्चला पुमांसमभ्येति भवान्तरेष्वपि'

इति निश्चयवत्याः सत्याः पत्यौ मृते विलापस्य विप्रलम्भशृङ्गारत्वापत्तिः । तत्रापि शरीरान्तरलभ्यत्वनिश्चयोऽस्तीति संक्षेपः ।

हास्यो हासस्थायिभावः शुक्लः प्रमथदैवतः ।

ईषद्धसितं हसितं विहसितमपरं तथान्यदवहसितम् ।

अपहसित पुनरतिशयहसितं हास्यस्य षड्भेदाः ॥७२॥

ईषद्धसितं हसितं भवति मुखे शिष्टलोकस्य ।

मध्यमवदने विहसितमवहसितं चापि सम्भवतः ॥७३॥

अपहसित पुनरतिशयहसितं नीचानने भवति ।

स्वनिष्ठपरनिष्ठत्वभेदाद्भेदा अमी द्विधा तेन ॥७४॥

तेन द्वादशभेदोऽयं रसो हास्यः समीरितः ॥७५॥

ईषद्धसितं स्वनिष्ठपरनिष्ठं चेत्यादिक्रमेण गणितो द्वादशभेदो हास्यः ।

अव्यक्तदशनं किञ्चिद्विकस्वरकपोलकम् ।
यत्किञ्चित्कुञ्चितापाङ्गमीषद्धसितमुच्यते ॥७६॥
ईषत्संलक्ष्यदशनमुत्फुल्लवदनाम्बुजम् ।
प्रविकासि कपोलं च हसितं गदितं बुधैः ॥७७॥
कुञ्चिताम्यं विहसितं मञ्जुस्वानं विदुर्बुधाः ।
अवहसित कुटिलाक्षं स्फुटितस्वनकुञ्चितमीत्रम् ।
उद्धतमुद्गतबाष्पं स्फुटतरनिस्वानमपहसितम् ॥७८॥
अत्युद्धतमतिबाष्पं स्फुटतरनिःस्वानमतिहसितम् ।

स्वनिष्ठमीषद्धसितं यथा—

मुक्ताधिया पुटकिनीगतवारिबिन्दु-
माहर्तुमीरितकरः प्रथमं बभूव ।
पश्चाद् विलोक्य सरसं शयमम्बुयोगा-
दीषज्जहास सुजनो विकसत्कपोलः ॥७९॥

स्वनिष्ठं परनिष्ठं चेषद्धसितं यथा—

कृष्णानुकारं विरचय्य राधा
विधाय राधानुकृतिं मुकुन्दः ।
उभौ व्रजन्तौ पथि दृष्टवन्ता-
वन्योन्यमव्यक्तरदं हसेते ॥८०॥

परनिष्ठं हसितं यथा—

मध्येऽह्नि मेघपिहिताहिमधाम्नि भुक्त्वा
सुप्तोत्थितं द्विजवरं करनीतदर्भम् ।

सन्ध्याक्रमेण तदुपासनमाचरन्तं
दृष्ट्वा जहास विकसद्दशनालिधीरः ॥८१॥

परनिष्ठं विहसितं यथा—

आदौ सुतोपनयनं विरचय्य पश्चा-
न्नक्षत्रराशिगुरुभास्करशुद्धिवार्ताम् ।
ज्योतिर्विदं द्विजवरः परिपृच्छ्यमानो (?)
विद्यावता विहसितो मधुरस्वनाद्यम् (?) ॥८२॥

एवमन्यदप्यूहनीयम् ।

यमदैवतस्तु करुणः शोकस्थायी कपोतवर्णः स्यात् ॥८३॥

यथा—

शक्त्या विद्धं समिति पतितं लक्ष्मण ! त्वां समीक्ष्य
व्यातन्वानः स्तनितनिकरच्छद्मनाक्रन्दमुच्चैः ।
विद्युद्व्याजादयमपि घनः पश्य सन्तापवह्निं
बिभ्रद्बाष्पं त्यजति नितरां वारिधाराच्छलेन ॥८४॥

रक्तः क्रोधः स्थायिभावो रौद्रो रुद्राधिदैवतः ॥८५॥

यथा—

उत्क्षिप्योच्चैः सकलसलिलान्यम्बुराशेः कराभ्यां
सेनामेनां गमनसरणिं दर्शयन्नेत्य लङ्काम् ।
गाढं बद्धभृकुटिकुटिलो राक्षसाधीशवक्षः
सोऽहं हेलाविजितपविना मुष्टिना स्फोटयामि ॥८६॥

रौद्रस्य भेदिका युद्धवीरादीक्षणरक्तता ।
उत्साहस्थायिभावस्तु स्वर्णाभः शक्रदैवतः ॥८७॥
उत्तमप्रकृतिर्वीररसो निगदितो बुधैः ।
युद्धदानदयाभेदात् त्रिविधो वीर ईरितः ॥८८॥

युद्धवीरो यथा—

पुत्रभ्रातृसुहृद्गणैः सह समायातं रणे रावणं
कोषोत्पाटितचन्द्रहासरुचिभिर्विध्वंसयन्तं तमः ।
तं दृष्ट्वा पुलकोच्चयाञ्चिततनुः सद्यः प्रमोदोद्भव-
द्बाष्पौघेन परिप्लुतां रघुपतिश्चिक्षेप चापे दृशम् ॥८९॥

दानवीरो यथा—

पश्यन् वामनरूपिणं क्षितिसुरं वैरोचनिः कौतुक-
व्यग्रान्तःकरणो न तस्य सहसा सस्मार सम्भाषणम् ।
मह्यं देहि पदप्रमाणधरणीमित्युक्तिकर्त्रे पुन-
स्तस्मै लोचनयोः प्रमोदसलिलव्याजेन सोऽर्द्धं ददौ ॥९०॥

दयावीरो यथा—

कण्ठान्तिकं यावदुपैति कृष्ण-
नामार्तिभाजः करटीश्वरस्य ।
तावन्महाकोमलमानसस्तं
ग्राहाननान्मोचयति स्म कृष्णः ॥९१॥

उत्साहस्थायिभावत्वाद्भिन्नोऽयं करुणाद्रसः ।
अयं दयावीरः करुणे शोकः स्थायिभाव इति भावः ।
कालाधिदैवतः स्थायिभावभीतिर्भयानकः ॥९२॥
नारीनीचप्रकृतिकः कृष्णवर्णः स चेरितः ।

यथा—

करी शोणे समुद्वीक्ष्य कण्ठीरवशिशोर्दृशौ ।
परिशुष्यन्मदश्चक्रे पलायितुमुपक्रमम् ॥९३॥

नीलीवर्णो महाकालो दैवतं यस्य भण्यते ॥९४॥
जुगुप्सास्थायिभावस्तु स बीभत्सरसः स्मृतः ।

यथा—

सन्ध्यापयोदपललं समुदीक्ष्य दूरा-
त्तारास्थिखण्डपटलं च नभो विकीर्णम् ।
जानीमहे निखिलदिग्वनिताः पिधातुं
प्रारेभिरे निजमुखानि तमोंऽशुकेन ॥९५॥

विस्मयस्थायिभावो यो दैवतं यस्य मन्मथः ॥९६॥
यस्य पीतो भवेद्वर्णः कथितः सोऽद्भुतो रसः ।

यथा—

दंष्ट्राकोटिप्रविष्टक्षितिधरणिधरव्यूहनिष्पातलोक-
व्यक्तव्यालोपशङ्कानिवृततरपरित्यक्तनिश्वासवातः ।
बालाग्राविद्धतारागणजनितलसन्मौक्तिकश्रेणिबुद्धि-
र्दुष्टद्रोहव्रती वः कलयतु कुशलं कोऽपि कोलावतारः॥९७॥

शान्तः शमस्थायिभावः कुन्देन्दुधवलद्युतिः ॥९८॥
उत्तमप्रकृतिः प्रोक्तः श्रीनारायणदैवतः ।

यथा—

मुरारे कंसारे भवजलधितारे हिततर[1]
हरे शौरे लक्ष्मीरमण रघुवीरेति जपतः ।
समीकृत्य प्रेक्षां जगति सकले संकलयतः
कदा गोदातीरे कथय मम यास्यन्ति दिवसाः ॥९९॥

अथ स्थायिभावदृष्टयः—

स्निग्धा हृष्टा तथा दीना क्रुद्धा दीप्ता भयातुरा ॥१००॥
जुगुप्सिता विस्मिता च शान्ता च नव दृष्टयः ।
शून्या च मलिना श्रान्ता लज्जिता शङ्किता तथा ॥१०१॥

1. The printed text reads 'हिततरे'

मुकुला चार्धमुकुला ग्लाना जिह्मा च कुञ्चिता ।
क्रुद्धा वितर्किता च स्यादभितप्ता तथैव च ॥१०२॥
विषण्णा च भवेदन्या ललिता केकरा तथा ।
विकोषा विच्युता त्रस्ता मदिरा चेति विंशतिः ॥१०३॥

अथ रसदृष्टयः–

कान्ता हास्या च करुणा रौद्री वीरा भयानका ।
बीभत्सा चाद्भुता शान्ता नव स्यू रसदृष्टयः ॥१०४॥
अर्धप्रकाशिता सुप्ता घूर्णिता कूणितालसा ।
विवर्तिता विकसिता वर्तिता चार्धनर्तिता ।
पर्यस्ता स्तिमिता चैव शून्येत्याद्यास्तु दृष्टयः ॥१०५॥

अर्धनर्तिता यथा–

कान्ते किञ्चिदुदञ्चयाक्षियुगलं कञ्जायतं जायतां
खेलत्खञ्जनचण्डताण्डवसमारम्भैर्नभो मण्डितम् ।
दूरादुन्नमयाननेन्दुमवनीभूषायिते भ्रूलते
भूयांल्लोकपथावलोकदमनं विष्वग्विदीर्णं तमः ॥१०६॥

अन्या अप्येवमुदाहरणीयाः ।

अथ रसाभासः—

एकस्या एव कामिन्या अनेकपुरुषे रतिः ।
रसाभासः स्मृतो धीरैरनौचित्यप्रवर्तितः ॥१०७॥

परस्त्रीविषयतया श्रोतृणामधर्मपरिणामेन वैरस्याधायकत्वमत्रानौचित्यम् ।

यथा–

स्नातं केन सितासिते भवति ते तापस्तनौ यं विना
दृष्टः कस्य महेश्वरो विधुमुखि ! द्रष्टुं यमाकाङ्क्षसि ।

तीव्रं तेन कृतं तपस्तव मनो यच्चिन्तया न स्थिरं
पादौ केन निषेवितौ यदुपतेर्यत्तु त्वमालिङ्गसि ॥१०८॥

अत्रानेकक्रियोपादानेनानेकविषया रतिः प्रतीयते ।

यद्यपि परकीयाया न रसाभासः स्वीयायामिव तद्वर्णनं निर्विगानं महाकविभिः क्रियते तच्चमत्कारोऽपि तादृश एव । तथापि ममैवेयमहमस्या एवेति स्नेहाख्या रतिः, सा च परकीयायामाभासस्वरूपैव भ्रमत्वात् ।

चमत्कारस्तु रसाभासादपि जायते । अन्यथा परकीयावर्णने न कोऽपि प्रवर्तेत । एवमेव वक्ष्यमाणभावाभासस्य समाधिर्बोद्धव्यः ।

यत्राङ्गाङ्गिभावापन्नौ रसौ तत्र रससङ्करः । तमाह—

यथा—

विधाय दिव्यं निजरूपमुच्चै-
विनिक्षिपन्ती नयने सलीलम् ।
पुरोगतां शूर्पणखां विलोक्य
जहास धीरध्वनिरामभद्रः ॥१०९॥

अत्र हास्यस्याङ्गं शृङ्गारः ।

व्याप्तां विलोक्य मधुकैटभदानवेन्द्र-
मेदःप्रवाहपटलैर्धरणीं समस्ताम् ।
वैमानिकाः पुलकपुञ्जपरीतगात्रा
नेत्रप्रकाशसहिताः स्थगिता बभूवुः ॥११०॥

अत्राद्भुतस्य बीभत्सोऽङ्गम् ।

अरुणनयनभासा भीषणे जामदग्न्ये
कलयति करपद्मे तीक्ष्णधारं कुठारम् ।
वपुरविदितपीडं बालकं वीक्ष्य रामं
दशरथनरपालो निश्वसन्मोहमाप ॥१११॥

अत्र करुणस्य रौद्रोऽङ्गम् ।

कालीरदालिपरिचर्वितरक्तबीज-
देहास्थिखण्डपटलोत्थितशब्दमुच्चैः ।
आकर्ण्य लोचनविनिर्गतवारिधारा
जग्मुः सुरा भगवतः शरणं मुरारेः ॥११२॥

अत्र भयानकस्य बीभत्सोऽङ्गम् ।

अत्र केचिद्रसानां जन्यजनकभावं वदन्ति । तदाह भरत :–

"शृङ्गारात्तु भवेद्धासो रौद्राच्च करुणो रसः ।
[1]वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥"

अयमुत्सर्गः, इतरेषामपि रसानां कार्यकारणभावो बोध्यः । वस्तुतस्तु जन्यजनकभाव इत्यस्यार्थः । पोष्यपोषकभाव इति रसानामजन्यत्वव्यवस्थापनात् । यत्र रसो गौणः स रसवदलङ्कारस्योदाहरणमिदमेव ।

अथ रसानां परस्परविरोधमाह––

तत्र भरतः––

"ज्ञेयौ शृङ्गारबीभत्सौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥"

केचित्तु––

आद्यः करुणबीभत्सरौद्रवीरभयानकैः ।
भयानकेन करुणेनापि हास्यो विरोधभाक् ॥११३॥
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः ।
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि ॥११४॥
भयानकेन शान्तेन तथा वीररसः स्मृतः ।
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ॥११५॥

1 The printed text reads 'बीभत्साद्–'

शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ।

शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ॥११६॥

आद्यः शृङ्गार इत्याहुः । यथा रसानां परस्परविरोधः तथा वैरिरसविभावानुभावव्यभिचारिणामपि रसविरोधो ज्ञेयः ।

अङ्गाङ्गिभावमापन्नावेकदापि न वैरिणौ ।

रसाविति शेषः ।

यथा--

कामेनालिङ्ग्यमानाया रदेन परिखण्डिते ।
अधरे मृगनेत्राया रुधिरं यावकायते ॥११७॥

अत्र शृङ्गारबीभत्सौ न रसहानिकरौ ।

रसयोर्देशभेदेऽपि न विरोधो विरुद्धयोः ॥११८॥

यथा-

एकं सीतामुखे न्यस्तमपरं रक्तसञ्चिते ।
गतासौ रावणे द्वे वः शिवे स्तां रामचक्षुषी ॥११९॥

अत्र शृङ्गारबीभत्सयोर्न विरोधः ।

विरुद्धानां न वैरं स्यात् क्वचित्समयभेदतः ।

यथा—

राधाचक्रमभेदि सा द्रुपदजा लब्धा वने शोच्यवद्-
भ्रान्तं मांसमभोजि चान्नरहितं क्लीबत्वमासादितम् ।
स्वर्गे देहवता गतं विरचितं तीव्रं तपो बिभ्यता
क्रुद्धं धर्मसुताय किं न विहितं पार्थेन कीर्त्यर्थिना ॥१२०॥

अत्र वीरशृङ्गारकरुणबीभत्सहास्याद्भुतशान्तभयानकरौद्राणां न विरोधः । रसशबलतोदाहरणमेतदेव ज्ञेयम् ।

सत्यङ्गयोर्विरोधेऽपि रसहानिर्न दृश्यते ॥१२१॥

यथा—

छद्मद्यूते वीक्ष्य गान्धारभर्तुः
शोच्यावस्था धर्मसूनोर्विदित्वा ।
भीमो बद्धभ्रूविकारोऽरुणाक्षो
हन्तुं सर्वानुद्यतो धार्तराष्ट्रान् ॥१२२॥

अत्र हास्यकरुणयोर्वैरेऽपि रौद्राङ्गत्वेन न रसहानिः ।

वस्तुतस्तु वैरं तत्र यत्र रसयोः समं प्राधान्यम् । यत्र पुनरङ्गत्वेनाङ्गाङ्गत्वेन वा विरोधिनो रसयोर्भानं तत्र तत्र विरोधः । अनौचित्यं तु न वर्णनीयम् ।

उक्तं हि प्राचीनैः —

"अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥" इति ।

बाध्यत्वेनोदितो वैरी सञ्चार्यादिर्न दोषभाक् ।

आदिशब्दादनुभावविभावौ । यथा—

संन्यासो वरमत्र मे विधुमुखी जायेत नेत्रातिथि-
श्चन्द्रं चूर्णय तप्तकाञ्चनलतातुल्यं तदीयं वपुः ।
क्वाहं कुत्र पयोधरः खलवचो दुर्वारमाचक्षते
चाञ्चल्यं त्यज चित्त चञ्चलदृशोऽवस्था भवेत्कीदृशी ॥१२३॥

अत्र निर्वेदौत्सुक्यामर्षस्मृतिवितर्कशङ्काधृतिचिन्तानां वैरायहेतूनामपि बाध्यत्वावगमाच्छृङ्गाराविरोधिनां 'भवेत्कीदृशी'ति चिन्तायामेव विश्रामः ।

मुहुर्मुहुः कम्पमानं कृशं पाण्डु वपुस्तव ।
कथयत्यत्र तत्त्वं गिरोऽङ्ग कश्चिद्भवद्गतम् ॥१२४॥

अत्र रामानुभावानां कम्पकार्श्यादीनां बाध्यत्वेनोपात्तानामनुपात्तानां वा प्रकृतरससाधारण्यान्न रसविघातकता ।

यत्र त्वनुभावस्यासाधारण्यं तत्र बाध्यत्वानवगमे दोषः। यथा–

ममास्ति सर्वथा तन्वि! सर्वत्र समदृष्टिता।
परिहृत्य दृढं मानं प्रयच्छालिङ्गनानि मे॥१२५॥

इत्यादि शान्तानुभावस्य शृङ्गारविरुद्धस्य शृङ्गारे वर्णनमनुचितम्।

सरोजनयनाः सौम्याः सत्यं सौम्यास्तु सम्पदः।
मृणालीलतिकातन्तुनश्वरं किन्तु जीवनम् ॥१२६॥

अत्र जीवनास्थैर्यं शान्तमेव पुष्णातीत्यतो बोध्यत्वेनोक्तः शृङ्गारविभावस्तमेव पुष्णाति। तथा चात्र विरुद्धविभावोपादाने न दोषः।

व्यभिचारी रसान्मुख्यो देवादिविषयोऽपि च ॥१२७॥
रतिर्देवादिविषया भावः प्रोक्तो मनीषिभिः।

सर्वत्र रसभावयोर्नियता स्थितिः। तदुक्तम्–

"न भावहीनोऽस्ति रसो न भावो रसवर्जितः।
परस्परकृता सिद्धिरनयो रसभावयोः।" इति।

रसानुचारी व्यभिचारी यत्र प्राधान्येनाभिव्यज्यते तत्र रसो गौणः। व्यभिचारी मुख्यः राजानुगतराजभृत्यवत्।

देवादिविषयश्च भावपदवाच्यः। देवादिविषया रतिर्भावपदवाच्या। तत्र भावशान्तिभावोदयभावशबलताभावसन्धिभेदान्मुख्यश्चतुर्विधः।

क्रमेण यथा—

कान्ते पदान्तपतिते विनिबद्धमौना
नेयं प्रसादमकरोत्कमलायताक्षी।
अत्रान्तरे जलधरध्वनिभीतभाजा–
श्लिष्टस्तथा स खलु जीवपतिः सकम्पम् ॥१२८॥

अत्रेर्ष्याख्यव्यभिचारिभावस्य शान्तिः।

भावी कालः स खलु तृषितं हन्त चक्षुश्चकोरं
श्रीकृष्णस्यामृतकररुचिं पाययिष्यामि यत्र ।
इत्थं चित्ते कुवलयदृशश्चिन्तयन्त्यास्तदानीं
प्राप्ते तस्मिन्नयनयुगलं नम्रतामाससाद ॥१२९॥

अत्र व्रीडाया उदयः ।

श्वश्रूरिङ्गितवेत्री कथयति मिथ्यैव दुर्वादम् ।
त्वरयति मामिह मधुरिपुमुरलीनिनदो निकुञ्जगमनाय ॥१३०॥

अत्र शङ्कौत्सुक्ययोः सन्धिः । उपमर्द्योपमर्दकभावाभावादनयोर्भावशबलतायां नातिव्याप्तिः ।

संन्यासो वरमत्र मे विधुमुखी जायेत नेत्रातिथि-
श्चन्द्रं चूर्णय तप्तकाञ्चनलतातुल्यं तदीयं वपुः ।
काहं कुत्र पयोधरः खलवचो दुर्वारमाचक्षते
चाञ्चल्यं त्यज चित्त चञ्चलदृशोऽवस्था भवेत्कीदृशी। ।१३१॥

अत्र निर्वेदौत्सुक्यामर्षतर्कशङ्काधृतिचिन्तानां शबलता ।
देवविषयो व्यभिचारी यथा-

उपायातस्तल्पं मम कुसुमकल्पं मधुरिपुः
समारेभे वाचा मधुरसमुचा चाटुशतकम् ।
अथारब्धे माने सहचरि मयानेककपटाद्
विधाता यन्निद्रामहरत तदानीमसहनः ॥१३२॥

अत्र विधिं प्रत्यसूया भावपदवाच्या । एवं मुनिगुर्वादिविषयेऽप्युदाहरणीयम् ।

देवविषया रतिर्यथा-

मुरलीसंवलितकरे ललिततरे दीनदुःखहरे ।
नवनीरदकान्तिधरे मानस ! रे निश्चलं भूयाः ॥१३३॥

अत्र कृष्णविषया रतिर्भावः ।

अथ भावाभासाः—

पीनस्तनी कमलपत्रसमाननेत्रा
सम्पूर्णशीतकरचारुमुखी नताङ्गी ।
अङ्गीकरिष्यति कदापि मदीयमैत्री-
मित्याकुलो नयति वासरमेष मूर्खः ॥१३४॥

अत्र चिन्ता । यथा वा—

इयं कमलपत्राक्षी पश्यति त्वामितस्ततः ।
तथापि प्रेम नाधत्से सेव्यतां मूढ ! मन्मथः ॥१३५॥

अत्र नायिकागतौत्सुक्यम् ।

नृपविषयो भावाभासो यथा—

पृथिवीपाल यत्रेतां (?) राजन् जीयाः शतं समाः ।
त्वां परित्यज्य गच्छामि यत्रास्ति भवनं मम ॥१३६॥

अत्र निरपराधे राज्ञि कस्यचिदमर्षो भावाभासः । एवं देवादौ ज्ञेयम् ।

अथ नवानां रसाभासानामालम्बनानि—

गुरुपत्नी मुनेः पत्नी परकीयोपनागरः ॥१३७॥
प्रतिनायक एवास्या बहवो वल्लभाः पुनः ।
एकाश्रितरतिर्योषित्पुमान् वा भिल्लतत्प्रियाः ॥१३८॥
तिर्यगादिश्च शृङ्गाराभासस्यालम्बनानि च ।

भिल्ल इत्युपलक्षणं किरातादयो ज्ञेयाः । आदिपदात् तापसादयः ।

हास्याभासे च गुर्वादिः शत्रुः स्यात्करुणात्मके ॥१३९॥
रौद्राभासे च गुर्वादिर्वीराभासे द्विजोत्तमः ।
तथा भयानकाभासे ज्ञेय उत्तमनायकः ॥१४०॥
बीभत्से वस्तु श्रद्धेयमद्भुते निशयोज्झितः ।
शान्ताभासे जनो हीन आभासालम्बनानि वै ॥१४१॥

दिङ्मात्रमुदाह्रियते–

बहुषु नायकेषु यथा–

त एव पुरुषा धन्या वसन्ति भुवनत्रये ।
येषां कृते सरोजाक्षि ! समुत्पतति ते मनः ॥१४२॥

एवमेवान्येषामुदाहरणीयमिति ।

तैरभुक्तेन धीरेण गङ्गानन्देन निर्मितम् ।
सरस्वतीवतंसाय स्पर्द्धते कर्णभूषणम् ॥ १४३ ॥
अनधीत्य रसग्रन्थं निखिलं कर्णभूषणे ।
दूषणं धीरमादेयमिति मे विनिवेदनम् ॥१४४॥

इतिश्रीमहाराजाधिराजश्रीकर्णसिंहकारिते मैथिलश्रीगङ्गानन्दकविराजविरचिते कर्णभूषणे रसनिरूपणो नाम पञ्चमः परिच्छेदः ।

समाप्तं चैतत्कर्णभूषणम् ।

अलसमोदिनी

(अथ प्रथमः प्रणयः)

नत्वा महोमहोच्छ्रायं महाजीमूतजित्वरम् ।
गङ्गानन्दोऽतिसंक्षेपात् करोत्यलसमोदिनीम् ॥१॥
रसानामस्ति सर्वेषां शृङ्गारोऽभिमतः रसः ।
आलम्बनं भवेत्तस्य नायिका साथ कथ्यते ॥२॥
स्वकीया परकीया च सामान्या च त्रिधा मता ।
स्वामिन्येवानुरक्ता स्यात् स्वकीया सा पतिव्रता ॥३॥
मुग्धा मध्या प्रगल्भा च स्वकीया त्रिविधा मता ।
तत्राङ्कुरिततारुण्या मुग्धा धीरेण कथ्यते ॥४॥
सा ज्ञातयौवनाज्ञातयौवना च द्विधा भवेत् ।
नवोढा सैव भीलज्जापराधीनरतिः स्मृता ॥५॥
विस्रम्भात् सैव विस्रब्धनवोढा गीयते बुधैः ।
अथ तुल्यमनोजन्मलज्जा मध्या निगद्यते ॥६॥
प्रगल्भा पतिमात्रे या कलावलिविचक्षणा ।
इयं चानन्दसन्दोहवती प्रियरतिः स्मृता ॥७॥
माने सति त्रिधा मध्या प्रगल्भापि तथा मता ।
मध्या धीरा तथाऽधीरा तदुभया च त्रिधा भवेत् ॥८॥
प्रगल्भा च भवेद् धीरा (पुनस्) तदुभया त्रिधा ।
मध्या प्रगल्भयोर्भेदाः षडेवं ते द्विधा पुनः ॥९॥
मध्या (तत्र) भवेज्ज्येष्ठा कनिष्ठापि निगद्यते ।
अधीरा सा पुनर्ज्येष्ठा कनिष्ठा च निगद्यते ॥१०॥
धीराधीरा च सा ज्येष्ठा कनिष्ठा च प्रकीर्तिता ।
धीरा ज्येष्ठा कनिष्ठा च प्रगल्भा परिगण्यते ॥११॥

अधीरा सा भवेज्ज्येष्ठा कनिष्ठा च समीरिता ।
प्रगल्भा तद्द्वया ज्येष्ठा कनिष्ठा च बुधैः स्मृता ॥१२॥
व्यङ्गयकोपप्रकाशा या तां धीरामाह कोविदः ।
स्फुटकोपप्रकाशा या तामधीरां विदुर्बुधाः ॥१३॥
व्यङ्गयाव्यङ्गयवलत्कोपप्रकाशा तद्द्वया मता ।
ज्येष्ठा विवाहिता भर्तुरधिकप्रेमभाजनम् ॥१४॥
कनिष्ठाल्पपतिप्रीतिपात्रं तेन विवाहिता ।
परकीयान्यपुरुषाव्यक्तरागोदिता बुधैः ॥१५॥
परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।
पित्राद्यधीनतायोगात् परकीया तु कन्यका ॥१६॥
विदग्धा लक्षिता गुप्ता कुलटा मुदिता बुधैः ।
रुषितानुशयानाद्याः परोढान्तर्गता इमाः ॥१७॥
विदग्धा द्विविधा प्रोक्ता वाचि वैदग्ध्य(शा)लिनी ।
क्रियावैदग्ध्ययुक्ता च सा पुनर्लक्षिता भवेत् ॥१८॥
परेण लक्षिते प्रेम्णि त्रासो यस्या न विद्यते ।
त्रिविधा कथिता गुप्ता सम्भूतरतगोपना ॥१९॥
भवत्सुरतगोपना भविष्यद्रतगोपना ।
कुलटा सा पुनः प्रोक्ता सर्वदातिरिरंसया ॥२०॥
समस्तजगतः पुंस्त्वमिच्छन्ती या विषीदति ।
क्रीडानुकूलमर्थं या श्रावयन्त्यन्तिकस्थितम् ॥२१॥
हृष्यति स्वेदरोमाञ्चयुक्ता सा मुदिता मता ।
स्वमध्ये कलहच्छद्म कृत्वा सङ्के(त)मन्दिरम् ॥२२॥
प्रयाति कोपयुक्ता या रुषिता सा प्रकीर्तिता ।
या विद्यमानसङ्केतस्थाननाशेन सीदति ॥२३॥

स्वानधिष्ठितसङ्केते भर्तुर्गत्यनुमानतः ।
या विषीदति, या भाविसङ्केतागमशङ्कया ॥२४॥
खिद्यतेऽनुशयाना च त्रिविधा कथिता बुधैः ।
अशेषपुरुषे वाञ्छा वित्तमात्रादुपाधितः ॥२५॥
प्रादुर्भवति यस्याः सा सामान्या परिकीर्तिता ।
चतुर्विधत्वं प्रत्येकं मध्यादीनां प्रकीर्तितम् ॥२६॥
भवेन्मानवती रूपगर्विता प्रेमगर्विता ।
अन्यसम्भोगदूना स्यादित्थं ताश्च चतुर्विधाः ॥२७॥
प्रियागःसूचकश्चेष्टाविशेषो मान उच्यते ।
त्रिप्रकारो भवेन्मानो गुरुः स्यान्मध्यमो लघुः ॥२८॥
गुरुः कष्टतरापास्यः कष्टापास्यस्तु मध्यमः ।
लघुरल्पापनेयः स्याद् रसाभासस्त्वसाध्यकः ॥२९॥
गुरुः पराङ्गनासङ्गसम्भूतः परिकीर्तितः ।
गोत्रस्खलनसञ्जातो मध्यमस्तु समीरितः ॥३०॥
परस्त्रीदर्शनालापजनितो लघुरुच्यते ।
पदप्रणत्यलङ्कारदानापास्यो भवेद् गुरुः ॥३१॥
अन्यथावादशपथैर्निरास्यो मध्यमः स्मृतः ।
लघुस्तथान्यथासिद्धकौतुकापास्य उच्यते ॥३२॥
मध्याप्रगल्भयोर्भेदा द्वादशात्र प्रकीर्तिताः ।
सामान्याया भवेदेको मुग्धाया(श्च) द्वौ (?) ततः परम् ॥३३॥
अथवा परकीयाया द्वावेवं षोडश स्मृताः ।
अष्टाभिस्ता अवस्थाभिर्वसुनेत्रसुधाकराः (१२८)॥३४॥
दिव्यादिभेदतस्ताः स्युर्वेदवारणवह्नयः (३८४) ।
देशान्तरं प्रिये प्राप्ते या विषीदति सन्ततम् ॥३५॥

सन्तापव्याकुलात्यन्तं सा स्यात् प्रोषितभर्तृका ।
खण्डिता साऽन्यभोगाङ्कोऽभ्येति यस्याः प्रियोऽन्तिकम् ॥३६॥
अवधीर्य पतिं पश्चाद् या तापव्याकुला भवेत् ।
कलहान्तरिता सोक्ता विप्रलब्धा तु कीर्तिता ॥३७॥
(इत्यलसमोदिन्यां नायिकानिरूपणं नाम प्रथमः प्रणयः ।)[1]

1. The first section of the work dealing with the types of heroines should normally end with the 37th verse mentioned above but there is no such indication in the manuscript. The colophon is missing.

(अथ द्वितीयः प्रणयः)

यो भवेत् परनारीषु सर्वकालं पराङ्मुखः ।
सदासक्तः स्वकामिन्यामनुकूलः स उच्यते ॥१॥
दक्षि(ण)स्तुल्यरागः स्यात् सकलासु प्रियासु यः ।
कामिनीविषये छद्मनिपुणः शठ उच्यते ॥२॥
धृष्टः स उच्यते भूयो निःशङ्कः कृतदूषणः ।
भूयो निवारितोऽपि स्याद् यः प्रश्रयपरायणः ॥३॥
आचारहानिहेतुर्यः स किलोपपतिः स्मृतः ।
शठत्वं नियतं तत्र परेऽप्यनियता मताः ॥४॥
बहुवारवधूभोगरसिको वैशिको मतः ।
स पुनस्त्रिप्रकारः स्यादुत्तमो मध्यमोऽधमः ॥५॥
प्रकोपे सति कामिन्या उपचारपरायणः ।
उत्तमो मध्यमः स स्यात् कोपरागौ प्रियागतौ ॥६॥
यो व्यक्तीकुरुते नैव नातिभावं च तद्गतम् ।
कृत्याकृत्यविचारेण शून्यो मन्मथकेलिषु ॥७॥
करुणाभयलज्जाभिः परित्यक्तोऽधमो मतः ।
मानी च चतुरश्चात्र शठ एव तिरोहितः ॥८॥
अन्वर्थसंज्ञको मानी चतुरोऽपि द्विधा मतः ।
वचनव्यङ्ग्यमिलनश्चेष्टाव्यङ्ग्यसमागमः ॥९॥
नायकाभास एव स्यादनभिज्ञस्तु नायकः ।
आभासस्य विभागोऽत्र वैरस्यानुसमीरितः ॥१०॥
त तेषां नर्मसचिवश्चतुर्धा परिकीर्तितः ।
पीठमर्दो निगदितः कुपितस्त्रीप्रसादकः ॥११॥

मनोभवकलाकोटिकोविदो विट उच्यते ।
सन्धानकौशलज्ञाता चेटकः परिकीर्तितः ।
भवे(द्)देहादिवैकृत्यैर्हास्यकारी विदूषकः ॥१२॥

(इत्यलसमोदिन्यां नायकनिरूपणं [1] नाम द्वितीयः प्रणयः ।)

1. The ms reads 'नायिकालङ्कारनिरूपणं'

(अथ तृतीयः प्रणयः)

अथ स्त्रीणामलङ्कारास्तारुण्ये सत्त्वसम्भवाः ।
अष्टाविंशतिसंख्यास्ते निरूप्यन्ते विशेषतः ॥१॥
हावभावौ तथा हेला त्रयस्ते चाङ्गसम्भवाः ।
शोभा कान्तिश्च दीप्तिश्च प्रगल्भत्वमुदारता ॥२॥
माधुर्यं धैर्यमित्येतान् सप्त प्राहुरयत्नजान् ।
अथ लीला विलासश्च बिब्बोकः कि(लकि)ञ्चितम् ॥३॥
विच्छित्तिर्विभ्रमो मौग्ध्यं विहृतं तपनं मदः ।
मोट्टायितं कुट्टमितं ललितं च कुतूहलम् ॥४॥
विक्षेपो हसितं केलिस्तथा चकितमित्यपि ।
भावादयोऽत्र धैर्यस्था नायकेष्वपि भेदतः ॥५॥
जन्मनः प्रभृति स्वान्ते विकारपरिवर्जिते ।
उद्बुद्धमात्रः प्रथमं विकारो भाव उच्यते ॥६॥
विकारैर्लोचनादीनां सम्भोगेच्छाप्रकाशकः ।
अल्पसंलक्ष्यवैकृत्यो भावो हावः प्रकीर्तितः ॥७॥
हेलात्यर्थसमालक्ष्यविकारो भाव एव च ।
रूपतारुण्यलालित्यभोगैः शोभाङ्गभूषणम् ॥८॥
कामोन्मेषातिविस्तीर्णा शोभा कान्तिर्निगद्यते ।
अत्यन्तविस्तृता कान्तिः सैव दीप्तिर्निगद्यते ॥९॥
प्रगल्भत्वं भयाभाव उदारत्वं विनीतता ।
अवस्थासु (च) सर्वासु माधुर्यं रमणीयता ॥१०॥
त्यक्तात्मश्लाघना चेतोवृत्तिर्धैर्यमचञ्चला ।
प्रीतिप्रकल्पितैश्चेष्टा वेशावयवभूषणैः ॥११॥

प्रेयसोऽनुकृतिर्लीला प्रेमपूर्वकभाषितैः ।
स्नानयानासनादीनां चक्षुरास्यादिकर्मणाम् ॥१२॥
विष(य)स्तु विलासः स्यादिष्टसन्दर्शनादिजः ।
स विब्बोकोऽतिगर्वेण यापीष्टेऽर्थे तिरस्कृतिः ॥१३॥
स्मितक्रोधश्रमत्रासशुष्करोदनकर्मणाम् ।
प्रियसङ्गमजाद्धर्षात् साङ्कर्यं किलकिञ्चितम् ॥१४॥
नेपथ्यरचनाल्पापि विच्छित्तिः कान्तिपोषिका ।
तपनं प्रियविश्लेषे कामवेगोत्थिता क्रिया ॥१५॥
प्रियागमनकर्मादौ त्वरा हर्षादिसम्भवा ।
अलङ्कारादिविन्यासः अस्थाने विभ्रमो मतः ॥१६॥
अज्ञानादिव कामिन्या ज्ञातस्यापि हि वस्तुनः ।
यः प्रश्नः क्रियते पत्युः पुरस्तन्मौग्ध्यमुच्यते ॥१७॥
वक्तव्यसमयेऽपि स्याद् वचसो विहृतिः क्रिया ।
मदो विकारः सौभाग्यतारुण्याद्यवलेपजः ॥१८॥
दयितस्य कथारम्भे चित्ते तद्भावभाविते ।
तन्मोट्टायितमाचख्युः कर्णकण्डूयनादि यत् ॥१९॥
ग्रहे कचस्तनादीनां हर्षे सत्यपि सम्भ्रमात् ।
ऊचुः कुट्टमितं नेति मस्तकम्पनधूननम् ॥२०॥
अङ्गानां सौकुमार्येण विन्यासो ललितं भवेत् ।
रम्यार्थस्यावलोकाय चाञ्चल्यं स्यात् कुतूहलम् ॥२१॥
भूषणस्यार्द्धनिर्माणं वृथा विष्वग्विलोकनम् ।
ईषद्वचो रहस्यस्य विक्षेपो दयितान्तिके ॥२२॥
हसितन्तु वृथाहासस्तारुण्योद्भेदसम्भवः ।
क्रीडितं सह कान्तेन विहारे केलिरुच्यते ।
चकितं भयसम्भ्रान्तिः कुतोऽपि दयिताग्रतः ॥२३॥

इति श्रीगङ्गानन्दकवीन्द्रकृतायाम् अलसमोदिन्यां नायिकालङ्कारनिरूपणं नाम तृतीयः प्रणयः ।

काव्यडाकिनी

काव्यडाकिनी

पायाच्चिराय भवतः सकलादपाया –
त्कंसारिचारुकरवारिजवर्तिवेणुः ।
आभीरवामनयनाचयचित्तवित्त–
चौर्याय सन्धिरिव निस्वनतस्करस्य ॥१॥
काव्यदोषावबोधाय कवीनां तमजानताम् ।
गङ्गानन्दकवीन्द्रेण क्रियते काव्यडाकिनी ॥२॥

तत्र मुख्यावरोधकृद्दोषः । मुख्यो रसः । अवरोधकृत् प्रतिबन्धकः । रसमात्रप्रतिबन्धकतावच्छेदकरूपवानित्यर्थः । तत्तु रूपं श्रोत्रकटुत्वादेरेव न चपेटापातनादेः । प्रतिबन्धकता तु क्वचित्साक्षात् क्वचित्परम्परया चेत्यालोचनीयम् ।

ननु श्रोत्रकटुत्वादेः रौद्रादिरसबुद्ध्यनवरोधकत्वात्तत्राव्याप्तिरित्यत आह–

यस्य ज्ञाने सति क्वापि प्रतिबन्धोऽस्ति तत्र सः ।
अत एवास्य दोषस्य प्रोक्ता धीरैरनित्यता ॥३॥

स दोषः । अस्य श्रोत्रकटुत्वादेः । तथा च रसत्वव्याप्यधर्मावच्छिन्नोपस्थितिप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकरूपवत्त्वं तत्त्वम् । व्याप्यता तु भेदाभेदसाधारणी । तेन सकलरसप्रतिबन्धके साधुत्वादौ नाव्याप्तिः ।

पदादिस्थः स पञ्चधा ।

आदिशब्दात्पदैकदेशवाक्यार्थरसा गृह्यन्ते । पञ्चधेति पदं तद्गुणसंविज्ञानबहुव्रीहिस्फोरणार्थम् । अथवालङ्कारदोषाणामातिरेक्यव्यवच्छेदाय । तेषामेष्वन्तर्भावो वक्ष्यते । तस्मात्पदमादाय तत्तद्वृत्तिताभेदाद् दोषस्य पञ्चविधत्वमुपपन्नमिति ।

क्रमेण तद्भेदानाह–

पदेऽस्ति श्रोत्रकटुता च्युतसंस्कृतिता तथा ।।४॥
अप्रयुक्तासमर्थत्वे निहतानुचितार्थते ।

अवाचकनिरर्थत्वे ग्राम्यसन्दिग्धते तथा ॥५॥
अश्लीलत्वाप्रतीतत्वे नेयार्थक्लिष्टते तथा ।
अविमृष्टविधेयांशविरुद्धमतिकारिते ॥६॥
एवं षोडशधा दोषः पदवर्ती प्रकीर्तितः ।

अत्र क्लिष्टत्वादीनां त्रयाणां समास एव पददोषत्वमन्येषां त्वसमासेऽपीति विशेषः । क्रमेणैषां लक्षणमाह—

श्रोत्रकटु समाख्यातं माधुर्याव्यञ्जकं पदम् ॥७॥

यत् माधुर्यगुणं न व्यनक्ति तत्पदं श्रोत्रकटुत्वदोषवदित्यर्थः । शब्ददोषस्य शब्दघटितं लक्षणं सर्वत्र बोध्यम् ।

ननु प्रतिकूलवर्णेऽतिव्याप्तिरिति चेत् न । यत्र ओजोव्यञ्जनयोग्या एव वर्णा रसविरुद्धास्तदिति सूत्रार्थः । तत्र सुकुमाराणामपि वर्णानां रसप्रतिकूलत्वात् । यथा—

मानोरगदंशाया जीवितनाथे नते पदयोः ।
नवजलधरधीरध्वनिरभवत्ताक्ष्र्यो मनस्विन्याः ॥८॥

अत्र ताक्ष्र्य इति । यत्र यन्न पदं साधु तत्र तत् च्युतसंस्कृति । तत्र अर्थे यथा—

भवन्त्येव गुणास्तेषां तिष्ठन्ते ये सदन्तिके ।
कीरा धीरालये दैवीरुद्गिरन्ति वचस्ततीः ॥९॥

अत्र तस्मै कस्तिष्ठत इत्यत्र प्रकाशनार्थे नियमनमात्मनेपदस्य गतिनिवृत्त्यर्थे त्वसाधुतैव । तस्मात् 'ये तिष्ठन्ति सदन्तिके' इति पठनीयम् ।

नन्विदं पदं साधु भवत्येव । परन्तु हन्तीति पदमुपसन्दानं यथा गमनार्थे तथा तिष्ठत इति पदं विना चतुर्थीमसमर्थमित्यस्वरसादाह—

तत्तद्व्याकरणासाधु पदं वा च्युतसंस्कृति ।

तत्तद्व्याकरणेति । यया भाषया यत्काव्यं क्रियते तद्भाषासाधुताप्रयोजकव्याकरणासाध्वित्यर्थः । तेन प्राकृतभाषाद्यारब्धकाव्यदोषसङ्ग्रहः । यथा—

महाराजन्नयं पाणिस्तव कल्पद्रुमायते ।

अमुना दीयते यस्मादर्थिभ्यः फलमीप्सितम् ॥१०॥

अत्र महाराजन्निति । 'धराधीश ! भवत्पाणिर्भुवि कल्पद्रुमायते ।' इति पठनीयम् ।

पदं तथा समाम्नातमपि व्याकरणादिभिः ॥११॥

कव्यनादरपात्रं यदप्रयुक्तं तदुच्यते ।

तथेति दुश्च्यवनपदस्य शक्रत्वप्रकारकप्रतीतौ सामर्थ्यमप्यस्ति परन्तु कवीनामप्रयोगविषयत्वादप्रयुक्तत्वमित्यर्थः । न च निहतार्थेन सङ्करः, अनेकार्थत्वाभावात् । नाप्यवाचकेन, तात्पर्यविषयधर्मप्रकारकप्रतीतेर्जनकत्वात् । यथा—

पङ्कासक्तिमतो लोकान् सत्कुर्वन्ति न साधवः ।

पद्मान्निशामुखे भासा न भासयति चन्द्रमाः ॥१२॥

अत्र पद्मानिति । अत्र 'वा पुंसि पद्मम्' इति यद्यपि पद्मशब्दः पुँल्लिङ्गे पठितस्तथापि मूलकविभिर्न प्रयुक्तः । न च कोशे प्रयुक्त एव, तस्य साधुतामात्रप्रदर्शकत्वात् ।

शाब्दिकाख्यातमप्यर्थं न बोधयति यत्पदम् ॥१३॥

अन्तरेणोपसन्दानमसमर्थं तदुच्यते ।

शाब्दिकेति । वैयाकरणपठितमपीत्यर्थः । अवाचकस्योपसन्दानेनापि विवक्षितार्थबोधकत्वाभावात् । अत्र विलम्बेनापि न विवक्षितार्थबोध इति विशेषः । यथा—

कैरवबन्धुकरग्रहभयादिव व्याकुला हन्ति ।

अस्तं गतवति मिहिरे कैरवशरणं सरोजश्रीः ॥१४॥

अत्र हन्तीतिपदस्य गमना[illegible]च्यते ॥र दा॥ [illegible]योपसन्दानं विना तदर्थशक्तेरभावात् ।

प्रसिद्धेनाप्रसिद्धोऽर्थो यस्यार्थेन पिधीयते ॥१५॥

तत्पदं व्यर्थमुदितं निहतार्थं विचक्षणैः ।

प्रसिद्धेनेति । रूढ्या झटिति बोधितेनेत्यर्थः । अप्रसिद्ध इति योगेन विलम्बपूर्वमुपस्थापित इत्यर्थः ।

कचस्ते वारिजं तन्वि ! मीनौ तव विलोचने ।
मृणाली बाहुयुगली सरसी प्रतिभासि नः ॥१६॥

अत्र वारिजपदस्य पद्मरूपः प्रसिद्धोऽर्थो शैवालरूपमप्रसिद्धमर्थं स्थगयति ।

व्यनक्ति निन्दास्तोत्रे यत्पदं स्तोतव्यनिन्द्ययोः ॥१७॥
तात्पर्यागोचरीभूते तत्स्यादनुचितार्थकम् ।

अत्र तात्पर्यागोचरीभूते इति विशेषणं व्याजस्तुतिनिवारणाय, तत्र निन्दास्तुत्योस्तात्पर्यविषयत्वात् । निन्दाव्यञ्जकं यथा–

सर्वतीर्थाभिषेकेण सर्वदा यागकर्मभिः ।
देहोऽयं मनुजाधीश ! छगलस्येव ते शुचिः ॥१८॥

अत्र छगलस्येवेत्यनेन तत्सादृश्यलाभादनीप्सिततद्गतचेष्टायाः प्रतीतिः । स्तुतिव्यञ्जकं यथा–

कार्पण्येन पितुस्तुल्यः पितामहपथच्युतः ।
जनैरग्राह्यनामासौ कुपतिस्त्यज्यतां बुधाः ॥१९॥

अत्र कस्यचिन्निन्दायां वाच्यायां कुपतिरित्यनेनानभीष्टपृथिवीपतिप्रत्ययः ।

तात्पर्यविषयीभूतवस्तुधर्मप्रकारिका ॥२०॥
यतो न जायते बुद्धिः पदं तत्स्यादवाचकम् ।

नन्वेवमसमर्थेऽतिव्याप्तिरिति चेत् सत्यं, किं तु तत्र वस्तुनोऽपि नोपस्थितिः क तद्धर्मस्य । इह तु [illegible] परं [illegible]ति विशेषः । यथा–

निर्धना अपि दाता[illegible]या मनीषिभिः ।
भवन्ति च परित्याज्या धनवन्तोऽपि जन्तवः ॥२१॥

अत्र जन्तुपदस्यादात्रर्थे विवक्षितस्य तदबोधकत्वात् । न च जन्तुत्वेन रूपेण

दातुरभिधायकत्वमप्यस्तीति वाच्यम् । अदातृत्वेनादातृप्रतीतेरुद्देश्यत्वात् ।
यथा वा–

त्वय्यदृष्टे प्रिय ! ज्योत्स्नी गाढध्वान्तमभूत्तदा ।
दृष्टे पुनस्तमःसङ्घव्याप्तापि रजनी दिनम् ॥२२॥

अत्र ध्वान्तवैपरीत्याभिप्रायेण दिनं प्रकाश इत्युक्तम्, तदर्थे दिनपदमवाचकम् । न च लक्षणयात्र बोधः । मुख्यार्थबाधाभावात् । यथा वा–

करुणाकोमलः पातु कपालं विदधत्करे ।
उद्धर्तुं शोणपाथोधेर्जनान् पोतमिवेश्वरः ॥२३॥

अद विदधदिति पदं धारणार्थावाचकम् । विपूर्वाद् दधातेः करण एव तात्पर्यं नियतम् । अत एवात्र लक्षणयापि न तदर्थभिन्नार्थप्रतीतिः । न चासमर्थनिहतार्थाभ्यामत्र सङ्कर इति वाच्यम् । विपूर्वाद् दधातेरनेकार्थत्वाभावात् ।

अव्ययं वृत्तनियमवाक्यार्थानुपकारकम् ॥२४॥
श्लेषाप्रयोजकं यच्च तत्पदं स्यान्निरर्थकम् ।

अत्र वृत्तनियमानुपकारकं वाक्यानुपकारकं समुच्चयरूपार्थानुपकारकमित्यन्वयः । अव्ययमित्यनेनाधिकपदनिवारणम् । सर्गबन्धकृतनियमे यमकादिच्छन्दसि वाक्यालङ्कारे श्लेषालङ्कारे च निरर्थकस्यापि चादेः प्रयोगः सर्वसम्मतः । यथा–

करोति च सुधावाणि ! विलोचनयुगं तव ।
सुधांशुकिरणस्पृष्टसरसीरुहविभ्रमम् ॥२५॥

अत्र च शब्दः ।

लोकमात्रप्रसिद्धं यत्पदं तद् ग्राम्यमुच्यते ॥२६॥

प्रसिद्धमिति चमत्कारीत्यर्थः । अन्यथा शास्त्रे प्रसिद्धस्य कटिपदस्यासङ्गतिः स्यात् । नन्वयं गुणो भवति न तु दोष इति चेत्, न, लोकपदेन ग्राम्यजनस्याभिधानात् । अत एव कटिपदाद्युच्चारणेन व्रीडाव्यक्तिर्विदग्धानां न तु

ग्राम्याणाम् । तेषां तु चमत्कार एव । अश्लीले देशभाषानिबन्धनमपि लज्जादायित्वमत्र तु संस्कृतनिबन्धनमेवेति विशेषः । यथा—

कटिः कनकवर्णाभा मुखं शीतांशुसुन्दरम् ।
जगद्विजेतुकामस्य कामस्यासि पताकिनी ॥२७॥

अत्र कटिशब्दः ।

सन्दिग्धं तत्तु तात्पर्यसंशयो यत्र जायते ।

तात्पर्यसंशयेन यदर्थानिश्चयस्तत्सन्दिग्धमित्यर्थः । यथा—

स्वच्छन्दचारिणो वार्या विना यन्तृनिभास्तव ।
भवन्ति हन्तुमुद्युक्तश्चाला इव महीधराः ॥२८॥

अत्र वार्या वारणीयाः किं गजबन्धिन्येति सन्देहः ।

जुगुप्सामङ्गलव्रीडा यदश्लीलं व्यनक्ति तत् ॥२९॥

अत्र जुगुप्सादित्रयं यद् व्यनक्ति तत्पदं त्रिविधमश्लीलमित्यर्थः । भाषानिबन्धनमश्लीलत्वं देशविशेष एव । संस्कृतनिबन्धनं तु सर्वदेशसाधारणमिति विशेषः । प्रथमं यथा—

वायुं ददस्व घर्मांशुकिरणस्पर्शतापिते ।
मदङ्के रङ्कुनयने ! शुष्यन्तु स्वेदबिन्दवः ॥३०॥

अत्र वायुशब्दो जुगुप्साव्यञ्जकः ।

द्वितीयं यथा—

मदीयक्रोडपर्यङ्के समुपैहि सुलोचने ।
संस्थितासि कुतः कान्ते द्वारोपान्तेऽतिलीनवत् ॥३१॥

अत्र संस्थितमिति पदममङ्गलव्यञ्जकम् ।

तृतीयं यथा—

दूरादेव समालोक्य विस्फुरत्साधनं तव ।
वद भूमीपते ! तावत्साध्वसं को न गच्छति ॥३२॥

अत्र साधनपदं पुंव्यञ्जनप्रत्यायकतया व्रीडाकरम् ।

शास्त्रमात्रप्रसिद्धं यदप्रतीतं तदुच्यते ।

शास्त्रपदमलङ्कारशास्त्रातिरिक्तशास्त्रपरम् । तथा चालङ्कारशास्त्रप्रसिद्धे तन्मात्रशास्त्रप्रसिद्धे च न दोषः । शास्त्रान्तरे तु दोष इत्यर्थः । अलङ्कारशास्त्रप्रसिद्धशब्दार्थस्य यदबोधः स तु पुरुषदोषो न पुनरलङ्कारशास्त्रस्य । 'न ह्ययमपराधः स्थाणोर्यदन्धस्तं न पश्यति ।' इति न्यायात् । यथा—

आशयाम्भोनिधेरन्तर्निमग्नस्य निरन्तरम् ।
जायतां कथमेतस्य तत्त्वज्ञानतटस्थितिः ॥३३॥

अत्राशयशब्दो वासनापर्यायत्वेन योगशास्त्रे प्रतीतः ।

निषिद्धा लक्षणा यत्र नेयार्थं तत्पदं स्मृतम् ॥३४॥

निषिद्धेति । प्रयोजनप्रतिपादकवाचकशब्दान्तरे सति अवाचकाश्रयणान्निःप्रयोजनेत्यर्थः । 'गङ्गायां घोषः' इत्यत्र प्रयोजनप्रतिपादकस्याभावात् । यथा—

कुरङ्गनयने ! नूनमनेन तनुरोचिषा ।
त्वया सौदामिनी नीता चरणाघातपात्रताम् ॥३५॥

अत्र चरणाघातेत्यादिना निर्जितत्वं लक्ष्यते । यदि पुनर्जीयत इति क्रियते तदा निःप्रयोजनलक्षणाद्दोषपरिहारः ।

यतो व्यवहिता बुद्धिरर्थस्य क्लिष्टमाह तत् ।

व्यवहितेति । अनेकपदार्थान्तरितपदार्थसामान्यस्य विशेषस्वरूपानुपस्थित्या विलम्बितेत्यर्थः । तेन

'पिधत्ते हेरम्बं हिमकरकलामौलिमहिषी ।'

इत्यत्र भगवत्या विशेषस्वरूपेणोपस्थितौ न दोषः ।

यथा—

समुद्रमथनोत्पन्नसरित्स्रोतसि मज्जता ।
सखे ! तत्सम्मुखेनैव जातं किमपि चक्षुषा ॥३६॥

अत्र समुद्रमथनेनोत्पन्नममृतं तस्य नदीप्रवाह इत्यर्थः । समुद्रमथनेनामृतादन्यस्यापि सम्भवादित्यत्र बोधविलम्बेन दोषः ।

अयथावद्विनिर्देशो विधेयांशस्य यत्र तत् ॥३७॥
अविमृष्टविधेयांशमलङ्कारविदो विदुः ।

अयथावद्विनिर्देशस्तु प्रकृते समासेषूद्देश्यविधेयभावतात्पर्यग्राहकप्रकृतिपौर्वापर्यविपर्यासः । तथा चास्य दोषस्य समास एव पदवृत्तितेति भावः ।

अत एव 'अथ समासगतमेव' इत्यनेन नियमं वदतः काव्यप्रकाशकृतः समासेष्वेनमुदाहृत्यासमासेषूदाहरतो नानवधेयवचनत्वशङ्कापीति ध्येयम् ।

बहुव्रीहौ यथा–

रेवाभिषेकजनितानुमितातिपुण्यो
जातोऽस्म्यसंशयमहं महनीयमूर्ते !
क्षोणीतलत्रिदशभूमिरुहं भवन्तं
नेत्रद्वयेन यदनेन विलोकयामि ॥३८॥

अत्रानुमितत्वस्य समासे गुणीभावादप्राधान्यम् । अतो न विधेयत्वम्। तस्मादभिषेकजनितातिपुण्यमनुमितमिति युक्तम् ।

कर्मधारये यथा—

सरसिजसुन्दरवदने ! नयनतरङ्गस्तवोल्लासी ।
मदनस्यापरमोहनबाण इ वान्तर्विमोहयति ॥३९॥

अत्रापरत्वमुत्प्रेक्ष्यं तस्य समासे गुणीभावादप्राधान्यम् ।

नञ्समासे यथा नैषधीयचरिते–

निमीलितादक्षियुगाच्च निद्रया
हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।
अदर्शि सङ्गोप्य कदाप्यवीक्षितो
रहस्यमस्याः स महन्महीपतिः ॥४०॥

अत्रावीक्षित इत्यत्र प्रसज्यप्रतिषेधो विधेयत्वेन वक्तुमुचितस्तस्य समासे गुणीभावात्पर्युदासत्वेन विधेयत्वानवगमः । यदुक्तम्–

अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥४१॥

तथा चात्र निषेधस्याप्राधान्यादविधेयत्वम् ।

यत्र तु निषेधस्य प्राधान्यं तत्र यथा–

त्वद्देहद्युतयः सरन्ति परितो नो विद्युतस्त्वद्भुजे
पर्यस्ता चिकुरावलीयमधुना नो शैवलानां चयः ।
हारस्ते हृदये कुरङ्गनयने ! नासौ मृणालीलता
कोऽयं चेतसि विभ्रमस्तव सखि ! त्रासः परित्यज्यताम् ॥४२॥

अत्र नञर्थ एव विधेयः । पर्युदासलक्षणं तु

प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥४३॥

(यथा––)

जघानाकुपितो लोके सकलान् प्रतीभूपतीन् ।
समस्तधरणीभारं बभारायमपीडितः ॥४४॥

अत्राकुपितत्वाद्यनूद्य प्रतिभूतिहननाद्येव विधेयमतो गुणभावो नञर्थस्याभीष्टः ।

तद्धितार्थविशेषणीभूतान्यपदार्थे बहुव्रीहौ यथा–

कुसुमं विशिखो भृङ्गः सहायो दग्धदेहता ।
यस्यास्ति स स्मरो विश्वं क्षोभयत्येतदद्भुतम् ॥४५॥

अत्राक्षोभहेतौ प्रदर्शनीये देहो दग्ध इति दग्धत्वं विधेयम् ।

यद्विरुद्धधियो हेतुर्विरुद्धमतिकारि तत् ॥४६॥

धिय इति निश्चयरूपाया इत्यर्थः । तेन सन्दिग्धे नातिव्याप्तिः ।

यथा–

गौरीलोलविलोचनाञ्चलचमत्कारावलोकोल्लस–
द्रोमाञ्चप्रचयप्रसारणजडीभूताङ्गविक्षेपणः ।

तालव्याकुलयोगिनीगणसमाहूतामरेन्द्रासुरैः
स्मेरास्यावलिवीक्षितो जयकृते भूयाद्भवानीपतिः ॥४७॥

अत्र भवानीपतिशब्देन भवस्य पत्नी भवानीति व्युत्पत्त्या भवपत्नीपतिप्रत्ययः। ननु भवानीपतिपदं शिवे योगरूढमतो न विरुद्धार्थप्रत्यय इति चेत् न, सामग्रीसद्भावे विरुद्धार्थस्मरणवारणस्याशक्यत्वात्। यथा वा–

कण्ठे हारावाप्तिः कुचयुगले चन्दनालेपः।
शुचि वसनं तव कः पथि विधुभासस्त्वां विशेषयतु ॥४८॥

अत्र हारावस्थावाप्तिरिति विरुद्धा प्रतीतिः।

समासे श्रोत्रकटुत्वं यथा—

प्रवासनिरतः कान्तः स्वयं च नवयौवना।
दधातु सा कथं प्राणानक्षीणेन्दुक्षये क्षणात् ॥४९॥

स्पष्टम्।

रक्तप्रवालमिव ते पाणियुगं लोचने अरुणे।
अद्भुतमिदमिह यत्त्वं सम्प्रत्यनुरागशून्यासि ॥५०॥

अत्र रक्तप्रवालमिति प्रवालत्वस्य रक्तत्वाव्यभिचारात्कर्मधारयोऽसाधुस्तस्य परस्परव्यभिचारे साधुत्वात्।

एवमन्येषामपि समासगतत्वमूह्यम्।

इति श्रीमैथिलश्रीगङ्गानन्दकवीन्द्रकृतौ काव्यडाकिन्यां प्रथमा दृष्टिः।

द्वितीया दृष्टिः

निरर्थत्वासमर्थत्वच्युतसंस्कृतितेतरः ।

सर्वो वाक्येऽप्ययं दोषः पदभागेऽपि कश्चन ॥१॥

कश्चन न तु सर्वः ।

नन्वु निरर्थकत्वादीनां नानापदवृत्तित्वे वाक्यदोषत्वमक्षुण्णमित्यत आह—

वाक्यदोषोऽन्वयज्ञानहेत्वनेकपदस्थितिः ।

कुत इत्याह—

निरर्थकादिभिः शब्दैरनेकैरन्वयस्य धीः ॥२॥

कथञ्चिज्जन्यते नैव तेन ते नैव तद्गताः ।

ते निरर्थकादयः । नैव तद्गता नैव वाक्यवृत्तयः ।

नन्वेवमनेकस्मिन्नवाचकेऽतिव्याप्तिरिति चेत् न, तत्र सामान्यतोऽन्वयबोधो भवतीत्युक्तम् । इह तु केनापि प्रकारेणान्वयबोधः । क्रमेणैषामुदाहरणानि

यथा—

परेतगोष्ठ्या परिवेष्टयमानो

यश्चेष्टते नाट्यकलाभियुक्तः ।

खट्वाङ्गजुष्टः किल यस्य हस्तः

स स्तादभीष्टाय तवाष्टमूर्त्तिः ॥३॥

अत्र श्रोत्रकटुत्वं स्पष्टम् ।

ननु रसविरुद्धा वर्णा इत्युक्तम् । अत्र तु रस एव नास्ति कस्य प्रतिबन्धोऽस्त्विति चेत् न, रस्यत इति व्युत्पत्त्या रसपदेन भावोऽप्युच्यते । प्रकृते पुनः शिवविषयकरतिभावस्य सत्त्वात्तस्य च वर्णानां श्रुत्युद्वेजकतया स्थगनमतो न विरोधः ।

सुत्रामा दैवतो यस्य रक्षकस्तं सुरद्रुमम् ।
अद्यानयाम्यहं कृष्णः सत्यं सत्ये ! ब्रवीमि ते ॥४॥

अत्र सुत्रामदैवतशब्दौ शक्रपुंलिङ्गयोरप्रयुक्तौ ।

गावौ हरिपयोजातौ क्षयश्च मकरध्वजे ।
कुजश्च वध्यो यस्यासीत्स दद्याद्भविकं विभुः ॥५॥

अत्र गोहरिपयोजातक्षयमकरध्वजकुजशब्दाः वृषभशक्रकमलविनाशकामग्रह-विशेषार्थतया प्रसिद्धार्था नेत्ररविचन्द्रगृहपयोधिनरकासुरार्थेषु निहतार्थाः ।

गुणैस्तुषारसदृशैर्धवलोऽसि महीभृताम् ।
जनैः समन्ततः स्तोत्रकोटिलक्ष्मा हि गीयते ॥६॥

अत्रोपश्लोक्यमानस्य वृषभत्वप्रतीत्यानुचितार्थता ।

लोकासमेन सम्पूज्या सदा समभुजप्रिया ।
करोतु सुखजातं ते जलाश्रयशरीरजा ॥७॥

अत्र लोकासमसमभुजजलाश्रयशरीरजशब्दा लोकत्रयचतुर्भुजजलनिधितनूजा-नामवाचकाः ।

फूत्कारोच्छूनगल्लोऽयं रोदिति प्रतिवासरम् ।
त्यक्तखादनपानञ्च भल्लं वेत्ति न किञ्चन ॥८॥

अत्र फूत्कारगल्लादिशब्दा ग्राम्याः ।

वामावलोकनोत्साही विग्रहव्यग्रलोचनः ।
सकम्पकटकोऽप्येष किञ्चित्कर्तुं समीहते ॥९॥

अत्र वामादिशब्दाः शत्रुयुद्धसेनार्थाः किं कामिनीदेहकङ्कणार्था इति सन्देहः ।

विशो वाणिज्यकर्तारः सुखिनः स्युस्तदा गृहे ।
यदि तेषां स्वकृत्येषु प्रवृत्तिः सततं भवेत् ॥१०॥

अत्र विट्प्रवृत्तिशब्दौ जुगुप्साव्यञ्जकौ ।

पावकं हि पितृसद्म सत्वरं
याहि सुन्दरि ! किमत्र तिष्ठ(सि)ति ।
म्लानिमानमपकृष्य तत्र ते
संस्कृतिं तु जननी विधास्यति ॥११॥

अत्र पितृसद्मसंस्कृतिशब्दावमङ्गलव्यञ्जकौ ।

महत्ते साधनं दृष्ट्वा त्रसत्येवोपसर्पणात् ।
कम्पनारालनेत्रासावनन्यजभया नृप ! ॥१२॥

अत्र साधनोपसर्पणशब्दौ पुंव्यञ्जनसुरतारम्भस्मारकतया लज्जादायिनौ ।

सर्वदा वर्तते यस्मिन्नाशयः सर्वतो बली ।
जायतां सुमतेस्तस्य तीव्रसंवेगिता कुतः ॥१३॥

अत्राशयतीव्रसंवेगिताशब्दा वासनातिशयवैराग्यपर्याया योगशास्त्रमात्रे प्रतीताः ।

नितम्बं किरणद्वन्द्वे परिधेहि सुलोचने !
भवत्यास्तरलो नित्यं लक्ष्यते भूषणस्पृही ॥१४॥

अत्र नितम्बकिरणतरलशब्दैः कटककरनायकशब्दाः प्रयोजनं विना यल्लक्ष्यन्ते तदेव नेयार्थता ।

चेतो वाचं श्रवणद्वयं च पाथोजनयनायाः ।
तुष्यति निस्सरदमृतद्रवापगां मे समाकर्ण्य ॥१५॥

अत्र पाथोजनयनाया वाचं समाकर्ण्य मे चेतः श्रवणद्वयं च तुष्यतीति सम्बन्धे क्लिष्टत्वम् ।

हासश्रीर्जयति क्षपाकरमपाकुर्वन्ति केशत्विषः
शैवालानि विलोचनं विदलयत्यम्भोजदम्भोदयम् ।
एषा निश्चलया चिरं चपलया कल्याणि ! तुल्या तनु–
र्यस्मिन् भाविनि ! भावितासि भुवने देवोऽयमेवोदितः ॥१६॥

अत्र नायिकाभावनाविषयो नायकः प्राप्तस्तमयमित्यनेनानूद्य तत्राप्राप्तं देवत्वं विधातुमुचितम् । तस्मादयमेव देव इति युक्तम् । यदुक्तम्—'अनुवाद्यमनुक्त्वैव विधेयं न प्रदर्शयेत् ।' इति ।

अयथावन्निर्देशं तु प्रकारान्तरेणाह—

यच्छब्दानन्तरं यत्र तच्छब्दो नैव दीयते ॥१७॥
समासे वा गुणीभूतः सम्बन्धो यत्र गम्यते ।
तत्र तत्र बुधाः प्रोचुरविमृष्टविधेयताम् ॥१८॥

यच्छब्दानन्तरमित्युपलक्षणम् । तच्छब्दानन्तरं यच्छब्दानुपादानेऽपि बोध्यम् ।

यथा—

अष्टाङ्गयोगपूतानामज्ञेयो योगिनामपि ।
योऽसौ गोपवधूवृन्दैरमन्दमुपभुज्यते ॥१९॥

अत्रासाविति पदं विधेयतच्छब्दाभिप्रायेण प्रयुक्तमपि विधेयाबोधकम् ।

ननु—

अमुष्य भरतस्योक्तं श्रुत्वा मूर्च्छन्ति मे मुदः ।
शिखण्डिन्या इवाकाण्डे वारिवाहस्य गर्जितम् ॥२०॥

इत्यत्रामुष्येति पदं तत्पदार्थमभिधत्तेऽतोऽदःशब्दस्तत्पदार्थ इति । मैवम्—

योऽसौ ग्राहमुखग्रासादुज्जहार करीश्वरम् ।
स त्राता दुःखपाथोधेर्मम नान्योऽस्ति कश्चन ॥२१॥

इत्यत्र स इति पदमनर्थकं स्यादतोऽदःशब्दो न तच्छब्दार्थकः ।

अथ—

यस्य मनागपि भक्तिर्भगवति भूताधिनाथेऽस्ति ।
क्षणमपि किमस्य भूयात् कथय सखेऽनिष्टसम्पर्कः ॥२२॥

इत्यत्रेदंपदस्यैवादःपदस्य सर्वत्र तत्पदार्थाधायकत्वमिति चेत् सत्यं, परन्तु

तस्मिन्नेव वाक्ये स्थितमदःपदं प्रसिद्धिमेव परामृशति न तत्पदार्थमभिधत्ते। तथा हि यत्पदनिकटस्थितस्यादःपदस्य प्रसिद्ध्यर्थकता। न वाक्यान्तरोपात्तस्य तु। तथा यत्पदनिकटस्थितस्यादःपदस्य च प्रसिद्ध्यर्थकतायां समानविभक्तिकत्वनियमः। अन्यथा—

'तमभ्येत्युत्सुका लक्ष्मीर्यस्यासौ सुप्रियो भवेत्।'

इत्याद्यसङ्गतं स्यात्।

ननु बहुषु स्थलेषु यत्तदोरेकैकस्य प्रयोगदर्शनान्नित्यसापेक्षत्वाभावात्कथमत्र दोषावतार इति चेत् न, क्वचिदेकतरोपादाने क्वचिदुभयोरनुपादानेऽर्थसामर्थ्याद्यत्तदोरर्थः प्रतीयते इत्येव यत्तदोर्नित्याभिसम्बन्धो न तु सर्वत्र शब्दोपात्तत्वनियमः।

तथाहि—

यस्योपरि प्रतिपलं परिपालयन्तो
सा सर्वतो बलवती भवितव्यतास्ति।
तं हन्तुमुद्यतकरालकृपाणपाणिः
क्रोधातुरोऽपि शमनः कथमस्तु शक्तः॥२३॥

इत्यादौ प्रसिद्धार्थविषये,

पाणिभ्यां नवपल्लवस्य विजयं वाचा मधूलीभयं
कान्त्या काञ्चनवञ्चनं विदधतीमक्ष्णा मृगक्षोभणम्।
तामालोकयतः सुधाकरमुखीं लज्जामुषा चक्षुषा
सान्द्रानन्दपयोनिधौ मम सखे! सद्यो निमग्नं मनः॥२४॥

इत्यादौ पूर्वप्रक्रान्तार्थविषये,

कुतः कमलपत्राक्षि! तदेव वदनं तव।
साञ्जनाश्रुसमासङ्गान्नीयते चन्द्रतुल्यताम्॥२५॥

इत्यादौ अनुभूतार्थविषये च तच्छब्दो यच्छब्दं नापेक्षते। क्वचित्तु तच्छब्दानपेक्षी

यच्छब्दो यथा–

न विस्मयो यत्कमलस्य लक्ष्मीं
रक्ताधरासङ्गि मुखं मुमोष ।
कर्णान्तिके सञ्चरताम्बुजश्री–
स्त्वया हृता नेत्र ! विचित्रमेतत् ॥२६॥

अत्र न विस्मयो नाश्चर्यम् इति प्रथममन्वयबोधे कुतो न विस्मय इत्याकाङ्क्षायां 'यत्कमलस्य लक्ष्मीं रक्ताधरासङ्गि मुखं मुमोष' इत्यन्वयबोधे यत्पदस्य न तत्पदाकाङ्क्षा । वस्तुतस्तु उत्तरवाक्यस्थिते यत्पदे पूर्ववाक्ये न तच्छब्दस्य शाब्दमुपादानम् । अर्थसामर्थ्यात्तत्पदार्थः प्रतीयते ।
यदि च

'यदद्भुतं नो कमलस्य लक्ष्मीम्'

इत्यादि क्रियेत तदा तद्दोषतादवस्थ्यम् ।

उभयोरनुपादाने यथा–

दुर्गतिदारणहेतोरकृप ! नृप ! प्रार्थये न त्वाम् ।
काचिद्दैन्यनिहन्त्री जगदुपरिष्टाद्वरीवर्ति ॥ २७॥

अत्र यत्तच्छब्दयोरुपादानं विना या काचिज्जगदुपरि वरीवर्ति तां प्रार्थयेऽहमिति सामर्थ्यादनवरुद्धा बुद्धिरुत्पद्यते । अन्यथा पूर्वोत्तराभ्यां मिलित्वा नैकार्थप्रतिपत्तिः । पूर्वार्द्धोत्तरार्द्धवाक्ययोर्नैकवाक्यताप्रतिपत्तिरित्यर्थः ।

ननु 'स भाग्यवान् शूलिनि यस्य भक्तिः' इत्यादौ उत्तरवाक्यस्थमपि यत्पदं तच्छब्दमपेक्षते तस्मात् क्वचित् तच्छब्दानपेक्षी यच्छब्द इति न सङ्गच्छते इत्यत आह—

उत्तरस्मिन् गतं वाक्ये यदा भवति यत्पदम् ।
तच्छब्दस्यानुपादानमादानं वा न दूषणम् ॥२८॥

उत्तरवाक्यस्थे यच्छब्दे तच्छब्दः पूर्ववाक्ये चेदुपादीयते, न वोपादीयते, उभयथापि न दोषः ।

'तद्वचो यदि पिकेन लज्जितम्' इत्यत्रान्यत्र वा पूर्ववाक्यगतो यच्छब्दस्तच्छब्दं नापेक्षते तत्कथमनुगम इत्याशङ्कायामाह—

यदीत्यादिपदं यत्र पूर्ववाक्यगतं भवेत् ।
न तत्र तत्पदापेक्षा भवतीति व्यवस्थितिः ॥२९॥

आदिशब्दात् यत्रेति पदं गृह्यते ।

ननु 'मया यद्यत्कृतं पापं तन्मे हर महेश्वरि !' इत्यत्र यदीत्यादिपदभिन्नं यत्पदस्वरूपमस्ति, द्वितीयतत्पदं नास्तीति पूर्वोक्तदोषग्रास इत्यत आह—

नानारूपेण यच्छब्दद्वयादर्थ उपस्थितः ।
तमिहैकेन रूपेण परामृशति तत्पदम् ॥३०॥

अर्थात् यो योऽर्थस्तमित्यन्वयः । इह प्रकृते एकेन पापत्वेन । यद्वा—

वीप्सयोद्दिश्यते चैकयत्पदे यत्पदद्वयम् ।
आदेशियत्पदेनार्थः समुपस्थापितोऽखिलः ॥३१॥
एकरूपेण तं त्वेकं परामृशति तत्पदम् ।
अतो न तत्पदे वीप्सा कुत्रापि च समीक्ष्यते ॥३२॥
यदि वा दृश्यते क्वापि तत्र स्यात्तुल्ययोगिनी ।

यत्पदेन एकरूपेण उपस्थापित इत्यन्वयः । एकं तत्पदमित्यन्वयः । तुल्ययोगिनीति यावत्सङ्ख्याकं यत्पदं[1] तावत्संख्याकतत्पदयोगवतीत्यर्थः ।

'यं यं पश्यसि सुतनो ! स स रतिरमणेन हन्यते बाणैः' इत्यादौ तुल्ययोगो बोध्यः । इयांस्तु विशेषः—यत्पदाभ्यामनादेशिरूपाभ्यां भिन्नभिन्नरूपेणोपस्थापितं वस्तु तत्पदाभ्यां परामृश्यते ।

1. The printed text reads 'यावत्पद'

स सुन्दरः स सर्वज्ञः स सुबुद्धिः स कोविदः ।
स पूज्यः सर्वदा लोके यस्मिन् देवि ! कृपा तव ।।३३।।

इत्यत्रैकयच्छब्दोपादाने सति बहुनो तच्छब्दानामुपादानात् पूर्वोक्तमसङ्गतमित्यत आह–

आकाङ्क्षा यत्तदोः शाब्दी भवेद्यत्र परस्परम् ।।३४।।
तत्रैवैकतरादाने दोषोऽयं समुदीरितः ।

समासे यथा--

मोछाहेउत्तणमिह जुज्जइ विससोअरम्मि चदम्मि ।
सिरिहंडरण्णवन्धूत्तंसि कहं पवण ! तावेसि[1] ।।३५।।

अत्र सोदरे विषसम्बन्धो बन्धौ श्रीखण्डारण्यसम्बन्धश्च मूर्च्छातापाभावौ प्रति हेतुतयाभिमतौ । तच्च तयोः समासे गुणीभावादनुपपन्नम् । यद्यपि पददोषोऽयं तथापि पदद्वये वर्तत इति वाक्यदोषप्रस्तावे प्रोक्तः । एवं समासान्तरेऽप्यूह्यम् ।

विरुद्धमतिकारिता यथा–

अपाङ्गे कामचाञ्चल्यमधरे चानुरागिता ।
ध्रुवं कमलपत्राक्षि ! को न वश्यो भवेत्तव ।।३६।।

अत्रापाङ्गे व्यङ्ग्यादौ कामतश्चाञ्चल्यमधरे नीचे चानुराग इति विरुद्धप्रत्ययः । प्रकाशितविरुद्धामतपदार्थाभ्यामर्थव्यञ्जकताविरुद्धार्थविवक्षाविरहादस्य भेदः ।

एवं समासासमासयोः पदवाक्यवृत्तित्वमुक्त्वा दोषाणां यथासम्भवं पदैकदेशवृत्तित्वमाह । यथा–

ललितवचनवत्त्वादुल्लसल्लोचनत्वात्
सुभगविहसितत्वाद्भङ्गुरभ्रूलतायाः ।
जनयति जनचित्ते हन्त ! शैवालकेश्याः
परिणतहिमभानोरास्यमस्या विशेषम् ।।३७।।

1. 'मूर्च्छाहेतुत्वमिह युज्यते विषसोदरे चन्द्रे ।
श्रीखण्डारण्यबन्धुस्त्वमसि, कथं पवन ! तापयसि ।।' इतिच्छाया ।

अत्र त्वात्वावर्णाः श्रोत्रकटवः ।

नन्वत्र नानापदवृत्तित्वे श्रोत्रकटुत्वस्य दोषत्वमिति चेत्, उच्यते–

पारुष्यं बहुवर्णानां यत्रैकत्र पदे भवेत् ॥३८॥
तत्रास्य पदवृत्तित्वमन्यथा भागवृत्तिता ।
भागेऽस्य पदवृत्तित्वाभावान्नो वाक्यवृत्तिता ॥३९॥

अस्य श्रोत्रकटुत्वस्य

जगद्व्यापि यशः सूते मतिमत्ता मनीषिणाम् ।
अनुक्षणमकीर्तिं च मूढानामर्थसंशयः ॥४०॥

अत्र मत्ताशब्दः प्रसिद्धेन क्षीबार्थेन निहतार्थः ।

विजेयो मघवद्द्रोही निवातकवचो बली ।
पुरा येन पुरस्तस्य क्रियानेष जयद्रथः ॥४१॥

अत्र विजेय इत्यत्र यत्प्रत्ययोऽतीतत्वार्थावाचकः ।

दृष्टान्तीकृत्य कमलं मध्यविभ्रान्तषट्पदम् ।
शङ्के दृशः कृशोदर्याः सतारा विदधे विधिः ॥४२॥

अत्र दृश इति बहुवचनमनर्थकम् । एकस्या एव कृशोदर्या उपादानात् । न च दृक्पदं क्रियायां प्रयुक्तमिति वाच्यम्, सतारा इति विशेषणस्यानन्वय-प्रसङ्गात् ।

नन्विदमसाधु, द्वयोरेकस्मिन् वा वक्तव्ये बहुवचनस्यासाधुत्वादिति चेत्, उच्यते–

बहुष्वित्यादिसूत्रेण द्वयोरेकस्य वा भवेत् ।
तन्निषेधो बहुत्वस्याविवक्षायां कदापि नो ॥४३॥

तन्निषेधः बहुवचननिषेधः ।

परोन्नतिसहो नित्यं निस्पृहो लोभ्यवस्तुषु ।
सर्वकौशलसम्पन्नो नूनमाढ्यचरो भवान् ॥४४॥

अत्राढ्यचरशब्दः पूर्वमाढ्य आसीदिति चरट्प्रत्ययान्तः किमाढ्येषु चरतीति टप्रत्ययान्तो वेति सन्देहः ।

सोमोद्भवाभिषेकेण पूयते सकलो जनः ।
न परं ब्रह्मविद्वेषसमासक्तमना द्विजः ॥४५॥

अत्र पूयशब्दो रसविशेषोपस्थापकत्वेन जुगुप्साव्यञ्जकः ।

अनभिप्रेतकर्तारो बहवो भुवि मानवाः ।
कुर्वाणाः केङ्कृतिं काका निवसन्ति गृहे गृहे ॥४६॥

अत्र प्रेतशब्दोऽमङ्गलव्यञ्जकः ।

अत्र वामनाचार्येणाप्रसिद्धासभ्यलाक्षणिकासभ्यलोकसंवीतासभ्यार्थाः शब्दाः सङ्गृहीताः । यथा सम्बाध इति पदं सङ्कटार्थप्रसिद्धं न गुह्यार्थप्रसिद्धमिति अप्रसिद्धासभ्यार्थम् । जन्मभूमिरिति पदं लक्षणया गुह्यार्थं न शक्त्येति लाक्षणिकासभ्यार्थम् । सुभगाभगिनीकुमार्युपस्थानाभिप्रेतादिपदं लोके न सङ्गृहीतासभ्यार्थमिति लोकसंवीतासभ्यार्थम् ।

तदुक्तम्—

संवीतस्य हि लोकेऽस्मिन् न दोषान्वेषणं क्षमम् ।
शिवलिङ्गस्य संस्थाने कस्यासभ्या च भावना ॥४७॥

इति ।

अतः प्रेतशब्दस्य प्रकृतोदाहरणं न सङ्गच्छते, तथापि काव्यप्रकाशकृदभिप्रेतमिति प्रेतपदमिहोपात्तम् ।

लोचने क्रोधकलुषे विक्षिपन्तं रिपून् प्रति ।
हिरण्यरेतःसदृशं कस्त्वां युधि समीक्षताम् ॥४८॥

अत्र रेतःशब्दो व्रीडाव्यञ्जकः ।

स एव हि वचोबाणः सरोजदललोचने !

यत्कृते हिमकृद्भासो न सुखाय भवन्ति ते ॥४६॥

अत्र स्ववाच्यवाचकत्वसम्बन्धेन वचःशब्देन गीःशब्दो लक्ष्यते। अतः पदैकदेशे नेयार्थता। तथैव गीःशर इत्यादावपि। तथा चात्रोभयपदं परीवर्तासहम्। वारिध्यादौ तूत्तरपदमेव। वडवानलादौ पूर्वपदमेवेति दिक्।

इति श्रीमैथिलश्रीगङ्गानन्दकवीन्द्रकृतौ काव्यडाकिन्यां द्वितीया दृष्टिः।

तृतीया दृष्टिः

अथ वाक्यदोषानाह –

प्रतिकूलवर्णता स्याल्लुप्तविसर्गोपहतविसर्गत्वे ।
अस्थानस्थपदत्वं हतवृत्तत्वं विसन्धित्वम् ॥१॥
अर्द्धान्तरैकवाचकसमाप्तपुनरात्तगर्भितत्वानि ।
अभवन्मतयोगत्वं पतत्प्रकर्षप्रसिद्धिधुतते च ॥२॥
कथितपदत्वं च तथा न्यूनाधिकपदत्वे च ।
अपदस्थसमासत्वं सङ्कीर्णामतपरार्थते चापि ॥३॥
अनभिहितवाच्यभग्नप्रक्रमते अक्रमत्वं च ।
एवं किलैकविंशतिरुदीरिता वाक्यवर्तिनो दोषाः ॥४॥

क्रमेणैतानाह :–

यत्र रसाननुकूलो वर्णचयो वाक्य एवास्ति ।
प्रतिकूलवर्णमूचुस्तदलङ्कृतिशास्त्रवेत्तारः ॥५॥

एवकारेण श्रोत्रकटोर्व्युदासः । तस्य पदेऽपि सत्त्वात् । न चापदस्थसमासेऽतिव्याप्तिरिति वाच्यम् । तत्र समासस्यैव वैरस्याधायकत्वात् न तु वर्णानाम् । तेषां तु रसानुगुणत्वसम्भावनात् । तदिति वाक्यम् । तथा च तन्निरूपणेन तद्धर्मनिरूपणसिद्धिरित्युक्तम् ।

शृङ्गारे यथा–

कष्टमिष्टेन संश्लिष्टा स्पष्टदष्टोष्ठसम्पुटा ।
दृष्ट्वा निश्चेष्टयाचष्ट बिम्बौष्ठी नष्टचेष्टताम् ॥६॥

अत्र वर्णानां रसाननुगुणत्वं स्पष्टम् ।

रौद्रे यथा–

श्रीरामस्य वधूं विधूय सहसा तत्साध्वसं चेतसो
यच्चौर्येण निशाचराधम ! वनादेकाकिनीमाहरः ।
तस्मादङ्गमिदं नखेन सकलं ते खण्डयित्वा रणे
कुर्यां वालिसुतोऽङ्गदोऽहमचिरादन्वर्थतां नामनि ॥७॥

अत्र प्रोद्धतवर्णगुम्फः समासदैर्घ्यं च कर्तुमुचितम्, तदभावात् प्रतिकूलता । यथोचितं तथोदाह्रियते -

उद्दामद्युतिदुर्दिनीकृतसमिद्युद्धावरुद्धद्विष-
त्सन्दत्तद्रुतचित्तसाध्वसरसा सेयं गदा निर्दया ।
वस्त्रं कृष्टवतः पतत्वधिशिरो दुःशासनस्याद्य तत्
पाञ्चाली चिकुरं चिराय विततं बध्नातु निर्बन्धतः ॥८॥

अत्र चतुर्थचरणे क्रोधाभावादनुद्धतवर्णन्यासः ।

लुप्तविसर्गं तत्स्याद्यत्र विसर्गा विलुप्यन्ते ।

स्पष्टम् ।

कृपणा निर्धना लोका न स्फुटं दोषकारणम् ।
अप्यन्तर्बद्धसंरम्भा नीरदा इव भोगिनः ॥९॥

अत्र कृपणा इत्यादौ असकृद्विसर्गलोपः ।

उपहतविसर्गकं तद्यत्र विसर्गा गता ओत्वम् ॥१०॥

स्पष्टम् । यथा-

अतिसत्त्वो महाकायो विमलो वसुदो नृपः ।
यस्याग्रे पार्थकर्णाद्या विस्मृतिं समुपागताः ॥११॥

अत्रातिसत्त्व इत्यादावोत्वं प्राप्ता बहवो विसर्गाः ।

अस्थानस्थपदं तत्स्याद्यत्रास्थाने पदस्थितिः ।

यथा-

हरिं सपत्नीनखचिह्नमारादुपेतमत्युत्सुकमानसापि ।
दृशा भृशोन्मीलितशोणभासा न कापि गोपी कलयाञ्चकार ॥१२॥

अत्र 'न कलयाञ्चकार' इति वाच्यम् । अन्यथा, अपि तु सर्वा गोप्यः

कलयाङ्कुरिति विरुद्धबोधः प्रसज्येत। नञर्थस्य विधेयतया कलनसमभिव्याहार एव समुचितः। पदस्यास्थाने संनिवेशात्सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने शिथिलमित्यस्य वाक्यदोषता।

यस्मिन् दुरुच्चारमभव्यदायि लघ्वन्तिमाप्राप्तगुरुत्वमस्ति ॥१३॥

स्वरूपहीनं विगुणं रसानामश्रव्यवृत्तं हतवृत्तकं तत्।

अश्रव्यं वृत्तं यस्मिन् तद्वाक्यं हतवृत्तम्। तत्तु पञ्चविधम् --- दुरुच्चारं, नायकाद्यकल्याणकारि, पादान्ताप्राप्तगुरुत्वलघु, स्वरूपहीनं, रसाननुगुणं चेति। क्रमेणोदाहरणम्। यथा—

यदिह वपुषि स्वेदश्रेणी विसर्पति सर्वतः

खरतरमथ श्वासं यत्त्वं मुहुर्मुहुरुज्झसि।

कथय कथय क्षिप्रं तस्मात्सरोरुहलोचने!

किमभवदिहाद्य त्वद्दृष्ट्यध्वनो विषयो हरिः ॥१४॥

अत्र 'अभवदिहाद्य त्वद्दृष्ट्यध्वनः' इति दुरुच्चारत्वादश्रव्यम्।

उअह सरवरे रेहइ अरुणअरच्छित्तपोम्ममिह सव्वं।

मित्तविओउज्जाअसोणं णअणं व भिसिणीणं ॥१५॥

अत्र प्रथमार्धे द्वितीयतृतीयौ सगणभगणौ नायकाद्यमङ्गलसूचकौ।

पादान्ताप्राप्तगुरुत्वलघु द्विधा, विषमपादचतुर्थपादान्तभेदात्।

विषमपादान्ताप्राप्तगुरुत्वलघु यथा—

विलसति गगने नवाम्बुदाली वहति शनैरनिलस्तरङ्गबन्धुः।

सहचरि! हितहेतवे वदामि तव न मनागपि मानकाल एषः ॥१६॥

अत्र 'वदामि' इति मिवर्णः। न च 'पादान्तस्थं विकल्पेन' इति सूत्रं समाधिरिति वाच्यम्, तस्य द्वितीयचतुर्थपादौ विषयः। यद्वा वसन्ततिलकादिच्छन्दोविशेषः सूत्रस्य विषयः।

1. 'पश्यत सरोवरे राजते अरुणकरक्षिप्तपद्ममिह सर्वम्।
मित्रवियोगोज्ज्वालशोणं नयनमिव बिसिनीनाम्॥' इतिच्छाया।

चतुर्थपादान्ताप्राप्तगुरुत्वलघु यथा—

मा सम्भावय मां गिरा मधुरया कुर्या न चित्तोत्सवं
वातान्दोलविलोलपङ्कजदलद्रोहस्पृशा वा दृशा।
आयाते मयि यच्चकार भवती कृत्यौचितीसम्भ्रमं
तेनैवाद्य ममेन्दुसुन्दरमुखि ! स्वात्मा महेन्द्रीयति ॥१७॥

अत्रासंयुक्तयकारपरस्य पादान्तनिबन्धनगुरोरपि 'ति'वर्णस्य बन्धशैथिल्यकारितया न गुरुकार्यकारित्वम्। तस्मात् स्वात्मा कृतार्थीकृतः' इति 'मम' इत्यत्र 'मया' इति च वाच्यम्। छन्दोलक्षणहीनं वृत्तमत्यन्तवैरस्याधायकतया नोदाहृतम्।

हा जगदेकमनोहर ! कान्त ! हा कुलसागरचन्द्र ! नरेन्द्र !
हा गुणसार ! सरोरुहनेत्र ! क्वासमये गतवानसि निद्राम् ॥१८॥

अत्र हास्यरसव्यञ्जकस्य दोधकवृत्तस्य करुणरसप्रतिकूलत्वादश्रव्यत्वम्।

पुनः पुनः प्रगृह्यादेर्विश्लेषः सकृदिच्छया ॥१९॥
अश्लीलत्वं च कष्टत्वं सन्धेर्यत्र विसन्धि तत्।

प्रकृतिवद्भावनिबन्धनो वारंवारमत्र संहितां न करोमीति पुनः स्वेच्छया सकृत्सन्धेर्विश्लेषोऽश्लीलत्वं कष्टत्वं चेति। आदिशब्दात् सूत्रान्तरेण सन्धेर्विश्लेषो गृह्यते। इत्यस्य पञ्च भेदाः। क्रमेण यथा—

लोचने अम्बुजे एते इमे तारे अली पुनः।
चित्रं यदेतयोर्मध्ये केसराली न दृश्यते ॥२०॥

अत्र प्रगृह्यनिबन्धनः सन्धेर्विश्लेषः।

बन्धकीवदनाम्भोजे विशन्तीव निशामुखे।
कदलीगर्भसदृशी उदियाय विद्युद्युतिः ॥२१॥

अत्र स्वेच्छया कृतो विश्लेषः सकृदपि दोषः।

चलण्डामररूपोऽसौ रणेऽभूदतिभीषणः ।
यमालोक्य हतच्छाया बभूवुरिह शत्रवः ॥२२॥

अत्र 'चलण्डामर' इत्यत्र 'बभूवुरिह' इत्यत्र च सन्धिकृताश्लीलता ।

कार्वाशिनायमर्वार्वाक् चावस्मिन् वेश्मनि स्वयम् ।
लिखितो मिषतः कस्मान्ममर्त इव भासते ॥२३॥

अत्र सन्धिकृतं श्रोत्रकटुत्वरूपं कष्टत्वम् ।

विरचितशिशुभाव ईक्ष्यमाणः
स्मितमधुरं व्रजसुन्दरीगणेन ।
विदधतिमृदुः किशोरलीला-
मित इत एष उदार एतिकृष्णः ॥२४॥

अत्र 'इत इतः' इत्यादौ गुणः प्राप्तः 'पूर्वत्रासिद्धम्' इति सूत्रेण बाध्यते ।

प्रथमार्धशेषवाचकपदं द्वितीयार्धसङ्गतं यत्र ॥२५॥
अर्धान्तरैकवाचकमभिदधते तत्सदा सुधियः ।

स्पष्टम् ।

भूषणं भास्वरं देहे कुरु चन्द्रोऽयमुद्गतः ।
तदित्थं शिक्षिता सख्या मुदं याताभिसारिका ॥२६॥

अत्र 'चन्द्रोऽयमुद्गतस्तद्भास्वरं भूषणं देहे कुरु' इत्यन्वयः । एव च प्रथमार्धे द्वितीयार्धगततत्पदापेक्षा नावश्यका । अर्थसामर्थ्यादेव तदर्थबोधः । प्रकृते तु अर्थापेक्षा । अधिकपदे तु न तदपेक्षेति भेदः ।

वाक्यसमाप्तौ सत्यां यदुपात्तं तत्समाप्तपुनरात्तम् ॥२७॥

यथा—

चित्ताम्भोनिधिमन्दरो मृगदृशां दूतोपदेशः श्रुतौ
मानाशीविषबर्हिणो मनसिजक्षोणीरुहस्याङ्कुरः ।

अन्तर्मत्तगजेन्द्रकर्षणसृणिर्वंशीरवः श्रीहरेः

कल्याणं वितनोतु केलिनटनारम्भे मृदङ्गध्वनिः ॥२८॥

अत्र 'मृदङ्गध्वनिः' इति विशेषणदानात् समाप्तपुनरात्तता ।

वाक्यं वाक्यान्तरे यत्र तद् गर्भितमुदाहृतम् ।

वाक्यमर्थादनुपयुक्तम् । यथा—

विलसति गगने नवाम्बुदाली वहति शनैरनिलस्तरङ्गबन्धुः ।

सहचरि ! हितहेतवे वदामस्तव न मनागपि मानकाल एषः ॥२९॥

अत्र 'सह' इत्यादि 'वदामः' इत्यन्तं वाक्यं महावाक्यान्ते प्रविष्टमनुपयुक्तम् ।

अभवन्मतयोगं तद्यत्र भवेदन्वयो नेष्टः ॥३०॥

यथा—

यैर्न्यस्तास्तव विप्रयोगसमये वह्निस्फुलिङ्गोत्करा

मद्देहे मम ये बभूवुरनिशं हा हन्त ! मूर्च्छाकृतः ।

येषां वीक्षणमन्तकोपममभूत् कुन्देन्दुपाथोमुचां

नेत्रद्वन्द्वपथं गते त्वयि मम प्राणेश ! ते शैत्यदाः ॥३१॥

अत्र 'कुन्देन्दुपाथोमुक्' शब्देन यत्तच्छब्दानामन्वयः कवेरभिमतः । स च नोपपद्यते । तथा हि यैरित्यत्र कुन्देन्दुपदार्थस्याविशेष्यत्वात् । ननु 'ये' इति 'येषाम्' इत्यनयोः परस्परमन्वयस्ततः 'कुन्देन्दुपाथोमुचाम्' इत्यनेन तत्पदार्थस्य, विशेष्यतयोपादाने सत्युभयत्रान्वयः स्यादिति चेत्, न, 'यैः' इत्यत्रानन्वयो भिन्नविभक्तितया तयोरनन्वयाच्च विशेषणपदार्थयोः परान्वयतात्पर्येणोपात्ततया परस्परमसम्बन्धाच्च ।

यथा वा—

उत्सारयसि यत्तन्वि ! मुखाद्धासो मनागपि ।

मम लोचनयोरद्य तदा स्याच्चरितार्थता ॥३२॥

अत्र 'यत्' इत्यस्य 'तदा' इत्यनेन सम्बन्धो न घटते । तस्मात 'चेत्तन्वि'

इति वाच्यम् । 'चेत्' इति पदस्य यदापदार्थकत्वात् ।

यथा वा–

पाणिप्रवालशकलं तव पद्मरागः
कान्ते ! पदद्वयमुरोजयुगं सरोजम् ।
कण्ठस्तु कम्बुपुटकस्त्रिवलीतरङ्गो
लावण्यवारिनिधिशीतरुचिर्मुखं ते ॥३३॥

अत्र 'वारिनिधि' शब्दस्य समासे गुणीभूतत्वात्तदर्थेन सर्वे प्रवालादयो न सम्बध्यन्ते । अविमृष्टविधेयांशे तु यदेवानिष्टं तदेव दोषवत् । इह तु सर्वेषां प्रवालादिपदार्थानां तदङ्गत्वेनाप्रतीत्या सम्पूर्णवाक्यार्थवैकल्यमिति भेदः ।

यत्रारब्धा घटना निपतति पश्चात् पतत्प्रकर्षं तत् ।

स्पष्टम् ।

हे हस्तीन्द्रशिशो ! न शोभनमिदं यत्कुञ्जकुक्षिं गत–
स्त्वं वीरुत्ततिमुत्क्षिपन् विहरसि प्रोद्दण्डया शुण्डया ।
किञ्च क्षुद्रतमाः ! कुरुध्वमधुना कोला ! न कोलाहला–
नेतस्मिन् विपिने सुखं मृगपतिर्निद्रायितो वर्तते ॥३४॥

अत्रारब्धबन्धस्य चतुर्थचरणे निपातः ।

पदस्य यस्य यत्रार्थे प्रसिद्धिस्तत्र तत्पुनः ॥३५॥
अतिक्रामति तां यत्र प्रसिद्धिधुतमाह तत् ।

न चावाचकेऽतिव्याप्तिरिति वाच्यम् । तात्पर्यगोचरधर्मप्रकारकप्रतीतेरस्य जनकत्वात् । कव्यनादरविषयत्वेऽपि प्रसिद्ध्यभावादप्रयुक्ततोऽस्य भेदः ।

मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति ।
स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम् ॥३६॥

इत्यादिप्रसिद्धिमतिक्रामति यत्तत्प्रसिद्धिधुतम् । यथा—

नद्यस्तुङ्गतरङ्गभीषणतया ध्वान्तावलीभिर्जग-
द्व्याप्तं वारिमुचां रवः सखि ! महाघोरः फणी सर्वतः ।
विद्युद्वीक्षणमात्रतोऽपहरते नेत्रं हठेनाधुना
यत्सान्निध्यमितः प्रयासि सुभगे ! वन्दामहे तत्तपः ॥३७॥

अत्र रवो नीचप्राणिध्वनिषु प्रसिद्धो न तु मेघादिशब्देषु ।

कथितपदं तत्कथितं यत्पुनरुक्तिः प्रयोजनाभावे ॥३८॥

यथा –

विकचसरोजोल्लासी रेवाकल्लोलकौतुकोल्लासी ।
सहचरि ! समीरणोऽयं प्रसभं मम मानसं हरति ॥३९॥

अत्र 'उल्लासि' शब्दः पुनरुक्तः । पुनरुपादानाप्रयोजनं विना पिष्टपेषणन्यायेन न चमत्करोतीत्यस्य दोषत्वम् ।

न्यूनपदं तत्कथितं नान्वयबोधः पदं विना यत्र ।

यथा—

करुणाकदम्बकयुता समर्पिता मयि यदा दृष्टिः ।
किं मम तदा त्रिलोकीराज्यसुखैः पर्वतेन्द्रसुते ! ॥४०॥

अत्र 'दृष्टिः समर्पिता' इत्यत्र 'त्वया' इत्यनुपादानात् न्यूनता ।

अधिकपदं तत्कथितं यथाकथञ्चित्समन्वयो यस्य ॥४१॥

यथा–

चन्द्राकारमनोहरं तव मुखं वाणी मधुस्पर्धिनी
पाणिः पल्लवसुन्दरस्तनुरसौ सौदामिनीबन्धुरा ।
बाहुर्बालमृणालकोमलरुचिर्हास्यं सुधासोदरं
नो जाने सखि ! कस्तपस्यति जनो यस्यालयं यास्यसि ॥४२॥

अत्र मुखस्य चन्द्रोपमायां वाच्यायामाकारशब्दस्यावयवसंस्थानवाचकतया प्रकृतानुपयोगात् स्वरूपार्थकत्वं वाच्यमित्येव यथाकथञ्चित्समन्वयः ।

अपदस्थसमासं तद्यत्रास्थाने समासविन्यासः ।

यथा–

युष्माकं ननु धर्षको निशि सुधाधामायमुत्पश्यत
प्रातःकाल उपागतोऽयमधुना यायाद्विदूरं कियत् ।
इत्यन्तर्जनितप्रकोपविसराताम्रीकृताङ्गो रविः
पादापातननिःप्रभीकृतविधुर्द्राग्बोधयत्यब्जिनीः ॥४३॥

अत्र कविनिबद्धस्य क्रुद्धस्य रवेरुक्तौ समासो न कृतः, कवेरुक्तौ तु कृतः ।

वाक्यान्तरपदं वाक्ये यत्र सङ्कीर्णमाह तत् ॥४४॥

यथा—

शृणुष्व मल्ली कलकूजितानि
प्रसूननम्रा पुरतः पिकानाम् ।
उत्कण्ठतेऽस्मिन् सखि ! मे विधातु
तस्मान्निकुञ्जे हृदयं च किञ्चित् ॥४५॥

अत्र 'पिकानां कलकूजितानि शृणुष्व, पुरतः प्रसूननम्रा मल्ली, तस्मादस्मिन्निकुञ्जे मे हृदयं किञ्चिद्विधातुमुत्कण्ठते' इति योजना । क्लिष्टे तु प्रधानक्रियाभेदो न भवत्यत्र तु तद्भेदः स्फुटः ।

प्रकृतस्य रसस्यास्ति विरुद्धो यत्र यो रसः ।
तद्व्यञ्जकोऽपरस्त्वर्थस्तच्चामतपरार्थकम् ॥४६॥

यथा–

रामेणात्मभुवा बाणैस्ताडिता सा निशाचरी ।
रक्तचन्दनसिक्ताङ्गी जीवितेशगृहानगात् ॥४७॥

अत्र व्यञ्जनावृत्तिलभ्योऽर्थः प्रकृतरसविरोधिनः शृङ्गारस्य व्यञ्जकः ।

अनभिहितवाच्यमुदितं नोक्तिर्यस्मिन्नवश्यवाच्यस्य ।

यथा—

शिशिरपयःसिक्तायाः सखीभिरिह ते तथापि तन्वङ्गि !

अपसरति नैव मोहः शिव ! शिव ! कठिनो वियोगाग्निः ॥४८॥

अत्र 'शिशिरपयःसिक्तासि' इति सिक्तत्वस्य विधिर्वाच्यः । 'तथापि' इत्यस्य द्वितीयार्धे प्रवेशो युक्तः ।

आत्मक्लेशनिदानं परिहर मानं सरोजाक्षि !

न मयापराधलवकः कृतो भवत्याः कथं कोपः ॥४९॥

अत्र 'अपराधलवकोऽपि' इति अप्यर्थो वाच्यः । न्यूनपदे वाचकपदापेक्षा, इह त्वर्थापेक्षा । अपेस्तु द्योतकत्वादिति विशेषात् ।

कारकादिक्रमो यत्र भग्नस्तद्भग्नप्रक्रमम् ॥५०॥

आदिशब्दात् प्रकृतिप्रत्ययसर्वनामपर्यायोपसर्गक्रमा गृह्यन्ते ।

कारकस्य यथा—

भाङ्कारैर्मुखरीकरोति हरितो भृङ्गावली सर्वतः

कुञ्जेऽस्मिन्नवमल्लिका विरचयत्यक्षणामभीक्ष्णं मुदः ।

रेवासङ्गमशीतलेन मरुता मोदो महान् जन्यते

सङ्गीतानि पिकी तनोति समयो मानस्य नायं तव ॥५१॥

अत्र सर्वत्राभिहितः कर्ता, 'मरुता' इत्यनभिहितः कर्तेति भग्नः प्रक्रमः ।

प्रकृतेर्यथा—

परदेशं प्रिये याते तद्वियोगासहिष्णवः ।

सत्वरं तेन साकं मे धैर्यलज्जादयो गताः ॥५२॥

अत्र 'याते' इति याधातुप्रस्तावे 'गताः' इति गम्धातोरुपादाने भग्नः प्रक्रमः। न चैकपदस्य द्विःप्रयुज्यमानतया कथितपदत्वं दोष इति वाच्यम् तस्योद्देश्यप्रतिनिर्देश्यातिरिक्तविषयत्वात्। उद्देश्यप्रतिनिर्देश्यादिस्थले तु तस्यैव पदस्य सर्वनाम्नो वा प्रयोग आवश्यकः। तथा हि—

'उदेति सविता ताम्रस्ताम्र एवास्तमेति च।

इत्यादौ 'रक्त एव' इति पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव भासमानः प्रतीतिस्थगनं करोति। एवं प्रत्ययादीनामत्यन्तदूषकत्वाभावादुदाहरणं न दत्तमन्यत्रानुसन्धेयम्।

यस्य यत्र प्रयोगोऽस्ति व्युत्पन्नस्तु ततोऽन्यतः।
प्रयोगः क्रियते तस्य तदक्रममुदाहृतम् ॥५३॥

यथा—

यद्दत्ताः शपथा विलोचनपथादन्यत्र सन्निर्गमे
तुभ्यं सभ्य ! मदर्थमालिनिवहैर्यद्वा भवानर्थितः,
यत्किञ्चित् खलु वाञ्छितं हृदि मया चोत्कण्ठया नेत्रयो
रागेणाद्य तथान्वमीयत यथा तत्सर्वमापूरितम् ॥५४॥

अत्र 'यच्च किञ्चित्' इति वाच्यम्। चादिशब्दा यत्समभिव्याहृताः तद्गतमेव स्वार्थं बोधयन्तीति दिक्।

इति श्रीमैथिलश्रीगङ्गानन्दकवीन्द्रकृतौ काव्यडाकिन्यां तृतीया दृष्टिः।

चतुर्थी दृष्टिः

अथार्थदोषानाह--

अपुष्टव्याहतक्लिष्टपुनरुक्तनिर्हेतुताः ।
सन्दिग्धदुःक्रमास्थानयुक्तत्वान्यनवीकृतिः ॥१॥
ख्यातिविद्याविरुद्धत्वे प्रकाशितविरुद्धता ।
साकाङ्क्षता सहचरभिन्नता विध्ययुक्तता ॥२॥
अविशेषे विशेषश्चानियमे नियमस्तथा ।
तयोर्विपर्ययौ त्यक्तपुनःस्वीकृतता तथा ॥३॥
अयुक्तानुवादस्य ग्राम्यताश्लीलता तथा ।
एवमर्थेषु दोषाः स्युस्त्रयोविंशतिसङ्ख्यकाः ॥४॥

क्लिष्टत्वं कष्टत्वम् । ख्यातिः प्रसिद्धिः । तयोर्विपर्ययौ विशेषेऽविशेषः नियमेऽनियमश्च ।

तत्र

मुख्यार्थानुपकारित्वमपुष्टत्वं द्विधा च तत् ।
अत्यन्तानुपयोगित्वं तथा लब्धत्वमन्यतः ॥५॥

तदर्थोपस्थितिमन्तरेण प्रकृतार्थविघाताभाव इत्यपुष्टत्वमर्थस्य । तच्चात्यन्तानुपयोगित्वान्यथालब्धत्वरूपं भेदद्वयमवगाहते ।

उभयं यथा--

उष्णानल इव सुमुखीमालिङ्गति तां भवद्विरहः ।
रविकरविकसितकमलं यथा तदङ्गेषु भस्मसाद्भवति ॥६॥

अत्र 'नलः' इत्युक्तौ औष्ण्यप्रतीतेरुष्णशब्दोऽन्यथालब्धार्थो 'रवी'-त्यादिकमलविशेषणमत्यन्तानुपयोगि इत्येतदुभयमपुष्टार्थम् ।

अनुत्कर्षेण यस्त्यक्त उत्कर्षमधिरोप्यते ।

तत्रार्थे व्याहतत्वं स्यात्

'अनुत्कर्षेण' इत्युपलक्षणम् । उत्कर्षेणोपात्तो योऽनुत्कर्षं सोऽधिरोप्यते तत्रापि व्याहतत्वम् ।

प्रथमं यथा--

लोकानन्दनहेतवे जगति ते तिष्ठन्तु पाथोरुह-
श्रीखण्डद्रवचन्द्रिकेन्दुकलिकाचैत्रानिला निर्मलाः ।
अस्माकं तु सखे ! कलानिधिकला यत्सा दृशोर्गोचरं
याता, हन्त ! स एव सम्प्रति मम त्रैलोक्यराज्योत्सवः ॥७॥

यं प्रत्यनुत्कृष्टा चन्द्रकला स एव कलानिधिकलात्वमुत्कर्षमधिरोपयतीति व्याघातः ।

द्वितीयं यथा--

करोति चन्द्रिका सा मे मोदं नेत्रचकोरयोः ।
न पुनश्चन्द्रिकापूर्णशरत्पीयूषरोचिषः ॥८॥

अत्र येन चन्द्रिका उत्कर्षायोपात्ता तस्य चन्द्रिकानुत्कृष्टेति व्याहतत्वम् ।

कष्टत्वं च दुरूहता ॥९॥

स्पष्टम् ।

यैर्दृष्टा हिमकृत्सुताजलरुचिस्तेषां कलङ्काङ्कसां
यत्संवीक्षणमस्ति नैव तदभूत्तस्याः प्रभावोदयः ।
यैः पीता पुनरान्तरेण नयनेनात्यन्तसन्तोषिणां
तेषां किं न कवित्वकैरवकुलं लोके प्रकाशं व्रजेत् ॥१०॥

अत्र हिमकृत्सुता रेवा तज्जलरुचिर्यैर्दृष्टा तेषां कलङ्करूपपापानां यदवीक्षणं तत्कलङ्किनो विधोस्तत्पितुः न प्रभावः अपि तु तस्या एव । यैः पुनरान्तरेण चक्षुषा

पीता तेषां चन्द्रतनयाजलरुचिसम्बन्धात्कवित्वरूपकैरवकुलं किं न प्रकाशं व्रजेत् इति दर्शनेषु न चन्द्रस्य गुणस्तत्र रेवामाहात्म्यमेव पानेषु तस्य गुण इत्यर्थो दुरूहः ।

पुनरुक्तत्वमर्थस्य यत्रार्थस्य पुनर्ग्रहः ।

तत्तु द्विविधं पदार्थवाक्यार्थभेदात् । क्रमेण यथा--

रे रे पाप ! दशास्य ! तस्करपते ! रे मेघनादादयो !
वाणीमत्र शृणुध्वमुद्भटतमां सत्यामिमां सङ्गरे ।
आज्ञां श्रीरघुनन्दनस्य शिरसा लब्ध्वाद्य लङ्कामितो
युष्माभिः सह रावणेन सहितां द्रागुत्क्षिपाम्यम्बुधौ ॥११॥

अत्र 'रे रे दशास्य' इति 'युष्माभिः' इति चोक्ते सति रावणपदार्थः पुनरुक्तः ।

स्थितवति रणभूमौ सन्धुनाने धनुर्ज्यां
रजनिचरचयानामन्तके राघवेऽस्मिन् ।
अलमलमतिभीत्या रामभद्रे कपीन्द्राः !
समरभुवि सचापे किंभवं वो भयं स्यात् ॥१२॥

अत्र द्वितीयवाक्यार्थः पुनरुक्तः ।

निर्हेतुत्वं भवेत्तत्र हेतुर्यत्र न चोच्यते ॥१३॥

अर्थात् कार्ये कथिते हेत्वनुक्तिः । न च विभावनालङ्कारेऽतिव्याप्तिरिति वाच्यं, तत्र प्रसिद्धहेतुनिषेधो हेत्वन्तरविभावनमत्र तु हेत्वनभिधानमेव । यथा--

पूर्वं यस्य वधाय वानरपतेरग्रे प्रतिज्ञा कृता
श्रीरामेण वशं गतोऽपि समरे स त्वत्पिता रावणः ।
जीवन्नेव मयोज्झितो हनुमता काकुत्स्थभक्तात्मना
त्वामप्यद्य न हन्मि पश्य सपदि त्वं जीवलोकानिमान् ॥१४॥

अत्र रावणस्य हननाभावे हेतुरुक्तो न पुनरिन्द्रजितः। यद्यप्यत्र लक्ष्मण-प्रतिज्ञारूपहेतुविभावनं तथापि प्रसिद्धहेतुनिषेधाभावान्न तत्रातिप्रसङ्गः।

सन्दिग्धत्वं भवेत्तत्र यत्रार्थस्य तु संशयः।

यथा——

विज्ञाय प्रश्नतात्पर्यं निर्द्धारयतु कोविदः।
पादा गिरेः किमासेव्याः किं वा ललितयोषिताम् ॥१५॥

अत्र प्रकरणाभावे शृङ्गारी वक्ता किं शान्त इति सन्देहः।

लोकशास्त्रक्रमत्यागो दुःक्रमत्वमिहोच्यते ॥१६॥

लोकसिद्धक्रमत्यागात् शास्त्रसिद्धक्रमत्यागाच्च द्विविधमर्थस्य दुःक्रमत्वम्।
यथा——

हृदयेन्द्र! महाबाहो! लाजाविजयराजित!
राजती शतमुद्री मे कानकी वा प्रदीयताम् ॥१७॥

अत्र कानक्यभावे राजतीयाचनमिति लोकसिद्धः क्रमस्तस्य तु त्यागः।
यथा वा——

कारयित्वा सुतस्यैष यज्ञसूत्रपरिग्रहम्।
याति प्रष्टुं तिथिं विप्रो ज्योतिःशास्त्रविशारदम् ॥१८॥

अत्र शास्त्रविरुद्धक्रमत्यागः।

अस्थानयुक्तताथानामस्थान उपसंहृतिः।

यथा——

शम्भोः शस्त्रपरिग्रहः प्रतिपलं युद्धाभिलाषोदयो
वीर्यं संयति कार्तिकेयतुलितं क्रौञ्चाद्रिभेत्ता शरः।
तद्योगो भगवानयं भृगुपतिर्बाह्वोर्मैवानयो—
र्विप्रश्चेन्न भवेदहो! बलवतां तुल्यो महादुर्लभः ॥१९॥

अत्र 'विप्रश्चेन्न भवेत्' इत्येतावतैव समाप्ते वाक्यार्थे 'अहो बलवताम्' इत्यादिरस्थान एवोपसंहारः प्रकृतार्थप्रातिकूल्यमाचरतीत्यर्थस्यास्थाने

सम्बन्धः ।

भङ्गयन्तरनवीकारत्यागोऽर्थस्यानवीकृतिः ॥२०॥

यथा--

सर्वदा सहजो बन्धुः सर्वदा वाति मारुतः ।
सर्वदा दुर्जनो दुःखी सर्वदा सुजनः सुखी ॥२१॥

अत्र 'सर्वदा सर्वदा' इत्यनवीकृतत्वम् । न च कथितपदसङ्करः । अत्र पर्यायान्तरेणोपादानेऽप्यनवीकृतिस्तत्र तु पदाभेद इति भेदः । किञ्च कथितपदे निःप्रयोजनपुनर्वचनता इह तु बन्धुतादीनां दार्ढ्यरूपप्रयोजनसत्त्वात् । अतएव नार्थपुनरुक्तिः ।

यथोचितं तथोदाह्रियते—

सर्वदा सहजो बन्धुर्मारुतो वात्यहर्निशम् ।
न कदाप्यसुखी साधुः सततं दुःखभाक् खलः ॥२२॥

इत्यनया भङ्ग्या स एवार्थः प्रतिपादयितुमुचितः ।

देशादिभेदतः पञ्चविधा ख्यातिविरुद्धता ।

आदिशब्दात्कविलोकस्वभावकाला गृह्यन्ते ।

पृथिव्यां सारभूतास्ति मिथिला नाम सा पुरी ।
यत्रोद्यानधरा भाति कुङ्कुमस्तबकोद्गमैः ॥२३॥

अत्र मिथिलायां कुङ्कुमसम्भव इति देशविरुद्धता ।

चरणस्तव तन्वङ्गि ! कामदो नात्र संशयः ।
अङ्कुरो यस्य सम्बन्धी दृश्यतेऽशोकशाखिनि ॥२४॥

अत्र कामिनीपादप्रहारेणाशोकस्य कुसुमोद्गमः कविषु प्रसिद्धो न पुनरङ्कुरोद्गमः । लोकविरुद्धोऽपि कविप्रसिद्ध्या न दोषः ।

यथा मम भ्रातृचरणानां रघुदेवशर्मणाम्–

शैलाः कैलासलास्यं दधति जलधरास्तन्वते सौधसौख्यं
तालीशोभां वनाली वहति तुलयति स्वःपतीभं मदेभः ।
त्वत्कीर्त्या श्रीप्रतापस्फुरदमलरुचा जायते किञ्चिदन्यत्
क्षोणीन्दो ! क्षीरसिन्धोः परिणतसुषमां सागराः शीलयन्ति ॥२५॥

अत्रामूर्तायाः कीर्तेः सम्बन्धाज्जलधरादयो व्यक्तं धवलीभवन्तीति कवि-प्रसिद्धिः ।

न कर्तव्यैव मन्मुष्टाविन्द्रशूल इवात्मधीः ।
स्फोटयिष्यामि येनाद्य शक्रजित्तव मस्तकम् ॥२६॥

अत्र शक्रस्य शूलमस्त्रं लोकेषु न प्रसिद्धमिति लोकविरोधः ।

तथा व्यालोलिता भृङ्गैर्लतानां कलिकावली ।
मधुवृष्ट्या यथा मूले पूरयामास सारणीम् ॥२७॥

अत्र कलिकानां मधुबाहुल्यं स्वभावविरुद्धम् ।

माध्यपुष्पाणि सन्त्यज्य निपतन्ति समुत्सुकाः ।
मालतीस्तबके सद्यः शिशिरे समयेऽलयः ॥२८॥

अत्र शिशिरे मालतीकुसुमोद्गम इति कालविरुद्धम् ।

तत्तच्छास्त्रविरुद्धत्वं भवेद्विद्याविरुद्धता ॥२९॥

यथा–

ब्राह्मणः शास्त्रपाठेन गमयित्वाखिलं दिनम् ।
सन्ध्याकाले पितुर्यज्ञमेकोद्दिष्टं करोत्यसौ ॥३०॥

अत्रैकोद्दिष्टस्य श्राद्धस्य सन्ध्याकाले धर्मशास्त्रेण विधानं नोक्तम् ।

यथा वा—

मा गोपय सरोजाक्षि ! रहस्यं मम सन्निधौ ।
बिम्बाधरे तवैतस्मिन् दृश्यते नखरक्षतम् ॥३१॥

अत्राधरे नखरक्षतं कामशास्त्रविरुद्धम् । एवमन्येष्वपि शास्त्रेषु विरोधो विभावनीयः ।

प्रकाशितविरुद्धत्वं प्रकाश्यार्थविरुद्धता ।

यथा–

यथा दूरं व्रजत्येषा कीर्तिर्हृदयभूपतेः ।
तथा तथातिविस्तीर्णा गिरेरिव महानदी ॥३२॥

अत्रोपमया कीर्तेः सर्वव्यापित्वरूपः प्रकाश्यार्थो विरुध्यते । विरुद्धमतिकारितायास्तु शब्दस्य विरुद्धत्वमिह त्वर्थस्येति भेदः ।

अप्राप्तपदतात्पर्यगोचरप्रतियोगिता ॥३३॥
यत्रार्थस्य भवेत्तत्र साकाङ्क्षत्वं विदुर्बुधाः ।

अप्राप्तमनुपस्थितं यत्पदं तत्तात्पर्यगोचरान्वयप्रतियोगी यत्रार्थ इत्यर्थः । यथा–

क्रीडावेश्मनि कारितं नृपतिना द्यूतं स्वमध्ये पुन–
र्यद्गान्धारनृपेण तत्र रचितो व्याजस्ततोऽपि क्षमा ।
पाञ्चालीचिकुरावकर्षणमितस्तं चापमानं निजं
राज्यं चात्मसमं कथं नरपतिर्भीमाग्रजो मृष्यते ॥३४॥

अत्र राज्यमित्युपेक्षितुमित्याकाङ्क्षति ।

स्यात् सहचरभिन्नत्वं भणितिर्महता सहासतां यत्र ॥३५॥

इदमुपलक्षणम् । अमहता सह महतामभिधाने बोध्यम् ।

यथा–

हंसो मन्थरसञ्चारैः काकः शकुनसूचकैः ।
कोकिला मधुरालापैराचारैर्भाति भूसुरः ॥३६॥

अत्र हंसादिभिरुत्कृष्टैः सह काकस्य कथनम् ।

यथा वा–

तपात्ययेन मण्डूका मूषकाः सस्यवृद्धितः ।

मीना जलोदयात्सन्तो मोदन्ते तीर्थसन्निधेः ॥३७॥

अत्र मण्डूकादिभिरपकृष्टैः सह सतामभिधानम् ।

अविधेयस्य विधानं यत्र भवेत्तत्र विध्ययुक्तत्वम् ।

यथा—

पूर्वं यद् विबुधास्त्वया निजगृहाद् दुष्टेन विद्राविता
भग्नो यच्च वने वने प्रतिपलं व्यूढो मुनीनां मखः ।
सम्प्रत्युग्रतपस्विनीं यदहरः सीतामभीतस्ततः
पश्यानन्दितराघवो दशमुख ! त्वां सङ्गरे हन्म्यहम् ॥३८॥

अत्र 'त्वां हत्वा राघवमानन्दयिष्यामि' इति विधेयम् । अविमृष्टविधेयांशे तु पदयोर्व्युत्क्रमाद्विधेयस्य वैपरीत्येन विधानमिह त्वविधेयस्येति विशेषः ।

अविशेषे विशेषो यथा—

रे रे राक्षसराजपुत्र ! समरे मायावरुद्धोऽधुना
श्रीरामानुचरानिहोपहससि त्वां धिग्वृथा जीवितम् ।
किं नो वेत्सि हनूमता बलवता येषां पुरोगामिना
दग्धान्तःपुरगोपुरावधिपुरी लङ्कादय वः पश्यताम् ॥३९॥

अत्र 'येषामेकेन पुरोगामिना' इत्यविशेषो वाच्यो, न तु 'हनूमता' इति विशेषः ।

अनियमे नियमो यथा—

भीमस्ते युधि विक्रमो दिशि यशोराशिस्त्वदीयोऽर्जुन-
स्त्वत्सारोऽस्ति युधिष्ठिरो धनचयो नासत्यजन्माभवत् ।
कुन्ती योधगणः क्षितीश ! भवतः कृष्णैव केशावली
मन्ये पाण्डवमण्डलीपरिवृतो भूमौ भवान् वर्तते ॥४०॥

अत्र 'कृष्णैव' इति नियमाभिधानं न कर्तव्यम् ।

विशेषे सामान्यं यथा–

धम्मिल्लोपरि सन्निवेशय सितां मालामिमां यत्नतः
श्रीखण्डद्रवलेपनं कुरु कचे हारं हृदि स्थापय ।
वासस्त्वं परिधेहि भास्वरतमं चित्ते भयं मा कृथा
गच्छन्त्याः सरणौ निशैव सखि ! ते सर्वं समाधास्यति ॥४१॥

अत्र 'निशा' इत्यत्र 'ज्योत्स्नी' इति विशेषो वाच्यः ।

नियमेऽनियमो यथा–

यः क्षोणीपतिभिर्ललाटफलके सानन्दमाधीयते
यद्दानेन पुरन्दरप्रभृतयस्तुष्यन्ति नाकौकसः ।
तस्याद्य प्रियचन्दनस्य शबरीगेहान्तरे सौरभ-
श्रीखण्डीकृतनीरसेन्धनचये तत्रेन्धनत्वं वरम् ॥४२॥

अत्र 'सौरभमात्रश्रीखण्डीकृत' इत्यादिनियमो वाच्यः ।

नन्वनभिहितवाच्यत्वादस्य दोषस्य को भेदः । तत्रावश्यवक्तव्यानभिधानमिह तु तदेवेति चेत् न, अस्य दोषस्य पृथगभावे नियमानभिधानमेव नियामकम् । नन्वेवं सत्यनयोः शब्दार्थगतत्वे किं मानमिति चेत् । उच्यते । शब्दोच्चारणानन्तरमेवानभिहितवाच्यत्वस्य प्रतिभानम्, इह त्वर्थप्रत्ययानन्तरमिति भेदः । एवं चाधिकपदत्वादेरनियमपरिवृत्तौ विशेषो बोध्यः । यदाहुः–

'यो दोषः शब्दपरिवृत्त्यसहः स शब्ददोष एव । यश्च पदार्थान्वयप्रतीतिबोध्यः सोऽपि शब्ददोषः । यश्चार्थप्रतीत्यनन्तरं बोध्यः सोऽर्थाश्रयः ।' इति ।

त्यक्तपुनःस्वीकृतता यथा–

निजालयं धराधीश ! कीर्तिमारोपयाम्यहम् ।
नियोगं सत्वरं देहि तया स्तान्मे सितं गृहम् ॥४३॥

अत्र 'नियोगं सत्वरम्' इत्यादिना समापितमपि 'तया' इत्यादिना पुनः स्वीकृतम् । यथा वा–

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्सक्तोऽयं न किञ्चिद् गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिव गतेत्यम्बुधिं यस्य कीर्तिः ॥४४॥

अत्र 'विदितं तेऽस्तु' इत्यादिना समापितमपि 'तेन' इत्यादिना पुनःस्वीकृतम् ।

अनुवादस्यायुक्तता यथा—

सरोभूषण ! भृङ्गालिपरमप्रीतिवर्धन !
वियोगिप्राणकाल ! त्वं वद पद्म ! क्व सा प्रिया ॥४५॥

अत्र 'वियोगिप्राणकाल' इत्यस्यार्थो नानुवाद्यः ।

ग्राम्यता यथा–

तत्रैवास्तरणे भार्ये ! स्वपिम्यहमनुक्षणम् ।
तद्बहिः कुरु वासस्त्वमूरुयुग्मं विकासय ॥४६॥

अत्र ग्राम्योऽर्थः ।

अश्लीलता यथा–

वैदग्ध्यविदुषां पुंसां साङ्कुरस्य सुखावहा ।
यथा कर्कशता प्रायो न तथैवार्द्रता पुनः ॥४७॥

अत्र स्त्रीव्यञ्जनस्य प्रतीतिरित्यश्लीलता ।

इति श्रीमैथिलश्रीगङ्गानन्दकवीन्द्रकृतौ काव्यडाकिन्यां चतुर्थी दृष्टिः ।

पञ्चमी दृष्टिः

अथ रसदोषानाह—

स्वशब्देन रसस्योक्तिः सञ्चारिस्थायिनोरपि ।
परिग्रहो विभावादेर्विरोधिरसवर्तिनः ॥१॥
अतिकृच्छ्रादभिव्यक्तिरनुभावविभावयोः ।
अङ्गिनोऽननुसन्धानं तथा दीप्तिः पुनः पुनः ॥२॥
अकाण्डे प्रथनच्छेदावनङ्गपरिकीर्तनम् ।
अङ्गस्यात्यन्तविस्तारः प्रकृतीनां विपर्ययः ॥३॥
एतादृशो रसे दोषाः सुधीभिः परिकीर्तिताः ।

रसस्य रसशब्देन शृङ्गारादिशब्देन वा कथनं दोषः ।

यथा—

दरस्मेरसरोजाक्षीं पश्यतः पुरतो मम ।
विषयेभ्यो रसः कोऽपि न्यवर्तयत मानसम् ॥४॥
यदा हरिणशावाक्षी मदन्तिकमुपागता ।
सखे ! तदानीमभवं शृङ्गारमयमानसः ॥५॥

व्यभिचारिणः स्वशब्देन कथनं यथा—

आक्रम्य विषमं वर्त्म समायातापि सन्निधिम् ।
आलिङ्गने सलज्जाभूत् प्रियस्य मृगलोचना ॥६॥

अत्र 'सलज्जा' इत्यत्र 'विनम्रा' इति वाच्यम् ।

स्थायिनः स्वशब्दवाच्यत्वं यथा——

सीतापहारगर्विष्ठे रूक्षं जल्पति रावणे ।
बभूव समरे क्रोधः सद्यः पवनजन्मनः ॥७॥

अत्र क्रोधः स्थायी । रसाद्युपस्थितिरनुभावद्वारैव चमत्करोति न पुनः स्वशब्देनेत्यस्य दूषकताबीजम् ।

प्रतिकूलविभावव्यभिचारिग्रहो यथा–

नवघननिचिते गगने प्रणतिपरे प्राणनाथेऽस्मिन् ।
विधुमुखि ! भव प्रसन्ना न पुनः समुपैति निर्गतः समयः ॥८॥

अत्र शृङ्गारप्रतिकूलस्य शान्तस्यानित्यत्वप्रकाशनरूपो विभावस्तद्व्यञ्जितश्च निर्वेदो व्यभिचारी गृहीतः । निर्वेदस्य प्रातिकूल्यं शान्तस्थायित्वप्रतीत्यैव न तु शृङ्गारव्यभिचारित्वेन ।

प्रतिकूलानुभावग्रहो यथा–

प्रच्छन्ने दृक्पथंयाते दयिते गुरुसन्निधौ ।
सर्वं सद्मनि सन्त्यज्य वनं व्रजति सुन्दरी ॥९॥

अत्र सर्वसन्त्यागो वनगमनं च शान्तानुभावौ इन्धनाद्याहरणच्छलाभावात् शृङ्गारस्य प्रतिकूलौ ।

अनुभावस्य कष्टव्यक्तिर्यथा–

वहति पटीरसमीरे नवजलधरबन्धुरे नभसि ।
किञ्चिदुदञ्चिन्नयना दृष्टिपथं सा गता यूनः ॥१०॥

अत्र शृङ्गारस्य पटीरसमीरादिरूपोद्दीपनविभावनायिकारूपालम्बनविभावावनुभावापर्यवसायिनौ स्थिताविस्यनुभावस्य कष्टकल्पना । न च 'किञ्चि'दित्यादिनानुभावकथनमिति वाच्यम्, यन्निष्ठो रसस्तन्निष्ठानुभावस्य वक्तव्यत्वादिह तु नायकनिष्ठे रसे तन्निष्ठानुभावस्य कथनाभावात् 'किञ्चि'दित्यादिना नायिकानिष्ठानुभावकथनम् ।

विभावस्य कष्टव्यक्तिर्यथा–

बहुशो विलुठति मोहं व्रजति रतिं द्रागपाकुरुते ।
अयमतिविकलः सम्प्रति करोमि किं तन्न जानीमः ॥११॥

अत्र विलुठनादीनां करुणादावपि सम्भवात् कामिनीरूपस्य विभावस्यातिकृच्छ्रादभिव्यक्तिः ।

अङ्गिनोऽननुसन्धानं यथा रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सति सागरिकाया विस्मृतिः ।

दीप्तिः पुनः पुनर्यथा कुमारसम्भवे रतिप्रलापे ।

अकाण्डे प्रथनं यथा वेणीसंहारे द्वितीयेऽङ्केऽनेकसङ्क्षये वृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णने ।

अकाण्डे छेदो यथा वीरचरिते द्वितीयेऽङ्के राघवभार्गवयोर्धाराधिरूढेऽन्योन्यसंरम्भे 'कङ्कणमोचनाय गच्छामि' इति राघवस्योक्तौ ।

अनङ्गपरिकीर्तनं यथा मम मन्दारमञ्जर्यां राज्ञः स्वयं कृतं वसन्तवर्णनमनादृत्य बन्दिवर्णनप्रशंसनम् ।

अङ्गस्यात्यन्तविस्तारो यथा किरातार्जुनीये सुराङ्गनाविलासादिः ।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्ताः। वीररसप्रधानो धीरोदात्तः । रौद्ररसप्रधानो धीरोद्धतः। शृङ्गाररसप्रधानो धीरललितः । शान्तरसप्रधानो धीरप्रशान्तः । एते चोत्तममध्यमाधमाः । एतेषु यो यथाभूतस्तस्यान्यथावर्णने प्रकृतिविपर्ययो दोषः । अत एवानर्घराघवे रामायणसिद्धः प्रहर्ता श्रीरामस्तं परिहृत्य 'काणीचकार चरमः' इत्यादिना लक्ष्मणेन काकोपरि ब्रह्मास्त्रप्रयोगः कृत इत्युपनिबद्धम् । अन्यथा वीररसप्रधानस्य रामस्य तादृशकर्मवर्णने प्रकृतिविपर्ययो दोषः स्यात् ।

'एतादृशः' इति । कान्तापादप्रहारेण कान्तस्य कोपवर्णनादिरूपा इत्यर्थः । यथा—

नमयन्नेव मूर्धानं मनस्विन्या हतः पदा ।
अत्यन्तारुणदृक्कान्तो बभूव स्फुरिताधरः ॥१२॥

इत्यादि ।

पूर्वोक्तानपि दोषान्नातिक्रामन्त्यलङ्कृतेर्दोषाः ॥१३॥

'पूर्वोक्ता'निति । शब्दार्थगतानित्यर्थः । तथा हि—

प्रसिद्ध्यभावो वैफल्यं तथा वृत्तिविरोधिता ।
अनुप्रासगता दोषास्त्रय एते प्रकीर्तिताः ॥१४॥

अनुप्रासस्य प्रसिद्ध्यभावो दोषः प्रसिद्धिविरुद्धत्वेन गतार्थः । वैफल्यं पुनरपुष्टार्थत्वेन गतार्थम् । वृत्तिविरोधस्तु प्रतिकूलवर्णत्वेन लब्धार्थः । क्रमेण यथा—

करं किरीटी वदनं विवस्वान्
पदं पृथा चक्षुरपि क्षपेशः ।
रूपं रमा यस्य यमो यशांसि
स्तौति स्तवैः, सोऽस्तु हरिर्हिताय ॥१५॥

अत्रानुप्रासानुरोधेन स्तुतिः कृता, न पुनः पुराणादिना तथा कथितमस्तीति प्रसिद्धिविरोधः ।

करकलितकनककङ्कणनिक्वाणः कर्णयोरनयोः ।
सहचरि ! सहजमनोहरचरणे ! किं सौख्यमाख्याति ॥१६॥

अत्र विवक्षितविवेकेन वाच्यार्थस्य न कापि चारुतेत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम् ।

कष्टमिष्टेन संश्लिष्टा स्पष्टदष्टौष्ठसम्पुटा ।
दृष्ट्या निश्चेष्टयाचष्ट बिम्बौष्ठी नष्टचेष्टताम् ॥१७॥

अत्र श्रुत्युद्वेजकवर्णन्यासः शृङ्गारे न युज्यत इत्युपनागरिकावृत्तिविरोधः ।

हरिणायतनेत्राणां हरिणा वंशिकास्वनैः ।
हृते चित्ते बभूवुस्ता हरिणाननकान्तयः ॥१८॥

अत्र यमकस्य पादत्रयगतत्वेन यमनं दोषः, सोऽप्रयुक्तत्वेन गतार्थः। परिमाणजातिगतं न्यूनत्वमधिकत्वं वा यत्रोपमायामुपमानस्य तत्र सहचरभिन्नत्वं दोषः। क्रमेण यथा—

प्रालेयभूभृतः शैत्यमासीच्चन्दनबिन्दुवत्।
चाण्डाल इव कर्माणि कृतवानसि साम्प्रतम् ॥१९॥

रसातलसमा नाभिः सुमेरुसदृशौ स्तनौ।
भूचक्रसन्निभा श्रोणी त्रैलोक्यं तव जृम्भते ॥२०॥

चक्रवाकोऽयमध्यास्ते पद्मासन इवाम्बुजम्।

इत्यादावमहद्भिः सह महतां महद्भिः सहामहतां चौपम्याभिधानं सहचर-भिन्नत्वपर्यवसन्नम्।

उपमाप्रयोजकसाधारणाश्रयत्वे न्यूनाधिकत्वे न्यूनपदत्वाधिकपदत्वयोरन्तर्भवतः। क्रमेण यथा—

कर्णोल्लसद्भास्वरकुण्डलाभ्यां
नेत्राञ्जनेनास्यमिदं त्वदीयम्।
शरन्निशानाथ इवावभाति
पार्श्वस्थिताभ्यां गुरुभार्गवाभ्याम् ॥२१॥

अत्रोपमानस्य नेत्राञ्जनस्थानीयो लाञ्छनरूपो धर्मः केनापि प्रकारेण नोक्त इति हीनपदत्वम्।

तं पयोदमिव वीक्ष्य सशम्पं
वेपमानकमनीयकलापाः।
ताण्डवानि विदधुस्तरुखण्डे
दण्डकाननशिखण्डियुवानः ॥२२॥

अत्रोपमेयदिशि सीताया अनुपादानात् शम्पाग्रहणमतिरिक्तमित्यधिकपदत्वम्।

लिङ्गवचनभेदेऽपि उपमानोपमेययोः साधारणो धर्मश्चेदसाधारणः क्रियते, तदा तद्धर्मस्योपमानोपमेयान्यतरान्वयः। विशेषणसहितस्योपमानत्वमुपमेयत्वं वाध्याहारेणाप्यन्वयो धर्मस्य चेत्तदा तद्विशिष्टस्योपमानत्वादप्यस्फुटमित्येव क्रमभङ्ग इत्यस्य भग्नप्रक्रमत्वेऽन्तर्भावः।

यथा–

यत्तारुण्यतरङ्गिताम्बुजदृशो मध्यस्थलीवास्फुटं
यत्प्राणा इव कामिनोः कुलभुवोरद्वैतमभ्यागतम्।
अश्रान्ताकुलकान्तकेलिविगलत्काञ्चीत्रयं निर्गुणं
ज्ञेयं यन्न कुलाङ्गनाप्रणयवद्वन्दामहे तन्महः ॥२३॥

अत्र स्त्रीलिङ्गावरुद्धोपमाने 'अस्फुटम्' इति नान्वेति। 'अभ्यागतम्' इत्यस्यापि बहुत्वावरुद्धोपमानेऽनन्वयः।

यत्तु 'इष्टः पुन्नपुंसकयोः प्रायेण' इति सूत्रेण वामनाचार्येण लिङ्गवचनभेदस्यादोषत्वमुक्तं, तत्तिङन्तपदप्रतिपाद्यसाधारणधर्मान्वये बोध्यम्। तेन 'चन्द्र इव मुखं भाति', 'पास्यामि वदनं तस्याः पुष्पं मधुलिहो यथा' इत्यादि सङ्गच्छते।

श्लेषमर्यादया यत्र पदं साधर्म्यवाचकम्।
उभयान्वयि तत्रापि नास्य दोषस्य संस्थितिः ॥२४॥

'वाचा सुधामुचा भासि करेणेव सुधाकरः।'

इत्यादावुपमानोपमेययोर्लिङ्गवैषम्येऽपि 'सुधामुचा' इति विशेषणमुभयत्रान्वेतीत्यस्खलितैव धीरुत्पद्यते।

नीलरूपभृतः केशो निरानन्दितबर्हिणः।
दधते तन्वि ! ते शोभां नूतना जलदा इव ॥२५॥

अत्र 'दधते' इति रूपं दध्धारणधातोरेकवचनान्तं दधातेश्च बहुवचनान्तं भिन्नवचनयोरुपमानोपमेययोरन्वेति। एवं च 'नीलरूपभृतः' इति 'निरानन्दितबर्हिणः'

इति चोभे विशेषणे एकवचनान्तबहुवचनान्ते तयोरेवान्विते भवतः ।

कालस्य भेदो दोषोऽत्र भग्नप्रक्रमतां गतः ।

अत्र उपमानोपमेयप्रस्तावे । यथा–

'सरस्वतीव शरदि प्रससाद प्रिया तव ।'

इत्यादौ सरस्वती प्रसीदति न तु प्रससाद इति कालभेदो भग्नप्रक्रमतायां तिरोहितः ।

पुरुषस्य भवेद् भेदो विध्यादेश्च तथा मतः ॥२६॥

प्रथममध्यमोत्तमरूपस्य पुरुषस्याप्राप्तप्रापणरूपविधेश्च भेदो विस्खलितबोधजनकतया भग्नप्रक्रमान्तर्भावे मतः । क्रमेण यथा–

"अनया कान्तिच्छटया विद्युदिवाभासि कमलनेत्रे ! त्वम् ।"

इत्यादौ विद्युदाभाति न त्वाभासीति सम्बोध्यमानकामिनीनिष्ठमध्यमपुरुषभागोऽस्ति, तस्यासम्बोध्यमानविद्युद्विषयतया व्यत्यासात् पुरुषभेदः ।

"शेष इव भूमिभारं वहतु भुजस्ते धराधीश !"

इत्यादौ भूमिभारवहनविद्यमानत्वाच्छेषो भूमिभारं वहति न तु वहतु इति । अप्राप्तप्रापणरूपस्य विधेरभावात् । एवमादिरूपोऽर्थो यत्रोपमानगतत्वेनासम्भवी तत्रापि विध्यादिभेदो बोध्यः ।

ननूपमाप्रयोजकसाधारणधर्म एव कालादिभेदहेतुस्तस्मात्कालादिहेतुभिन्नं शाब्दमाक्षिप्यमाणं वा धर्मान्तरमुपादायोपमापर्यवसानं भविष्यतीत्यतो दोषत्वमेव नास्य, क्व पुनः पूर्वोक्तदोषेष्वन्तर्भावः । यत्र तु 'युधिष्ठिर इवायं सत्यवादी सत्यं वदति' इति अत्रातीतवर्तमानरूपकालभेदे सत्यपि सत्यवादित्वरूपेण समानधर्मेणोपात्तेनोपमाप्रतीतिरस्खलितैव । कालभेदस्य तत्राप्रयोजकत्वादिति चेत्, सत्यम् । परन्तु स्थितेष्वेतत्समर्थनं, न तु सर्वथा रमणीयम् । अथवा सहृदया एवात्र प्रमाणम् ।

उपमायामसम्भवोऽनुचितार्थत्वेन व्याप्तः । यथा–

भाति पाणितले तन्वि ! कस्तूरीशकलं तव ।
प्रातरुत्फुल्लपाथोजे तमःखण्डमिव श्रितम् ॥२७॥

अत्र प्रातःकाले पद्मे तमःखण्डावस्थानमसम्भवीत्यर्थोपनिबन्धनमनुचितम् । असादृश्यमुपमायामनुचितार्थत्वपर्यवसन्नम् । यथा—

त्वदीयं धरणीपाल ! दानपाथोजकारणम् ।
पश्यामि करकासारं खड्गशैवालशोभितम् ॥२८॥

अत्र दानस्य पाथोजेन, करस्य च कासारेण, खड्गस्य शैवालेन क्वचिदपि साम्यं नावगम्यत इत्यनुचितार्थता । ननु खड्गस्य शैवालस्य च न किञ्चित् सादृश्यमस्तीति चेत् न, करस्य कासारतुल्यत्वे सिद्धे खड्गस्य शैवालतुल्यता सिद्धयेत् । न हि करस्य कासारसादृश्यहेतुः कश्चिद् गुणः प्रतीयते येन खड्गस्य शैवालतुल्यता सिद्धयेत् ।

यद्यपि 'व्यनक्ति निन्दास्तोत्रे यत्' इत्यादिनानुचितार्थत्वस्य शब्दनिष्ठत्वेनाभिधानात्कथमनयोर्दोषयोस्तस्मिन्नन्तर्भावः, तथापि काललोकप्रसिद्धिविरोधावुपमायामनुचितार्थत्वेन व्यपदिष्टौ, न तु पूर्वोक्तानुचितार्थता ।

उत्प्रेक्षायामपि 'मन्येध्रुवेवादयः' शब्दाः सम्भावनं कर्तुं शक्नुवन्ति न तु यथाशब्दः । तस्य साम्यमात्रप्रतिपादकत्वात् साम्यस्यास्यामविवक्षितत्वादित्यवाचक दोषः ।

अयं भाति धराधीशः करवालभयङ्करः ।
रणे परिगृहीताङ्गः साक्षाद्वीररसो यथा ॥२९॥

उत्प्रेक्षितोऽप्यर्थो विविच्यमानः सन्नसत्कल्पतयोपाख्यानानर्हस्तत्समर्थनायार्थान्तरन्यासः क्रियते, स वामनकराकृष्यमाणश्चन्द्र इवात्यन्तमसत्य इत्यस्य निर्विषयत्वापुष्टार्थत्वरूपमनौचित्यम् । यथा—

रविदर्शनहर्षेण प्रोत्फुल्लं भाति पङ्कजम् ।

नूनं मित्रावलोकेन वर्द्धन्ते जगतां मुदः ॥३०॥

अत्राचक्षुषः पङ्कजस्य दर्शनमेव नास्ति कुतस्तज्जनितो हर्षः, कथं वा तत्समर्थनाय लब्धपदोऽर्थान्तरन्यासः स्यात्। तस्मादुत्प्रेक्षितोऽर्थो भासमानः सन्न काञ्चिदप्यनुपपत्तिमवगाहते किमर्थं तत्समर्थनाय यत्नः।

समासोक्तिरपि साधारणविशेषणमहिम्नोपमानविशेषमुपपादयति। तस्यात्र पुनरुपादानं पुनरुक्ततायामपुष्टार्थतायां वा पर्यवस्यति।

करेणालिङ्गति प्राचीं हरितं तिग्मरोचिषि।
निःप्रभेन्दुमुखी सद्यो बभूवापरदिग्वधूः ॥३१॥

अत्र तिग्मरोचिषः प्राच्याश्च लिङ्गविशेषमहिम्ना 'करेण' इत्यत्र च श्लेषमर्यादया नायकत्वादिप्रतीतिस्तथैवापरदिशः प्रतिनायिकात्वं भविष्यति किमर्थं वधूपदोपादानम्। ननु श्लेषे सत्युपमानोपादानस्यावश्यकत्वादन्यथा श्लिष्टपदोपादानप्रयासो व्यर्थः स्यादिति चेत्, मैवम्। यत्रोपमानोपादानं विना साधारणविशेषणमहिम्ना नोपमानप्रतीतिस्तत्र श्लेषोपमाया अवतारः। यथा—

पृथुलकुचा मदनवती तिलकयुता सालकाननोद्दीप्ता।
मदकलकोकिलवाणी मधौ वनीवाङ्गना जयति। ३२॥

एवमप्रस्तुतप्रशंसायामपि सामान्येन रूपेणोपमानप्रतीतौ सत्यामुपमानोपादानं दोषः, स चापुष्टार्थत्वेन पुनरुक्तत्वेन वा व्याप्तः। यथा–

कर्तुं वाञ्छति झिल्लिका परभृतालापानुकारं वने
जम्बूकोऽपि पराक्रमं मृगपतेः सम्प्राप्तुमाकाङ्क्षति।
भेको निन्दति गर्जितं जलमुचां प्रायः स्वकीयं बलं
जन्तुः क्षुद्रतरो न वेत्ति हिमकृत्स्पर्द्धीव खद्योतकः ॥३३॥

अत्र खद्योतस्याप्रस्तुतप्रशंसया सामान्यमुखेनावगतौ तदुपादानं व्यर्थम्। तदन्येषामेवंप्रायाणामप्यलङ्कारदोषाणां पूर्वोक्तदोषेष्वन्तर्भावो बोध्यः।

प्रसङ्गादाह—

क्वचिद् गुणत्वं दोषस्य क्वाप्यदोषत्वमुच्यते ।

'गुणत्वम्' इति मुख्यगुणानुकूलत्वात् दोषस्य गुणत्वव्यपदेश इत्यर्थः ।

वाच्ये समुद्धते व्यङ्ग्ये गुणः स्याच्छ्रोत्रकाटवम् ॥३४॥

समुद्धते वाच्ये सिंहादौ समुद्धते व्यङ्ग्ये रौद्रादौ श्रोत्रकटुत्वं गुणः । 'समुद्धते' इति काकाक्षिगोलकन्यायेनोभयत्रान्वयि । क्रमेण यथा—

रे शार्दूलगणा ! मनागपि भवद्वासोऽत्र न श्रेयसे
यूयं शूकरयूथपाः ! प्रियतमासार्थेन निर्गच्छत ।
चञ्चःक्रूरकटाक्षवीक्षणपरिक्षिप्तासुमत्तद्विप-
द्रोहोद्रेकनिरासससालसमितः पञ्चाननः क्रीडति ॥३५॥

अत्र सिंहे वाच्ये श्रोत्रकटुत्वं गुणः ।

दन्ताकृष्टविदष्टसास्थिपललव्रातातिनिर्यन्त्रण—
क्रूराक्रान्तिसमुद्भवत्कटकटत्कारक्रियाभैरवः ।
हस्तव्यस्तशवालिमस्तकसरन्मज्जाम्बुनिर्वापित—
प्रौढिप्राप्तचिताग्निरुद्धटतमः प्रेतोऽयमुज्जृम्भते ॥३६॥

अत्र बीभत्सरसे व्यङ्ग्ये गुणत्वं परुषवर्णानाम् ।

वैयाकरणे वक्तरि श्रोतरि वा श्रोत्रकाटवमदोषः ।

उभयं यथा—

व्रजन्तीमन्तिके काञ्चिदुदञ्चिन्नयनां सखे !
मृगचक्षुषमद्राक्षं निर्निमेषेण चक्षुषा ॥३७॥

अत्र वक्तृश्रोत्रोर्व्याकरणस्य सततासङ्गात् परुषवर्णा न श्रुत्युद्वेजकाः ।

न दोषो निहतार्थत्वाप्रयुक्तत्वे क्वचित् पुनः ॥३८॥

यथा—

नेत्रं यः कमलापतेर्जनयति प्रौढप्रमोदावली-
र्यः पाथोजगणेषु यः क्षितिभुजां बीजं जगद्विश्रुतः ।
यं छायापतिमूचिरे कृतधियो यश्चान्धकारापहः
सोऽयं सत्फलदायको हिमरुचिः पायादपायाज्जनान् ॥३९॥

अत्र हिमरुचिपक्षे पाथोजछायापतिशब्दौ निहतार्थप्रयुक्तौ न दुष्टौ ।

अश्लीलत्वं गुणः क्वापि

स्पष्टम् ।

शान्तोक्तौ--

दुर्गन्धिशटितक्रव्यसदृशे साधने स्त्रियः ।
रतिर्न दृश्यते प्रेतरङ्कादन्यस्य कस्यचित् ॥४०॥

यथा वा वेणीसंहारे--

निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥४१॥

अत्र दुर्योधनादीनां भाव्यमङ्गलसूचनम् ।

कामशास्त्रे गोपनीयं वस्तु नानार्थैः पदैः सूचनीयमिति राद्धान्तः । यथा वा कामशास्त्रे—

करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते ।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥४२॥

सन्दिग्धत्वं तथा भवेत् ।

'तथा' इति । प्रकरणवशाद् वाच्यविशेषनिर्णयाभावेन यत्र वाक्यस्य व्याजस्तुतिपर्यवसानं तत्र पदानां सन्दिग्धत्वं गुणो भवेदित्यर्थः ।

यथा—

विलक्षणगृहो लक्ष्मीपरिशीलनवर्द्धितः ।
विराजसे धरापाल ! भूतलेऽहमिव स्वयम् ॥४३॥

यथा वा—

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव !
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥४४॥

तत्त्वज्ञे प्रतिपाद्ये गुणो भवेदप्रतीतत्वम् ॥४५॥

यथा—

तमसा दृढपाशेन प्रतिरुद्धो भवान्तरे ।
कुतो रजःपरं सत्त्वमधिरोहत्वयं जनः ॥४६॥

अतिनीचस्वभावेषु ग्राम्यता गुण इष्यते ।

यथा—

फुल्लाइं ताइं रमणिज्जअराइं दाणिं
मल्लीतरूण(?)मह चित्तपिआइं होंति ।
रूएहि दुद्धदहिभत्तमणोहरेहि
कुंजाइं जाइं सहसा धवलीकुणंति[1] ॥४७॥

अत्र विदूषकस्योक्तौ दुग्धादिशब्दो ग्राम्यः ।

वर्णानां प्रतिकूलत्वं गुणत्वेन मतं क्वचित् ॥४८॥

1. This *gatha* may be rendered into Sanskrit in the following manner:-

पुष्पाणि तानि रमणीयतराणीदानीं
मल्लीतरूणां मम चित्तप्रियाणि भवन्ति ।
रूपैर्दुग्धदधिभक्तमनोहरैः
कुञ्जानि यानि सहसा धवलीकुर्वन्ति ॥

यथा--

रङ्गो ! रङ्कजनाय पङ्कजदृशो वृत्तान्तमाख्याहि मे
सा नालोकि मयेति शृङ्गचलनव्याजाद् ब्रवीषि स्फुटम् ।
वातोद्वेल्लितनीलनीरजदलोद्दामद्युतिद्रोहिणी
तद्दृष्टिर्यदि नेक्षिता निजदृशोः प्राप्तं चलत्वं कुतः ॥४९॥

अत्र 'मया नालोकि' इत्यनेन क्रुद्धस्य नायकस्योक्तौ दीर्घसमासत्वमुद्धतवर्णगुम्फश्च गुणः ।

न गुणत्वं न दोषत्वं नीरसेष्वस्य दृश्यते ।

यथा--

पक्षक्षेपणलक्षवन्दनपरैः प्रातः स्तुतः पक्षिभिः
क्षिप्रक्षीणतमोऽन्तरिक्षविलसत्क्षेमक्षमाच्छच्छविः ।
श्लिष्टाक्षुद्रकुलक्षणक्षितिजनाक्षैण्यप्रदो भास्करः
प्रक्षुब्धक्षणदाचरक्षयकरोऽक्षेमं क्षिणोतु क्षणात् ॥५०॥

नन्वत्र रविविषयकरतिभावोऽस्ति रसपदेन तस्याप्यभिधानादिति चेत्, सत्यम् । नीरसत्वं रसातात्पर्यकत्वमिह तु कवेरनुप्रासनिर्वाहे तात्पर्यसत्त्वात् ।

समाप्तपुनरात्तत्वं न दोषो न गुणः क्वचित् ॥५१॥

'क्वचित्' इति । यत्रान्यदेव वाक्यं विधीयते तत्रेत्यर्थः । यथा प्रागुदाहृते 'उद्दामद्युती'त्यादौ 'पाञ्चाली'त्यादेर्ग्रहणं वाक्यान्तरविधानाय न पुनर्विशेषणदानाय । यत्र तु समाप्ते वाक्यार्थे विशेषणं विधीयते तत्र दोषः ।

गुणः पतत्प्रकर्षत्वं कुत्रचित्तु निगद्यते ।

यथा पूर्वोदाहृते 'उद्दामद्युती'त्यादौ चतुर्थपादे रौद्ररसाभावादनुद्धता रचना गुणः ।

अर्थान्तरसङ्क्रमिते वाच्ये विहितस्य चानुवाद्यत्वे ॥५२॥
लाटानुप्रासार्थे कथितपदत्वं गुणो भवति ।

क्रमेण यथा–

नाट्यं नातिसुखं मदीयरसनारङ्गे रसास्वादन-
स्निग्धे लास्यनिधे ! बत प्रतिपदं वाणि ! स्खलन्त्यास्तव ।
उत्प्रेक्षातिशयोक्तिपूर्वकपदन्यासं पुनस्तन्वती
नृत्यस्यत्र यदा तदा भगवति ! स्यात्ताण्डवं ताण्डवम् ॥५३॥

अत्र द्वितीयताण्डवपदं लोकानुरञ्जकत्वलक्षणेऽर्थे सङ्क्रान्तम् ।

व्युत्पत्तिः काव्यहेतुः स्यादर्थः काव्यादवाप्यते ।
अर्थाप्त्या जन्यते कीर्तिर्जाता कीर्तिः स्वरास्पदम् ॥५४॥

अत्र काव्यादीनामुत्तरोत्तरं प्रति तदा कारणता निर्वहति यदि तेनैव पदेन सर्व-नामपदेन वा कथ्यतेऽतो विहितस्यानुवाद्यत्वे कथितपदत्वं गुणः ।

सुधारुचिरुचिद्योतिद्योतिलोकत्रये यशः ।
तव भाति धरापाल ! धरापालकृतानते ॥५५॥
न्यूनपदत्वं क्वचिदप्यदूषणं कुत्रचित्तु गुणः ॥५६॥

क्रमेण यथा—

एतद्वारिरुहं भवेत्पुनरितः पाथो न सन्दृश्यते
चन्द्रोऽयं हरते दृशौ दिशि सरत्यस्य प्रकाशोऽहनि ।
आनन्दः प्रकटीभवत्ययमितः सोऽमूर्तिमान् विश्रुतः
कान्तालम्बि मुखं किमेतदिति मे चेतो मुहुर्मुह्यति ॥५७॥

अत्रोत्तरवाक्यस्य पूर्ववाक्यनिषेधं प्रति हेतुत्वप्रतिपत्तये 'नैतद्यतः' इति पदानि न्यूनानि दातुमुचितानि, विशेषप्रतीत्यजनकतया पुनस्तानि नोपात्तानि अतो न गुणः । न वा पूर्वप्रतीतिमुत्तरा प्रतिपत्तिः स्थगयत्यतो न दोषः । बाध्यबाधकभावस्त्वर्थादेव लब्धः ।

गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।

'मा मा मानद ! माति मामल'मिति क्षामाक्षरोल्लापिनि
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥५८॥

अत्र 'माति' इत्यत्र 'पीडय' इति न्यूनपदस्य रसपोषकतया गुणत्वम् ।

गुणोऽधिकपदत्वं तु धीरैः कुत्रापि कथ्यते ।

यथा—

शिखिपिच्छधरः क एष भित्तौ
लिखितोऽस्तीति सखीजनेन पृष्टा ।
न न वक्ति परं तु वक्ति राधा
वपुरुद्यत्पुलकाङ्कुरच्छलेन ॥५९॥

अत्र द्वितीयं 'वक्ति' इति पदमन्ययोगव्यवच्छेदाय ।

यथा वा काव्यप्रकाशे—

वद वद जितः स शत्रुर्न हतो जल्पन् तव तवास्मीति ।
चित्रं चित्रमरोदीद्धा ! हेति परं मृते पुत्रे ॥६०॥

इत्यादौ हर्षशोकाद्याविष्टे वक्तरि अधिकपदत्वं गुणः ।

अपदस्थसमासत्वं गुणः कुत्रापि कथ्यते ॥६१॥

'रङ्को ! रङ्कजनाय पङ्कजदृशो वृत्तान्तमाख्याहि' इत्यादौ कुपितस्योक्तौ 'वातोद्वेल्लित' इत्यादिना समासविरचना गुणः ।

सङ्कीर्णत्वं गुणः क्वापि सुधीभिः परिगृह्यते ।

यथा—

त्वामेव पश्यति स्वप्ने ध्यायति त्वां च जाग्रती ।
सर्वदा सा कुरङ्गाक्षी जानीहि त्वत्परायणा ॥६२॥

अत्र 'जानीहि' इति दृढप्रत्ययोत्पादनाय गुणः ।

क्वाप्यपुष्टत्वमर्थानामदोषः परिकीर्तितः ॥६३॥

'अर्थानाम्' इति बहुवचनमविवक्षितम् । यथा—

कर्णावतंससंशोभी शिरःशेखरवानयम् ।
धनुर्ज्यालक्ष्मणा भूयः शोभते बाहुना रणे ॥६४॥

अत्र यद्यप्यवतंसादि कर्णाद्याभरणमेव तथापि कर्णशिरःशब्दाववतंसादेः कर्णादि-सान्निध्यप्रतिपत्त्यर्थम् । धनुःशब्दोऽप्यारूढिप्रतिपत्त्यर्थमुपात्तः । केवलस्तु ज्याशब्दो नारोहणप्रतिपत्तये । यथा—

गतं कुत्र दशग्रीव ! बाहोर्वीर्यं तदास्य ते ।
सहस्रबाहुना गाढं ज्याबन्धोऽस्मिन् कृतो यदा ॥६५॥

अत्र निरुपपदो ज्याशब्दः । एवं श्रवणकुण्डलपदमपि श्रवणसान्निध्यबोधनाय बोध्यम् । हारपदेन मुक्ताहार एवोच्यते, मुक्ताशब्दोपादानं हारस्य केवलमुक्ताघटितत्व-बोधनाय । तेन मुक्तापदप्रयोगः ।

'पुष्पमालेव बालेयं कस्य नामोद्वेतवे ।'

मालाशब्देन पुष्पशब्दस्य गतार्थत्वात् पुष्पशब्दोपादानं पुनरुक्तकुसुमप्रतीतये । केचित्तु 'जगाद मधुरां वाचम्' इत्यादौ 'जगाद' इत्यनेनावगतार्थस्यापि 'वाचम्' इत्यस्य 'मधुराम्' इत्यादिविशेषणदानार्थमुपादानमिच्छन्ति, तन्न । 'जगाद मधुरम्' इति क्रियाविशेषणेनोपपत्तौ 'वाचम्' इत्यस्य सर्वथानुपयोगः ।

यत्र तु गतार्थस्यापि क्रियाविशेषणेऽपि नान्वयस्तत्र विशेष्यस्य प्रयोगः कार्यः । यथा—

चरणत्रपरित्राणरहिताभ्यामपि द्रुतम् ।
पदाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते ॥६६॥

अत्र 'चरणत्रपरित्राणरहितं व्रजन्' इत्युक्ते सति तुरङ्गादिना गमनसम्भवे तात्पर्य-गोचरान्वयानुपपत्तेरवश्यं पादाभ्यामिति प्रयोज्यम् ।

ननु शैलाधित्यकाकरिकलभकरिबृंहिताश्वहेषामयूरकेकादिशब्दप्रयोगेष्वधित्यकादि-शब्दैर्गतार्थानां शैलादिशब्दानामपुष्टार्थत्वमिति चेत् न, अधित्यकादिषु दुरारोहत्वप्रौढि-गाम्भीर्यमांसलत्वमादकत्वादिप्रतीत्यर्थं शैलादिशब्दाः प्रयुज्यन्ते । नन्वेवं यथाकथञ्चि-

प्रयोजनसद्भावे कुत्रापि दोषो न स्यात् इति चेत्, सत्यम् । स्थितेष्वेतत्समर्थनम्, न तु सर्वथा रमणीयम् । जघनकाञ्च्यादिपदं कविभिरप्रयुज्यमानं कर्णावतंसादिवन्न समाधेयम् ।

शाब्दिके प्रतिपाद्ये तु न दोषः कष्टता भवेत् ।

यथा–

आवयोरिह समानरूपयोरेकशेषमपराविलोकनम् ।
चेद्व्यधत्त कृतधीर्विधिर्विधिर्द्वन्द्वहूतिमकरोत्तदा कुतः ॥६७॥
विश्रुतेऽर्थे निर्हेतुत्वमदोषः परिकीर्तितः ॥६८॥

यथा कुमारसम्भवे–

चन्द्रं गता पद्मगुणान्न भुङ्क्ते
पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥६९॥

अत्र 'न भुङ्क्ते' इत्यत्र रात्रौ पद्मनिमीलनं दिवसे चन्द्रस्य निष्प्रभत्वं हेतू, तयोश्च सुप्रसिद्धत्वादनुपादानं न दोषः ।

साकाङ्क्षत्वमदोषस्तु कुत्रचित्कथ्यते बुधैः ।

यथा–

मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ।
वज्रमिन्द्रकरविप्रसृतं वा स्वस्ति तेऽस्तु लतया सह वृक्ष ॥७०॥

अत्र 'अधाक्षीदभाङ्क्षीत्' इत्यादेरन्वयोऽध्याहारेणैव बोध्यः ।

सञ्चारिणः स्वशब्दोक्तिरदोषः परिकीर्तितः ॥७१॥

यथा 'औत्सुक्येन कृतत्वरा' इत्यादौ त्वरानुभावस्य भयादिनापि सम्भवेऽसाधारण्यं न प्रतीयतेऽत 'औत्सुक्येन' इत्युक्तम् ।

बाध्यत्वेनोदितो वैरी सञ्चार्यादिर्न दोषभाक् ।

आदिशब्दादनुभावविभावौ यथा–

संन्यासो वरमत्र मे विधुमुखी जायेत नेत्रातिथि-
श्चन्द्रं चूर्णय तप्तकाञ्चनलतातुल्यं तदीयं वपुः ।
काहं कुत्र पयोधरः खलवचो दुर्वारमाचक्षते
चाञ्चल्यं त्यज चित्त ! चञ्चलदृशोऽवस्था भवेत्कीदृशी ॥७२॥

अत्र निर्वेदौत्सुक्यामर्षस्मृतिवितर्कशङ्काधृतिचिन्तानां वैराग्यहेतूनामपि बाध्यत्वावगमाच्छृङ्गाराविरोधिनां 'भवेत्कीदृशी' इति चिन्तायामेव विश्रामः ।

मुहुर्मुहुः कम्पमानं कृशं पाण्डु वपुस्तव ।
कथयत्यत्र तन्वङ्गि ! रोगं किञ्चिद्भवद्गतम् ॥७३॥

अत्र रोगानुभावादीनां कम्पकार्श्यादीनां बाध्यत्वेनोपात्तानामनुपात्तानां वा प्रकृतरससाधारण्यान्न रसविघातकता ।

यत्र त्वनुभावस्यासाधारण्यं तत्र बाध्यत्वानवगमे दोषः ।

ममास्ति सर्वथा तन्वि ! सर्वत्र समदृष्टिता ।
परिहृत्य दृढं मानं प्रयच्छालिङ्गनानि मे ॥७४॥

इत्यादावनुभावस्य शृङ्गारविरुद्धस्य शृङ्गारे वर्णनमनुचितम् ।

सरोजनयनाः सौम्याः सत्यं सौम्यास्तु सम्पदः ।
मृणालीलतिकातन्तुनश्वरं किन्तु जीवितम् ॥७५॥

अत्र जीवनास्थैर्यं शान्तमेव पुष्णाति, अतो बाध्यत्वेनोक्तः शृङ्गारविभावस्तमेव पुष्णाति । तथा चात्र विरुद्धविभावोपादाने न दोषः ।

अनुकारे तु सर्वेषां दोषाणां स्याददोषता ॥७६॥

यथा–

अद्राक्षं पक्ष्मलाक्षीणां कटाक्षानहमित्ययम् ।
ब्रूते पुनर्गवित्याह पुनर्दैवत इत्यपि ॥७७॥

अत्र 'कटाक्षान्' इत्यन्तं श्रोत्रकटुत्वं, 'गो' इत्यत्र च्युतसंस्कृतित्वं, दैवतः' इत्यत्राप्रयुक्तत्वं च न दोषः ।

एवमप्यन्येषामालोचनीयमिति ।

इतिश्रीमैथिलश्रीगङ्गानन्दकवीन्द्रकृतौ काव्यडाकिन्यां पञ्चमी दृष्टिः ।

कुसुमसुरभिवृन्दारण्यसञ्चारशाली
रभस[1]रचिततालीभूतगन्धर्वमोक्षः ।
यदुकुलकमलालीकान्तिकृद्भानुमाली
वितरतु वनमाली मोदमन्तर्जनेभ्यः ॥१॥
'भानु'पौत्रीतनूजेन मिथिलादेशवासिना ।
शृङ्गारवनमालेयं 'गङ्गानन्देन' तन्यते ॥२॥

तत्र कृष्णाधिदैवतत्वेन कृष्णवर्णत्वेन[2]मुख्यकृष्णालम्बन[3]त्वेनोत्तमप्रकृतित्वेन (च) रसानां मध्ये श्रेष्ठः[4]शृङ्गारः, तस्यालम्बनं[5] नायिका निरूप्यते । यथासम्भवैर्नायकसाधारणगुणैर्युक्ता[6] नायिका । नायकगुणास्तु त्यागशीलादयः[7] । यथासम्भवैरिति विशेषणम[8]सम्भवदोषवारणाय । उदाहरणं यथा[9]—

तारा तारावलिरिह नभो नास्ति नैवात्र[10] भूयः
पाथः पाथोरुहयुगमिदं मौक्तिकं शुक्तिशून्यम् ।
राहोराहो न भजति भयं शीतभाः[11] शीतभानुः
चेतश्चेतोभवविधिरयं मोहयन्नभ्युदेति ॥३॥

एषा त्रिधा—स्वकीया परकीया सामान्या चेति । तत्र विनयार्जवगुरुशुश्रूषादिगुणयुक्ता गृहकृत्यपरायणा पतिव्रता स्वकीया यथा—

त्रपैकनिलयायते नयनवारिजातद्वयं
मुखे परुषभाषणव्यतिकरः खपुष्पायते ।

1 A reads 'वचन'
2 A reads it after 'मुख्यकृष्णालम्बनत्वेन'
3 A reads—कृष्णावलम्ब—'
4 A omits 'श्रेष्ठः'
5 A reads 'तस्यावलम्बनं'
6 A reads 'गुणयुक्ता'
7 A reads 'त्यागादयः'
8 The portion of the text between 'यथा' and 'सम्भवदोष' is missing in B.
9 Missing in A
10 B reads 'नेवात्र'
11 A reads 'स्फीतभाः'

प्रियप्रणयसञ्चयो मनसि वज्रलेपायते
कुलीनहरिणीदृशः प्रकृतिरीदृशी गीयते ॥४॥

एषापि त्रिधा—मुग्धा मध्या प्रगल्भा चेति। तत्राङ्कुरितयौवना[1]मुग्धा यथा—

स्नातुं[1a] याल्यधिनासिकं सुरभिताकस्तूरिकासम्भवा
गन्तुङ्कण्ठनदोपकण्ठमचिराद् वीणारवो वाञ्छति।
वक्षः पीठमुपैतुमिच्छति रुचिः सौमेरवी सुभ्रुवः
तज्जाने[2] नवयौवनस्य भविता सङ्क्रान्तिरन्तस्तनोः ॥५॥

यथा वा[3]—

एतस्यास्तनुपत्तनं प्रविशतस्तारुण्यभूमीपते-
स्त्रासेन श्रवणद्वयस्य शरणं निर्याति नेत्रद्वयी।
दृक्कोणाश्रयणं करोति सहसा[4] दृष्टिक्रियाविक्रिया
चाञ्चल्यं चरणस्य हन्त! हरते मध्यः परिक्षीयते ॥६॥

यथा वा—

शिशुतामथ यौवनं तनौ तव कल्याणि! विनिश्चिनोतु कः।
रजनेरथ वासरस्य वा नहि सन्ध्यासमये विनिर्णयः ॥७॥

इयमेव बाल्ययौवनयोस्समप्राधान्येन मुग्धा वयस्सन्धिमतीति गीयते। मुग्धैव च भयलज्जाभ्यामन्यायत्तरतिर्नवोढा कथ्यते। यथा—

आहूतापि निरन्तरं वहुविधव्याजान्न विस्पन्दते
काकुव्याकुलयार्थितापि च गिरा गेहाद् विनिर्गच्छति[5]।
जानीमः स्वयमेति तस्य शयनोपान्तं नवोढाङ्गना
स्वर्णाद्रेः पतितां प्रतीपसरणिं[6] यो वाहयेत्स्वर्धुनीम्[7] ॥८॥

1 B reads '—तारुण्या' for '—यौवना'

1a A reads 'स्थातु'

2 A reads 'तद् जाने'

3 Missing in A

4 B reads 'सरसा'

5 B reads 'बहिर्गच्छति'

6 B reads '-सकल'

7 B reads 'स्वस्तनीम्'

इयमेव च सप्रश्रया[1] विश्रब्धनवोढेति[2] गीयते । यथा–

नम्रीकृतास्यकमलं[3] दरलम्बमान-[4]
प्रान्ताव[5]गुण्ठनपटं सित[6]मीलिताक्षम् ।
नीवीनियुक्तकरपल्लवमीषदङ्घ्रि-[7]
न्यासं कदा स्वय[8]मुपैष्यति मां मृगाक्षी ॥९॥

मुग्धाया द्वौ भेदौ–अज्ञातयौवना ज्ञातयौवना च । तत्राज्ञातयौवना यथा–

उरःश्वयथुना पृथु प्रतिदिनं प्रवर्द्धिष्णुना
महानहह दृश्यते मम तु मध्यदेशः कृशः ।
रुजा किमहमाश्रितेत्यधिकमुद्भ्रमन्ती हृदा
भिषग्भवनपद्धतिं विधुमुखी सखीं पृच्छति ॥१०॥

ज्ञातयौवना यथा–

व्रजन्ती खिद्यसे कस्मादिति पृष्टा वयस्यया ।
अङ्गुलीसंज्ञया तन्वी तुङ्गौ दर्शयति स्तनौ ॥११॥

केचित्तु प्रथमावतीर्णयौवना, प्रथमावतीर्णमदनविकारा, रतौ वामा, माने मृदुः, समधिकलज्जावती चेति मुग्धायाः पञ्चभेदान् वदन्ति ।

तत्र प्रथमावतीर्णयौवना यथा–

'एतस्यास्तनमुपत्तनं प्रविशत' इति[9] पूर्वश्लोकः ।[10]

प्रथमावतीर्णमदनविकारा यथा–

1 A reads 'प्रश्रयाद्'
2 B drops 'इति'
3 B reads 'शकलं'
4 A reads '–युग्म'
5 B reads '–प्राप्ता—'
6 B reads 'मित–'
7 A reads '—दङ्ग—'
8 B reads 'सुर–'
9 B reads 'इत्यादि'
10 *vide supra* verse No 6

श्रीखण्डशैलसुहृदः पवनास्त एव
ता एव वारिजवनीसुभगाः सरस्यः ।
ता एव कोकिलगिरः सखि ! जायते मे
चेतः कुतोऽन्यदिव सम्प्रति तन्न विद्मः ॥१२॥

रतौ वामा यथा–

'आहूतापि निरन्तर' मित्यादि पूर्वश्लोकः ।[1]

माने मृदुर्यथा–

कृतापराधे दयिते विधातुं
जानाति नो मुग्धतयाभिमानम् ।
करं कपोले विनिधाय मुग्धा
परन्तु सा रोदिति निःश्वसन्ती ॥१३॥

अतएव मानावस्थाभेदेन मुग्धाया न धीरत्वादिभेदो मानस्यातिचातुर्य्यसाध्यत्वात्, मुग्धत्वदशायां तस्याश्चातुर्य्याभावात् । धीरत्वमधीरत्वं च[2] माननियतम्, मुग्धायास्तु मानो नास्त्येवेति युक्तमाहुः[3] कविचक्रवर्तिश्री[4] भानुदत्तमिश्रचरणाः ।

समधिकलज्जावती यथा—

'नम्रीकृतास्यकमल' मित्यादिपूर्वश्लोकः ।[5]

न चास्याः मध्यमायामन्तर्भावः, मध्यमव्रीडाया अभावात् । नापि प्रगल्भाया-मन्तर्भावः, ईषद्[6]व्रीडाया अभावात् ।

समानमदनमन्दाक्षा मध्या[7] यथा—

मदनो दहत्यगमने
गमने लज्जाधनापहारः स्यात् ।

1 *vide supra* verse No 8
2 Missing in A
3 Missing in A
4 In B the letter श्री comes just before 'कवि–'
5 *vide supra* verse No 9
6 B reads तावद्-
7 Missing in A

इति चिन्तया मृगाक्षी
गन्तुमगन्तुं प्रियान्तिकं चकमे ॥१४॥

केचित्तु, विचित्रसुरता, प्ररूढस्मरा, प्ररूढयौवना, ईषत्प्रगल्भ[1]वचना, मध्यमव्रीडिता चेति मध्यायाः पञ्च भेदानाहुः ।

तत्र[2] विचित्रसुरता यथा–

प्रणयिनि परिरम्भव्यापृते[3], पञ्चबाणे
सपदि मिथुनमेकीकर्तुकामे निकामम् ।
पुलकपटलसूचीचीर्णवेधव्यथाभिः
समजनि किमजस्रं सीत्कृतिः कोमलाङ्ग्याः ॥१५॥

प्ररूढस्मरा यथा–

स्मितलवशवली[4]कृताधरान्तं
नमितमुखो[5]न्नमिताक्षिपक्ष्म(भ्र)पत्रम् ।
किमपि यदकृतेङ्गितं मृगाक्षी
तदिह मनो मम हन्त कृन्ततीव ॥१६॥

प्ररूढयौवना यथा –

हास्यं लास्यमुरीकरोति लसतः[7] पद्मस्य पद्मालयां
दृग्द्वन्द्वं हरते हिमांशुसुषमासारं मुखं लुण्ठति ।
पाणिः पल्लवतुल्यतां कलयते वक्षोरुहः क्षोणिभृत्–
कान्तिं कर्षति किञ्च वर्षति वपुर्विद्युत्प्रभां सुभ्रुवः ॥१७॥

ईषत्प्रगल्भ[8]वचना यथा –

1 A reads '–प्रलम्भ–' 2 Missing in A 3 A reads 'परिरम्भ'
4 A reads 'शरणी–' 5 A reads 'मुखा–' 6 A reads 'मे'
8 A reads 'प्रलम्भ' 7 A reads 'पयसः'

रागोऽस्ति ते मनसि मद्विषयो न वेति
यः संशयो मम निपीडयतिस्म चेतः ।
नाथ ! त्वदीयनयने नयतानुरागं
स व्याहतो[1]ऽद्य कृतिना तव जागरेण ॥१८॥

मध्यमव्रीडिता यथा–

'मदनो दहत्यगमने' इत्यादि पूर्वश्लोकः ।[2]

पतिमात्रविषयकसकलकलाकुशला[3] प्रगल्भा । परकीयासामान्ययोः पतिमात्रविषयककलाकुशलत्वाभावान्मुग्धामध्ययोस्सकलकलानैपुण्याभावान्नातिव्याप्तिः । सा द्विविधा[4]– आनन्दसम्मोहवती प्रियरतिश्च । (तत्र) आनन्दसम्मोहवती यथा –

आराद्भ्यागतवति हरौ नीविबन्धेन साकं
सद्यः सैषा मम समभवद् विश्लथा देहयष्टिः ।
स्पृष्टे पाणावथ मुरजिता यस्त्वदात्तोपदेशः[5]
स्वात्मेवासौ[6] सहचरि ! मया विस्मृतः, किङ्करोमि ॥१९॥

प्रियरतिर्यथा –

क्वाणं कुर्वति कुक्कुटे मृगदृशः शेषं समालिङ्गनं
कृत्वा चुम्बनमादुवाय (?) वरं[7] प्रातःप्रयाणोद्यतम् ।
द्राक्कर्णोत्पलनिस्सरन्मधुकरत्रासाभिनीतिं[8]तनौ
तन्वाना शरदिन्दुसुन्दरमुखी सा कृष्णमालिङ्गति ॥२०॥

केचित्तु, स्मरान्धा, गाढतारुण्या, समस्तरतविचक्षणा, भावोन्नता, दरव्रीडा,

1 A reads 'व्याहृतो'
2 *vide supra* verse No 14
3 A reads 'पतिमात्रसकलविषयकुशला'
4 A reads 'द्विधा'
5 A reads only 'दत्तोपदेशः'
6 A reads 'स्वात्मैवासौ'
7 B reads–'साहचर्यचरम'
8 A reads '–नीतिस्तनौ'

आक्रान्तनायका चेति[1] प्रगल्भायाः[2] षड् भेदानाहुः ।

तत्र[3] स्मरान्धा यथा –

'आरादभ्यागतवति' इत्यादि पूर्वश्लोकः ।[4]

गाढतारुण्या यथा –

एतस्याः करपल्लवस्य रुचिभिश्शोणं समीक्ष्याम्बरं
मध्याह्नेऽपि रथाङ्गनामयुगलं सन्ध्याधिया सीदति ।
किञ्च प्राञ्चति यत्र यत्र भवती तत्राङ्गदीप्त्या पुनः
सर्वं वस्तु सुवर्णनिर्मितमिव प्रेक्ष्यं किमाचक्ष्महे ॥२१॥

समस्तरतविचक्षणा यथा –

कन्दुकमिव कुचयुगलं चामरमिव चिकुरसम्भारम् ।
नर्त्तयति यत्र बाला तदिह मनो मे न विस्मरति ॥२२॥

यथा वा –

लोला तारावलीयं किल कनकमयः कम्पते भूधरोऽयं
ध्वान्तस्तोमोऽधिसोमं विहरति धरणौ विद्युदान्दोलमेति ।
मुक्ताजालैः समन्तादुपरिपरिवृतः शीतभानोर्हि भानुः
पुष्पेषोरेष सद्यः समुदयति महानिन्द्रजालप्रकारः ॥२३॥

यथा वा

मुक्तावली विगलितोषसि दृश्यमाना
चेतस्तथा न खलु पीडयति प्रियायाः ।
आरभ्यमाणरतिताण्डवडिण्डिमस्य
हेतुर्यथा हतगुणो रसनाकलापः ॥२४॥

भावोन्नता यथा–

1 B reads '–चैताः'
2 Missing in A
3 Missing in A
4 *vide supra* verse No 19

सुमुखि ! सुमनःप्रायैरेतैः स्मितैरमृतायितै[1]-

र्ललितलपितैः कृष्णाकारैर्दृगन्ततरङ्गितैः ।

अलसगमनैर्हंसाभीतैर्हराक्षिहुताशनै-

र्हतमपि पुरा कामं कामं करोषि[2] सजीवितम् ॥२५॥

दरव्रीडा यथा–

'क्वाणं कुर्वति' इत्यादि पूर्वश्लोकः ।[3]

अत्र त्रासाभिनयादेवेषल्लज्जाऽवगम्यते[4] ।

इयमेव चाक्रान्तनायका । न चैकस्या एव कथम्भेदद्वयमिति वाच्यम्, अवस्थाभेदेन नायिकाया भेदात् ।

मध्याप्रगल्भयोर्भेदान्तराण्याह—मध्या धीरा, मध्याऽधीरा, मध्या धीराधीरा[5], प्रगल्भा धीरा, प्रगल्भाऽधीरा, प्रगल्भा धीराधीरा चेति मानावस्थायां षड् भेदाः ।

व्यङ्ग्यकोपप्रकाशा[6] धीरा, अव्यङ्ग्यकोपप्रकाशा[7] अधीरा, व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा धीराधीरा[8] । तत्र

मध्या धीरा यथा–

विभाति वैभातिकसूरसूत-

कराकराक्रान्तसरोजशोभाम् ।

वहन्निशाजागरजातराग-

कृतास्पदं सम्प्रति[9] लोचनन्ते ॥२६॥

मध्याऽधीरा यथा–

1 B reads '–त्रायतैः'
2 A reads 'करोति'
3 *vide supra* verse No 20
4 A drops 'त्रा', 'ईषत्' and 'ऽव'
5 B reads 'व' just after it.
6&7 A reads '–प्रकाशिका'
8 'व्यङ्ग्या ˙˙धीराधीरा' missing in A
9 Missing in A

आयासो गमनादभूत्तव तनौ खेदो मया प्राप्यते
स्नानं[1] शीतसरस्वतीषु तव मे बिम्बाधरः कम्पते ।
भ्रान्तं कण्टकिकाननेषु[2] भवता दीर्णं मदीयं मन-
श्चित्राच्चित्रतरं विधातुरधुना निर्माणमालोक्यते ॥२७॥

मध्या धीराधीरा यथा–

विद्या[3]विवेकविमलीकृतमानसस्य
दाक्षिण्यरक्षणवतो भवतो बुधस्य ।
युक्तं चरित्रमिति वाचमुदीर्य बाला
कोष्णीचकार पृथुनिःश्वसनै[4]र्गृहान्तः ॥२८॥

प्रगल्भा धीरा यथा–

अद्याहूत[5]विधौ न विच्युतिरभूद्वाणी न वान्यादृशी
न स्पन्दोऽधरपल्लवे नयनयोः कोणे न शोणद्युतिः ।
पश्चादेत्य मया करेण नयने पर्यावृते कौतुका-
दस्मेरेण मुखेन कोमलतनोः कोपः समुन्नीयते ॥२९॥

प्रगल्भाऽधीरा यथा–

लक्ष्मीसहोदरमणिं समुदीक्ष्य कण्ठे
कृष्णस्य कोकनदतुल्यमुखी बभूव ।
पश्चाद् विभूषणचयं परिकृष्य देहात्
तत्याज देहपुरतो बत सत्यभामा ॥३०॥

प्रगल्भा धीराधीरा यथा—

1. A reads 'स्थानं'
2. B reads 'च' in lieu of 'ष'
3. A reads 'विश्वा—'
4. B reads '–निःश्वसितै–'
5. B reads '–कृत'

सान्निध्यं समुपागते मयि परावृत्य स्थितं कान्तया
सद्यस्तन्मुखसम्मुखं करपुटीमादाय यातं मया ।
भूयःपद्मदृशा कुसुम्भकुसुमस्पर्द्धासमृद्ध्या लसत्
सिन्दूरद्रवसिन्धुबन्धुरुचयः स्पष्टीकृता[1] दृष्टयः ॥३१॥

एते षड् भेदा ज्येष्ठाकनिष्ठाभेदेन द्वादशविधाः[2] । मध्या धीरा ज्येष्ठा, मध्या धीरा कनिष्ठा, मध्याऽधीरा ज्येष्ठा, मध्याऽधीरा कनिष्ठा, मध्या धीराधीरा ज्येष्ठा, मध्या धीराधीरा कनिष्ठा, प्रगल्भा धीरा ज्येष्ठा, प्रगल्भा धीरा कनिष्ठा, प्रगल्भाऽधीरा ज्येष्ठा, प्रगल्भाऽधीरा कनिष्ठा. प्रगल्भा धीराधीरा ज्येष्ठा, प्रगल्भा धीराधीरा कनिष्ठा चेति । भर्त्तुः परिणीतत्वे सत्यधिकप्रेमभाजनं ज्येष्ठा । भर्त्तुः परिणीतत्वे सत्यल्पप्रेमभाजनं कनिष्ठा । परिणीतत्वे सतीति विशेषणात् साधारणीषु परकीयासु वा[3] नातिव्याप्तिः । धीरा ज्येष्ठा कनिष्ठा च यथा—

एकस्मिन् भवने स्थिते प्रियतमे दृष्ट्वा समाहूतवान्
सद्यःखञ्जनदर्शनाय दयितो हस्तार्कयोगच्छलात् ।
एकामङ्गुलिसंज्ञया विधुमुखीं तं दर्शयन् प्रेयसी-
मन्यां वक्षसि संस्पृशन् करतलेना[4]नन्दमाविन्दति ॥३२॥

अधीरा ज्येष्ठा कनिष्ठा च[5] यथा—

अन्तःकोपकदुष्णतामुपगते कान्ते समालोकयन्
प्रत्यग्रा[6]म्बुदघोरणीभिरभितो व्याप्ते विहायस्थले ।
एकामेककरेण बन्धुरबकश्रेणीं प्रियो दर्शयन्-
नन्यस्याः स्पृशतापरेण[7] चिबुकं हस्तेन हृष्टोऽभवत् ॥३३॥

1. A reads -स्वयपिष्टी-
2. B reads '-भेदाः'
3. Missing in A
4. A reads 'सानन्द-'
5. Missing in A
6. B reads 'प्रत्यश्रा-'
7. B reads 'करेण'

धीराधीरा ज्येष्ठा कनिष्ठा च यथा–

रूक्षारूक्षवचःप्रकाशपरयोर्वक्रीकृतग्रीवयोः
प्रेयस्योर्मणिकुण्डलानि दयितः सन्तोषहेतोर्दधत् ।
एकस्याः श्रवसोऽवतंस[1]युगलं धृत्वा च[2] तत्सम्मुखे[3]
न्यस्यादर्शमथापरां कुचयुगे बालां करेणास्पृशत् ॥३४॥

मध्याप्रगल्भयोर्भेदा द्वादशात्र प्रकीर्तिताः ।
मुग्धा त्वेकैव, तेन[4] स्युः स्वीयाभेदास्त्रयोदश ॥३५॥
परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।
पर[5]कीयाऽन्यपुरुषाऽव्यक्तरागोदिता बुधैः ॥३६॥
कन्या त्व[6]जातोपयमा सलज्जा नवयौवना ।
पित्राद्यधीनतायोगात्परकीया तु कन्यका ॥३७॥
विदग्धा लक्षिता गुप्ता मुदिता कुलटा तथा ।
रुषिताऽनुशयानाद्याः परोढान्तर्गता इमाः ॥३८॥

परकीया यथा–

वंशीवादनलीला सखि ! कुलशीलानि खण्डयति ।
किमतःपरं चरित्रं वच्मि विचित्र[7] शिशोर्यशोदायाः ॥३९॥

विदग्धा द्विविधा–वाचिकविदग्धा क्रियाविदग्धा चेति । तत्र[8] वाचिकविदग्धा यथा–

श्वश्रूरतिथिविरक्ता मद्भवने तन्न ते[9] वासः[10] ।
अच्छे नार्मदकच्छे[11] पथिको वसतीति जानीमः ॥४०॥

1 A reads 'श्रवसोर्वतंस–'
2. B reads 'ऽथ'
3. A adds 'ऽ' just after it.
4 A reads 'त्वेकेनैव'
5 A reads 'स्व' in lieu of 'पर'
6 A reads '–त्वे'
7 A reads 'चित्रं'
8 The portion from 'विदग्धा' to 'तत्र' is missing in A.
9 A reads 'तनुते'
10 A reads 'वाच्यः'
11 A reads 'कक्षे'

क्रियाविदग्धा यथा—

अधिवटतटं गृहेशे पथिकनिवासं समादिशिति ।
लाजं पयश्च तन्वी सुखातविवरान्तिके क्षिपति[1] ॥४१॥

लक्षिता लक्षिते प्रेम्णि त्रासो यस्या न विद्यते ।

परेण प्रेम्णि लक्षिते यस्या न त्रासः सा लक्षितेत्यर्थः ।

यथा[2]–

सकलजनसिद्धमेतद्धाव्यर्थो भवत्येव ।
गुरुवैरी प्रतियोगी यत्र कथं तत्र जायते गुप्तिः ॥४२॥

यथा वा–

श्वश्रूश्श्रुचयं विमुञ्चतु पतिः पीडाकरस्ताडनै
र्भूयाद् भूरिरुषा विषादमनिशं दद्यादसौ देवरः ।
उत्साहं मम कुत्सया खलजनाः कुर्वन्तु सर्वे पुनः[3]
किं कार्यं सखि ! गोपनेन मम तु प्राणाधिको माधवः ॥४३ ॥

गुप्ता त्रिधा––वृत्तसुरतसङ्गोपना, वर्तमानसुरतसङ्गोपना, भविष्यत्सुरतसङ्गोपना चेति । त्रितयं यथा–

आलिर्गालिशतं ददातु तनुतां निन्दां ननन्दा मम
प्राणान् पीडयतु प्रियः परिभवं कुर्वन्तु मद्बान्धवाः ।
किन्त्वस्योपवनस्य पुष्पहरणे नो यामि यत्राधुना
पश्यायं मम खण्डितो मधुकरैर्बन्धूकबुद्ध्याऽधरः ॥४४॥

क्रीडानुकूलमर्थं या श्रावयत्यन्तिकस्थितम् ।
मोदते सात्त्विकैर्भावैर्युक्ता सा मुदिता मता ॥४५॥

अन्तिकस्थितं नायकं वृत्याद्य[4]न्तरितमित्यर्थः । यथा–

1 A reads 'तत्र मुखात् विवरान्तिकेऽक्षिपत्तन्वी ।' 2 Missing in A
3 B reads 'जनाः' 4 A reads 'वृत्याय' while B reads 'वृत्ताद्य'

माता[1] नयनविघाता बन्धुर्वृद्धः पतिः प्रसन्नान्धः ।
इति जल्पन्त्यास्तन्व्याः[2] प्राप पदं वचसि वैस्वर्यम् ॥४६॥

विगलितत्रपा कुलटा यथा[3]—

यावन्तोऽपि ममा[4]नयोर्नयनयोरर्थान्तरागोचरा-
स्तावन्तोऽपि जगत्सृजा[5] ससृजिरे नो चेन्नराः पूरुषाः ।
सर्वेऽमी समयास्तमस्तति[6]मया नो चेद्बभूवुस्तदा
धिग्दैवं कुलटाकुलेष्वविरतं[7] मातः ! कलङ्कास्पदम् ॥४७॥

यथा[8](वा)—

नियतं तिमिरमयो नहि समयः
सखि ! न भवेदधिकपुन्निचयः ।
भूरवनीबन वा(?)रतिशय्या
भजतु कथं कुलटा गतलज्जा[9] ॥४८॥

स्वमध्ये कलहच्छद्म कृत्वा सङ्केतमन्दिरम् ॥४९॥
प्रयाति कोपयुक्ता या रुषिता सा प्रकीर्तिता[10] ।

रुषिता[11] यथा—

विरचय्य[12] कपटकलहं विपक्षसुदृशा समं सुमुखी ।
व्यालोलमधुपमालं[13] बहलतमालं वनं विशति ॥५०॥

1 B reads 'याता' 2 A reads 'तस्याः' whereas B reads 'तन्व्या'
3 Missing in A 4 A reads 'समा—'
5 A reads 'जगत्सृजां' 6 A reads 'स्तमःस्तुति—'
7 B reads 'कुलैरमभवं' 8 Missing in B
9 The whole verse is missing in B.
10 The whole verse is missing in A. 11 Missing in A
12 A reads 'परिचय्य' 13 A reads 'व्यालोला मधुपमलि-'

या विद्यमानसङ्केत[1]स्थाननाशेन सीदति ॥५१॥
स्वानधिष्ठितसङ्केते भर्तुर्गत्यनुमानतः ।
या विषीदति, या भाविसङ्केताभावशङ्कया ॥५२॥
खिद्यतेऽनुशयाना सा त्रिविधा कथिता बुधैः ।

विद्यमानसङ्केतस्थानन्नाशावसन्नाऽनुशयाना यथा—

साकं वसन्तागमपाण्डुरेण
पत्रेण वानीरमहीरुहस्य ।
कलिन्दजारोधसि राधिकाया
नीराणि नेत्रान्नितरां निपेतुः ॥५३॥

स्वानधिष्ठितसङ्केतस्थानविषयकप्रियगमनानुमानावसन्ना द्वितीया यथा—

करधृतकदलीपत्रं पश्यन्त्या मृगदृशो मित्रम् ।
पवनप्रेरितकदलीदलमिव कम्पं तनुस्तनुते ॥५४॥

भाविसङ्केता[2]भावशङ्कयावसन्ना तृतीया[3] यथा—

निश्शङ्करङ्कुपटली[4] तटिनीसमीपे
नीपावलीवलयिता सहिता[5] सरोभिः ।
अस्त्येव दुस्तरनिकुञ्जयुता हिताय
तत्रावनी बहुवनी त्यज[6] खेदमन्तः ॥५५॥

आदिशब्दादलङ्कृतादयश्च[7] नायिका गृह्यन्ते । लक्षणं स्पष्टम् । अलङ्कृता यथा—

अक्ष्णोः कज्जलमुज्ज्वलं निवसनं गात्रेषु मुक्तावली
कण्ठे हाटककुण्डले श्रवणयोः केशेषु पुष्पस्रजः ।

1 A reads '-सङ्केतं-'
2 A reads 'सङ्केतस्थानाभाव-'
3 Missing in A
4 A reads '-बन्धु' in lieu of 'रङ्कुपटली'
5 Missing in A
6 A reads 'त्यय'
7 B reads '—दयो'

वक्षोजे मकरी तवास्ति सुभगे ! पत्रावली गण्डयो-
र्ययं पश्यसि पूर्णचन्द्रवदने ! वन्दामहे तत्तपः ॥५६॥

कन्यका यथा—

कलिन्दकन्यकातरङ्गवीक्षणापदेशतः
समेत्य रासमण्डलं व्रजाङ्गनागणैर्वृतः ।
उपान्त[1]लोलतारया दृशा समुल्लसन्महः
कयापि गोपकन्यया विलोक्यते यदूद्वहः ॥५७॥

अशेषपुरुषे वाञ्छा वित्तमात्रादुपाधितः ॥५८।
प्रादुर्भवति[2] यस्याः सा सामान्या परिकीर्त्तिता ।

सा यथा—

समायान्तं कान्तं द्रविणभरवन्तं मृगदृशा
समालोक्य प्रत्युद्गमनपरया दृष्टिकलया ।
नभो नृत्यद्भृङ्गावलिपरिचितं[3] किञ्च परितो
मृदूकर्त्तुं मार्गः स्मितकुसुमपुञ्जेन खचितः ॥५९॥

मध्याप्रगल्भयोर्द्वादशभेदाः परकीयाया द्वौ भेदौ[4] मुग्धाया एको भेदः सामान्याया एको भेद एव षोडशभेदाः ।

स्वीयाभेदान्तराण्याह ।

भवेन्मानवती रूपगर्विता प्रेमगर्विता ॥६०॥
अन्यसम्भोगदूना स्यादित्थं सा स्याच्चतुर्विधा ।

मानवती यथा—

आयाते निजसन्निधिं रतिकलाकौतूहलोद्घाटनं
कुर्वाणे कपटेन सस्मितमुखे जातागसि प्रेयसि ।

1 A reads 'उपान्त्य...'
2 B reads 'प्रादुर्भवन्ति'
3 A reads 'विरचितं'
4 'पर...भेदौ' missing in A

अङ्गाकृष्टिसमुद्भवन्मटमटत्कारक्रियाकैतवाद्
भग्नो मानमहीरुहः शिव शिव स्वान्ते कुरङ्गीदृशः ॥६१॥

रूपगर्विता यथा–

उपवन[1]कुसुमावलोकनाय
प्रियसखि ! नैव समुत्सुका[2]ऽहमस्मि ।
युगपदभिमुख निपत्य यस्मिन्
विदधति वीक्षणवारणानि[3] भृङ्गाः ॥६२॥

प्रेमगर्विता यथा–

घनमलयजपङ्कलेपमङ्गे[4]
विरचय मा[5] मम केलिकारणेन ।
सुमुखि ! यमुपगूहनान्तरायं
पतिरवगम्य वियोगिवद् बिभेति ॥६३॥

अन्यसम्भोगदूना यथा–

गतासि केतकीकुञ्जं न च नीचस्य मन्दिरम् ।
दूति[6] ! दीर्णं यदङ्गं ते[7]कण्टकैस्तस्य दृश्यते ॥६४॥

अथ[8] मानः । दयितापराधसूचकचेष्टानुमेयः कोपो मानः ।

त्रिप्रकारो भवेन्मानो गुरुः स्यान्मध्यमो लघुः ॥६५॥
गुरुःकष्टतरापास्यः कष्टापास्यस्तु मध्यमः ।
लघुरल्पापनेयः स्याद्रसाभासस्त्वसाध्यकः ॥६६॥

1 A reads 'उत्पल .'
2 A reads 'समुत्सुको ..'
3 A reads 'वारणालि...'
4 B reads 'साङ्ग'
5 A and B both read 'सा'
6 A reads 'इति'
7 A reads 'तत्'
8 B reads 'अत्र'

पदप्रणत्यलङ्कारदानापास्यो भवेद् गुरुः ।

अन्यथावादशपथैर्निरस्यो मध्यमः स्मृतः ॥६७॥

लघुस्तथान्यथासिद्धकौतुकापास्य उच्यते ।

गुरुः पराङ्गनासङ्गसम्भूतः परिकीर्त्तितः ॥६८॥

गोत्रस्खलनसञ्जातो[1] मध्यमस्तु समीरितः ।

परस्त्रीजनितालापदर्शनो लघुरुच्यते ॥६९॥

गुरुमानो[2] यथा–

तारास्ताररुचो जहत्यविरलोद्गारा[3] गिरः सर्वतः

श्रूयन्ते चरणायुधस्य विसरत्यस्ताचलं चन्द्रमाः ।

प्राचीमुज्ज्वलयन्ति चण्डमहसः प्रत्यग्रभासः[4] प्रिये !

क्षीणत्वं भजते तथापि न कथं मानान्धकारस्तव ॥७०॥

मध्यममानो यथा–

यत्नं जहिहि[5] जीवेश ! गोत्रस्खलनगोपने ।

साक्षिणी यत्र वाग्देवी तत्रार्थे कस्य संशयः ॥७१॥

लघुमानो यथा–

आयाते निजसन्निधिं रति[6]कलाकौतूहलोद्घाटनं

कुर्वाणे कपटेन सस्मितमुखे जातागसि प्रेयसि । इत्यादि

पूर्वश्लोकः ।[7] · · · · · · · ·

अष्टाभिस्ता अवस्थाभिर्वसुनेत्रसुधाकराः (१२८) ।

1 A reads 'शङ्कातो'

2 A reads 'गुरुमाने'

3 B reads '—विरलाङ्गारा'

4 A reads 'प्रत्यक् प्रभासः' whereas B reads 'प्रत्यस्त्रभासः'

5 A reads 'जहीहि'

6 A and B both read 'निज...'

7 *Vide supra* verse No 61

ताः पूर्वोक्तषोडशनायिकाः ।

ता उत्तमादिभेदेन वेदवारणवह्नयः (३८४) ॥७२॥

ताःअष्टाविंशत्यधिकशतसङ्ख्यका ।[1]आदिशब्दान्मध्य माधमे गृह्येते ।

दिव्यादिभेदतस्ताः स्युर्नेत्रबाणधरेन्दवः (११५२) ।

ताश्चतुरशीत्यधिकशतत्रयसङ्ख्यका नायिकाः ।

दिव्या इन्द्राण्यादयः । अदिव्या मालत्यादयः । दिव्यादिव्या रुक्मिण्यादयः ।

मुग्धायाश्चातुर्याभावाद्यथाधीरत्वादिभेदाभावस्तथाऽष्ट[2]विधत्वाभावो युक्तस्तथापि प्राचीनलिखनानुरोधा[3]दष्टविधत्वमिति ।

स्वाधीनभर्तृका तद्वत् खण्डिताथाभिसारिका ॥७३॥

कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।

अन्या वासकसज्जा स्याद् विरहोत्कण्ठिता तथा ॥७४॥

कान्तो रतिगुणासक्तो न जहाति यदन्तिकम् ।

विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका ॥७५॥

मुग्धा स्वाधीनभर्तृका यथा—

न मनागपि तिर्यगीक्षणं मे

न च[4] चातुर्यकला कदापि वाचि ।

दयितस्य मनस्तथापि सत्यं

मयि सक्तं कथयालि ![5] कस्य हेतोः ॥७६॥

मध्या स्वाधीनभर्तृका यथा—

केलीगृहे वचनकौशलतस्तदानी-

मालिङ्गने यदपि जीवपतिर्निषिद्धः ।

1 Missing in A

2 A reads 'अष्टा...'

3 A reads—'लिखनत्वा .'

4 Missing in A

5 A reads 'कथयामि'

बद्धाञ्जलिस्तदपि नैव जहाति पार्श्व-
देशं ममाद्य कथयालि ![1] किमाचरामि ॥७७॥

प्रगल्भा स्वाधीनभर्तृका यथा–

प्राणेशो वचनं ममैव सततं संस्तौति, संवीक्षते[2]
मामेवानुपलं, प्रशंसति सदा मत्केलिकौतूहलम् ।
ब्रूते मत्प्रियमालि ! किञ्च कुरुते यन्मे मनो[3]वाञ्छितं
तन्मन्ये पर[4]योषितः प्रियदृशोराकाशपुष्पायिताः ॥७८॥

परकीया स्वाधीनभर्तृका यथा–

किन्न स्वीयाः सखि ! यदुपतेर्योषितः सन्ति यासा-
मुद्यद्देहद्युतिभिरवनी काञ्चनीव प्रभाति ।
वारं वारं व्रजपरिसरे यत्र यत्र व्रजन्तीं
मामेवालोकयति स यतस्तत्र तत्रेक्षणेन ॥७९॥

सामान्या स्वाधीनभर्तृका यथा–

योषितः कति न सन्ति पुरेऽस्मिन्
या मनोभवकलास्वतिदक्षाः ।
किन्तु यच्छति युवा द्रविणं यन्-
मह्यमेव वद तत्र निदानम् ॥८०॥

पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥८१॥

मुग्धा खण्डिता यथा[5]–

आयाते दयिते परनारीभोगाङ्किते‍ऽरुण[6]द्युतयः ।

1 Missing in A
2 A reads संवीक्ष्यते
3 B reads 'हृदो'
4 A reads 'प्रिय...'
5 'मुग्धा खण्डिता यथा' missing in A
6 A reads 'तरुण-'

लज्जाकुला निब्रद्धा[1] निवर्तिता दृष्टयः सुदृशा ॥८२॥

मध्या खण्डिता यथा—

रागोऽस्ति ते मनसि मद्विषयो न वेति
यस्संशयो मम निपीडयतिस्म चेतः ।
नाथ ! त्वदीयनयने नयतानुरागं
स व्याहतो[2]ऽद्य कृतिना तव जागरेण ॥८३॥[3]

प्रगल्भा खण्डिता यथा—

मामालोक्य कलङ्कितं परवधूपादाश्रितैर्यावकैः
पापध्वंसनहेतवे हरिहरीत्युक्त कुरङ्गीदृशा ।
पश्चादात्मदृशो[4]विशुद्धिविधये कौसुम्भरागद्रव-
द्रोहाशंसकशोणसिन्धुसलिलस्रोतस्यभिस्नापिताः ॥८४॥

परकीया खण्डिता यथा—

वीक्ष्य प्राङ्गणसन्निधौ प्रियतमं सम्भोगचिह्नाञ्चितं
दीर्घश्वाससमीरणा गुरुजनत्रासेन न प्रोज्झिताः ।
दूतीदर्पदृढोपहासपटलप्रोत्साहकृन्नेत्रतो
निर्यद्बाष्पमिषेण पङ्कजदृशा देवाय[5]दत्तोऽञ्जलिः ॥८५॥

सामान्या[6] खण्डिता तथा—

प्रातःपराम्बुजमुखोपरिरम्भलग्न-
श्रीखण्डमण्डिततनोः पुरवारनारी ।
उक्त्वा परास्वपरुषाणि वचांसि युक्त्या[7]
हारं हृदो हरति वैशिकवल्लभस्य ॥८६॥

1 A reads 'लज्जाकुलनिषिद्धा'
2 A reads 'व्याहृतो—'
3 Same as verse No 18
4 A reads 'यशो'
5 B reads 'दैवाय'
6 A reads 'सामान्यवनिता'
7 A and B read 'मुक्त्वा'

अभिसारयतीष्टं या मनोभववशंवदा ।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ॥८७॥

परुषाभिसारिका यथा—

त्वं दूति ! वाचि चतुरा[1] वसन्तकालो महाविषमः ।
कलया तथा विधेयं यथा प्रियोऽभ्येति मत्सविधम् ।८८॥

मुग्धाभिसारिका यथा–

विद्युद्वल्ली तनुसहचरी मार्गसन्दर्शिका ते
पाथोवाहश्चिकुरपटलीबान्धवस्ते सहायः ।
ध्वान्तं धन्ये[2] मृगमदरसा[3]लेपबन्धुस्तवैतत्
त्यक्त्वा भीतिं प्रियमभिसरोन्मुञ्च मन्दाक्ष[4]मुद्राम् ॥८९॥

मध्याभिसारिका यथा–

श्यामायास्तव मानसे[5]प्रियसखि ! श्यामा न वित्रासकृत
किञ्चोन्मुञ्च[6]भुजङ्गतो भयमितो यत्त्वम्भुजङ्गार्थिनी ।
कामः क्रूरशरप्रहारनिपुणो यत्तो सहायस्ततो
लज्जामन्त(न्थ)रसञ्चरेण सुभगे ! प्राणेश्वरं मोदय ॥९०॥

प्रगल्भाभिसारिका यथा–

रथं समास्थाय मनोरथं द्राक्
घनान्धकारे पथि मे व्रजन्त्याः ।
के पर्वताः के पथि पन्नगा वा
के वा निकामं[7] सरितोऽन्तरायाः ॥९१॥

परकीयाभिसारिका यथा–

1 A adds 'च' just after it. 2 B reads 'धन्यो' 3 A reads '...समा'
4 A reads 'मन्दाक्षि' 5 A reads 'मानस...'
6 A reads 'किञ्चोन्मुक्त' 7 A reads 'निकायाः' whereas B निशायां'

अस्तं याते तुहिनकिरणे देहलीदेशमेत्य
ध्वान्ते गाढे क्षिपति परितश्चञ्चलं चक्षुरुच्चैः ।
गर्जत्येषा जलदपटली नो विशेषाद्बिभेति
प्रायः प्रादुर्भवति गमने साहसं साहसिन्याः ॥९२॥

सामान्याभिसारिका यथा—

तमस्तोमारुद्धे जगति, जलदे वर्षति, तनौ
विभूषां सम्पाद्यासितनिवसनाच्छादितवपुः ।
धनाप्त्याशादूत्या प्रतिघटिक[1]मुत्साहितमना
सखेलं कस्यापि व्रजति निलयं पण्यरमणी ॥९३॥

ज्योत्स्नाभिसारिका यथा--

धम्मिल्लोपरि संनिवेशय सितां मालामिमां यत्नतः
श्रीखण्डद्रवलेपनं कुरु कुचे हारं हृदि स्थापय ।
वासस्त्वं परिधेहि भास्वरतमं चित्ते भयं मा कृथा
गच्छन्त्याः पथि ते मृगाक्षि ! सकलं ज्योत्स्ना[2]समाधास्यति ॥९४॥

दिवाभिसारिका यथा--

महातापत्रासान्निजपरिजनान् स्वस्वभवने
प्रलीनानालोक्य प्रमुदितमनाः सूक्ष्मवसना ।
प्रचण्डे मार्तण्डे मलयजरसानुष्णशमन-
च्छलादङ्गे[3]न्यस्य प्रियमभिसरत्यम्बुजमुखी ॥९५॥

चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥९६॥

1 B reads 'घटक' 2 B reads 'ज्योत्स्नी' 3 A reads '—दङ्गं'

मुग्धा कलहान्तरिता यथा[1]—

मुग्धावमत्य दयितं मदनाशुगेन
विद्धा न वक्ति किमपि त्रपया सखीभ्यः ।
किन्त्वालयान्तरमुपेत्य करेण दत्ते
तत्सङ्गमाय कुसुमं कुलदेवताभ्यः ॥९७॥

मध्या कलहान्तरिता यथा–

परिजनसविधेऽस्या निःप्रभास्यारविन्दे
कलहकथनवाणी लज्जया रुध्यमाना ।
अपहतनदरंहोबन्धरन्ध्राभिनिर्यन्
निभृतसलिलधाराविभ्रमं हन्त ! धत्ते ॥९८॥

प्रगल्भा कलहान्तरिता यथा–

कान्तः कृतान्तकरवज्रविनिष्ठुरेण
निष्कासितोऽद्य वचसा सहसा मयैव ।
कस्मै वदामि सखि ! दैवहता, भुनक्तु
यस्यापराधपरिणाममयम्ममात्मा ॥९९॥

परकीया कलहान्तरिता यथा–

मातः पार्वणशर्वरीश्वरकरस्फीते मदीयान्वये
मालिन्यं यदभूदभूतदुरितो यद्वा गुरुर्गञ्जितः ।
तस्या एव तु दुष्कृतेः फलमिदं य[2]त्प्राणनाथो रुषा
निर्दोषोऽप्यवधीरितः खलु पुरापापाज्जनो मुह्यति ॥१००॥

सामान्या[3] कलहान्तरिता यथा–

1 यथा missing in A

2 A reads 'मत्'

3 A reads सामान्यवनिता

येनास्मदीयभवनेषु धरा धनेन[1]
पूर्णीकृता परमतुष्टिरदायि येन ।
दुर्दैवदुर्विलसितेन वचोविषेण
स व्याहतः सखि ! मयाद्य किमत्र कुर्मः ॥१०१॥

प्रियः कृतेऽपि सङ्केते यस्या नायाति सन्निधिम् ॥
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥१०२॥

मुग्धा विप्रलब्धा यथा—

निर्बन्धेन सुहृद्गणस्य वनितावर्गेण वाचांमिषा-
दानीता शरदिन्दुसुन्दरमुखी सङ्केतशालां प्रति ।
ताञ्चापश्यदथ प्रियेणरहितामत्रान्तरे सुभ्रुवः
पाथः संहृतपद्मपत्रतुलनामाधत्त नेत्रद्वयी ॥१०३॥

मध्या विप्रलब्धा यथा—

सङ्केतशालामवलोक्य बाला
शून्यां तनौ वेपथुमुद्वहन्ती ॥
निवारणार्थं निजमूर्च्छनाया-
स्तन्त्रीव निस्पन्दतरा बभूव ॥१०४॥

प्रगल्भा विप्रलब्धा यथा—

सङ्केतसद्म सकलं समुदीक्ष्य शून्यं
शम्पेव पङ्कजदृशस्तनुराचकम्पे ।
वात्येव चक्रमिव सेतुनिबद्धसिन्धु-
वीचीव चित्तमभितः पुनराजुघूर्णे[2] ॥१०५॥

परकीया विप्रलब्धा यथा—

1 A reads 'स्वगमनेन'
2 A and B read 'जघूर्ण'

लज्जार्गलामपि विभिद्य समागतायाः
शून्यं समीक्ष्य विपिनं विकलाङ्गयष्टेः ।
दृष्टिः कृतान्तकरवालधिया पपात
तन्व्या रसालतरुमञ्जुलमञ्जरीषु ॥१०६॥

सामान्यवनिता विप्रलब्धा यथा[1]–

सङ्केतभवने कान्तमदृष्ट्वा वारसुन्दरी ।
धनानधिगमोद्भूतबाधया मूर्च्छिताऽभवत् ॥१०७॥
नानाकार्यवशाद् यस्या दूरदेशङ्गतः पतिः ।
सा मनोभवदुःखार्ता भवेत् प्रोषितभर्तृका ॥१०८॥

मुग्धा प्रोषितभर्तृका यथा–

भाङ्कारं भ्रमरे वितन्वति रहो गत्वा पिधत्ते श्रुती
श्रीखण्डद्रवमङ्ककेन हि वधूर्धत्ते स्वभावाधिकम् ।
जानीमः प्रियविप्रयोगसमये मुग्धाङ्गनाचेतसो
दुःखाधिक्यकरी भवत्यनुचरी लज्जा मनोजादपि ॥१०९॥

मध्या प्रोषितभर्तृका यथा–

आमोदन्तनुते न[2] पङ्कज[3]वनीवातो न वा तोषकृद्
भाङ्कारो भ्रमरस्य भाति मधुरालापो दुरापः पिके ।
नेत्रप्रीतिमुरीकरोति न खलु प्रोत्फुल्लपुष्पावली
ब्रूहि त्वं सखि ! धातुरद्य सुरभौ सृष्टिः कुतोऽन्यादृशी ॥११०॥

प्रगल्भा प्रोषितभर्तृका यथा–

1 The portion 'लज्जा...' to 'विप्रलब्धा यथा' is missing in A

2 Missing in A

3 B reads 'चन्दन–'

मा शीतोदकशीतलैर्मलयजक्षोदैर्मनोजानल-
ज्वालां दीपय किञ्च वीजय न वातन्तालवृन्तानिलैः ।
सोऽयं निर्दयमानसो यदुपतिर्लब्धावकाशोऽधुना
सन्तापज्वरजर्जरात् सखि ! हृदो हा ! हन्त ! निर्यास्यति ॥१११॥

परकीया प्रोषितभर्तृका यथा–

पानाय प्रतिवेशिनः स्पृशति नो सोष्णत्वभीत्या स्वयं
पानीयं बत दापयत्यतिहिमं शस्तं सखीहस्ततः ।
पाण्डुत्वं पिदधाति चन्दनरसैरङ्गे परप्रेयसी
विश्लेषानलगोपने वितनुते किं किं न वा कौशलम् ॥११२॥

सामान्या प्रोषितभर्तृका यथा–

बिदेशादाकृष्टः प्रणयदृढपाशेन सघनः
समेत्यास्मद्गेहं प्रचुरवसु मे दास्यति हितः ।
इति द्रागुद्बाष्पं बत कितवभावात् पुरवधू-
र्निधायाक्षि द्वारि प्रियतमपथं पश्यति पुरः ॥११३॥

प्रियवारो ममाद्येति[1] ज्ञात्वालङ्करणादिना[2]
सज्जीकरोति, वासकसज्जा सा परिकीर्तिता ॥११४॥

मुग्धा वासकसज्जा यथा–

काचिद्भूषणमार्जनं कलयते काचित्करोति स्रजं
काचिन्न्यस्यति निर्मलं निवसनं संस्फाल्य तल्पोपरि ।
इत्थं वासकयामिनीमधिसखीचेष्टान्नवोढाङ्गना
दूराद् वीक्ष्य मुदं यदाप हृदये तद्वेद पुष्पायुधः ॥११५॥

मध्या वासकसज्जा यथा–

1 A reads 'यमाभ्येति'   2 B reads या

यूयङ्केवलमेव मण्डनविधौ सख्यः स्वयं पण्डिताः
किन्त्वाहं तर[1]सा तदेव[2] निखिलं कुर्वे पुनः पश्यत ।
इत्थं व्याजमुपेत्य केलिविधये[3] निष्पादिता सुभ्रुवा
सामग्री सकला, कलास्मृतिभुवा[4] का नो[5] जनोऽध्याप्यते[6] ॥११६॥

प्रगल्भा वासकसज्जा यथा–

देहे चन्दनचर्चनं विरचितं हस्ते कृतङ्कङ्कणं
काञ्ची काञ्चनकल्पिता च जघने न्यस्ता कुरङ्गीदृशा ।
केलीसद्मसमीपमेत्य च तया दृष्ट्या सरोजावली–
मालाभिः सपदि प्रियस्य परितः पन्थाः पवित्रीकृतः ॥११७।

परकीया वासकसज्जा यथा–

रोगव्याजमुपेत्य भर्तृशयनादन्यत्र तल्पं वृतं
निद्रावर्धनहेतवे परिजनः कामेश्वरं भोजितः ।
दृष्ट्वाऽऽविष्कृतहुङ्कृतिभिर्मृगदृशा सङ्केतसंज्ञा कृता
पत्रादौ चलिते प्रियागमधिया द्वारन्तया वीक्ष्यते[7] ॥११८॥

सामान्या वासकसज्जा यथा–

यावन्मूल्यकभूषणं मम तनौ पश्ये[8]द् दृशा मत्प्रिय–
स्तावन्मूल्यधनानि, दास्यतितरामित्थं विचिन्त्यात्मनि ।
हस्ते हाटककङ्कणं कलयते, कर्णे मणेः कुण्डलं
धत्ते, मौक्तिकदाम कण्ठनिकटे वाराङ्गना न्यस्यति ।।११९॥

1 B reads 'तव'
2 A & B both read 'तदैव'
3 A reads 'विधयो'
4 B reads '—नरा'
5 A reads '—कारो'
6 A reads 'ख्याप्यते'
7 B breaks off with the following serving as colophon—
इयान् भागः श्री बदरीनाथशर्मणा १६३२ खैष्टाब्देऽस्त्यमासे मुजफ्फरपुरे लिखितः
8 A reads 'पश्य'

आगन्तुं कृतचित्तो दैवान्नायाति यत्पतिः ।
तदनागमदुःखार्ता विरहोत्कण्ठिता मता ॥१२०॥

मुग्धा विरहोत्कण्ठिता यथा–

कान्तोऽद्यापि न समागतो मे[1]सविधं कस्मात्किमन्यां वधू-
मासक्तः स्मरणाविति प्रियसखीन्न व्रीडया पृच्छति ।
दीर्घश्वासमुरीकरोति न खलु द्राक् किन्तु मुग्धा व्यधा[2]-
न्मुक्तापङ्क्तिविशुद्धबाष्पलवकैर्द्दक्पक्ष्मणी लाञ्छिते ॥१२१॥

मध्या विरहोत्कठिण्ता यथा–

किं वा पर्वतदुर्गमाः पथि भुवः किं स्युर्नदीदुस्तराः
किं वा कामपि कामिनीमुपसृतो यन्नागतोऽद्य प्रियः ।
इत्याचिन्त्य कुरङ्गशावकदृशा कर्णान्तनीलोत्पल–
प्रोत्सर्पत्वहनालि(?)दंशकपटादत्यन्तमुत्कम्पते ॥१२२॥

प्रगल्भा विरहोत्कण्ठिता यथा–

किं कस्मिन्नपि यौवते पथि रतो न तद्विचारक्षमं
यत्सक्तं मयि तस्य मानसमहो कस्मादसौ नागतः ।
इत्थं चन्द्रमुखी विचिन्त्य दयितोदन्तं सबाष्पेक्ष(णा)
दीर्घश्वाससमीरशुष्यदधरा दैवज्ञकं पृच्छति ॥१२३॥

परकीया विरहोत्कण्ठिता यथा–

किंस्वत् पित्रा परिभवभिया वर्जिता दुर्जनोक्तिः
त्रासं चित्ते किमथ कृतवान् दुस्तरः किन्तु पन्थाः ।
दुष्टा दूती किमिह दयितो नागतोऽद्यापि यस्मा–
दित्युक्त्वा दृग्बहलसलिलैः सुभ्रुवाऽऽरि भूमिः ॥१२४॥

सामान्या विरहोत्कण्ठिता यथा–

1 A reads 'न'   2 A reads 'व्यधा'

किं वा करस्थं वसु न प्रियस्य
यन्नागतं मत्सविधे·······तेन ।
इत्यर्गलायास्सुदृशो धनस्य
तृष्णासरिच्छ्वासभरैरशोषि ॥१२५॥

इत्यष्टौ नायिकाः ।

कवीश्वरावतंसेन भानुमिश्रेण धीमता ।
नवमी नायिका प्रोक्ता प्रवत्स्यत्पतिकाभिधा ॥१२६॥
विदेशं मत्प्रियोऽद्यैव यास्यतीति विनिश्चयात् ।
या विषीदति कामार्त्ता प्रवत्स्यत्पतिका तु सा ॥१२७॥

मुग्धा प्रवत्स्यत्पतिका यथा–

शुद्धोऽसौ समयो विदेशमधुना दैवज्ञवाक्प्रेरितो
यास्यत्येव पतिस्तवेति वनितावृन्दे मुहुर्जल्पति ।
मुग्धा पक्ष्मनिरुद्धबाष्पलवका प्रादुर्भवद्रागिति
प्रस्थानप्रतिबन्धकं वत हृदा योगोच्चयं याचते ॥१२८॥

मध्या प्रवत्स्यत्पतिका यथा–

प्रस्थानहेतोर्भवतो विशुद्धा
यात्रेयमद्धा न बभूव विद्वन् ।
यदेषधारानिकरेण वारा–
मकालवर्षी नयनाम्बुदोऽस्याः ॥१२९॥

प्रगल्भा प्रवत्स्यत्पतिका (यथा)

···· ···· वैभवमपि मधोः ···· ····
काले काले व्यथय हृदयं कोकिले ! काकलीभिः ।
बारं बारं विधुरय मनो मल्लिके ! किं वदामो
मेघश्यामो नयनविषयादन्यतो गन्तुकामः ॥१३०॥

परकीया प्रवत्स्यत्पतिका यथा–

प्रस्थानं कृतवति वल्लभे मृगाक्ष्या
न प्रोक्ताः पिशुनभिया निषेधवाचः ।
किन्तु द्राक् करकमलं निधाय भाले
दूत्या स्मेरनिहिता सबाष्पदृष्टिः ॥१३१॥

सामान्या प्रवत्स्यत्पतिका यथा–

वियोगजनितज्वरप्रशमभेषजप्राप्तये
प्रदेहि बहुलं वसु व्रजति दूरदेशं भवान् ।
इति स्फुटवचः पुरः प्रियतमस्य वारस्त्रिया
निगद्य नयनाश्रुभिर्भवनभूमिरार्द्रीकृता ॥१३२॥

प्रियागमनवार्त्तां या श्रुत्वा कम्पादिसंयुता ।
मोदते कथितास्माभिरागच्छत्पतिकाभिधा ॥१३३॥

न चास्याः स्वाधीनपतिकायामन्तर्भावः अभिसाराभावात्, न वा कलहान्तरितायामन्तर्भावः सङ्केताभावात्, न वा वासकसज्जायामन्तर्भावः वारनियमाभावात्, न वा विरहोत्कण्ठितायामन्तर्भावः विकल्पशतबाध्यमानत्वाभावात्, न वा प्रवत्स्यत्पतिकायामन्तर्भावः प्रवासनिश्चयाभावात् । तेनातिरिक्तैवागच्छत्पतिका दशमी नायिकेति ।

आगच्छत्पतिका मुग्धा यथा–

अद्यायाति पतिस्तवेति नगरीयोषामुखोत्थं वचः
श्रुत्वा स्फारदृशा स्थितं पथि पलं निस्पन्दया मुग्धया ।
पश्चाद् वीक्ष्य सखीजनस्य वदनं स्मेरं तया लज्जया
न्य[1] .... ॥१३४॥

1 A breaks off at this very place.

An alphabetical index of verses in the
Kavīndragaṅgānandagranthāvalī
(Figures in the margin refer to pages.)

अ

अकस्मादेव— ५७
अक्ष्णोः— १९८-१९९
अङ्कासीनं— १६
अङ्गे वह्नि— ७६
अजानन्ती— ५७
अतिसत्त्वो— १४७
अत्रारण्ये— १
अथ प्रार्थितं— ३९
अद्यायाति— २१४
अद्याहूतविधौ— १९३
अद्राक्षं— १८४
अधरमधुर— ५७
अधिवटतटं— १९६
अध्यारूढात्— २६
अनधीत्य— ११२
अनभिप्रेत— १४४
अनिमिष— ५१
अन्तःकोप— १९४
अन्तर्हिते— ४१
अन्योन्यनिविड— ६१
अन्विष्यन्तः— १३-१४
अपाङ्गे काम— १४२
अपूर्णोऽयं— ८८
अमुष्य भरत — १३८
अयं कः कोदण्ड— ७९
अयं त्रिलोकी— ४६
अयं भाति— १७४
अरुणनयन— १०५
अवलोकयतो— ८५
अष्टाङ्गयोग— १३८
असुशरण— ८१
अस्ति स्वस्ति— ३३
अस्तं याते— २०६
अस्मत्क्रीडा— २२

आ

आकर्ण्य — ९७
आकृष्य तत्र— ३५
आकृष्योच्चै— २२
आक्रम्य विषम— १६७
आघ्राणाय— ४
आचक्राम— २६
आज्ञया तस्य— ३३
आत्मक्लेश— १५५
आदध्यास्त्वं— ६
आदायाश्रुजलं— ६०
आदौ गत्वा— १४
आदौ दूर— ९

आदौ सुतोष— १०१
आमोदन्तनुते— २०९
आमोदानु— ११
आयाति प्रणयी— ५५
आयाते दयिते— २०३-४
आयाते निज— १९९-२००; २०१
आयातः किं— ३६
आयात्येष— ६३
आयासो गमना— १९३
आरादम्या— १९०; १९१
आलिर्गालि— १९६
आलीजनेन— ५६
आलोकेना— १४
आलोक्य तां— ३६
आशयाम्भो— १३१
आश्वासाय— १
आसीनाया— २७
आस्यं तस्या— २५
आस्यं लास्यं— २५
आस्यं हास्यं— ३१
आहूतापि— १८६; १८८
आहृत्य गाढ— ३५

इ

इत्थं प्रलप्य— ४२
इत्थं व्रजाम्बुज— ४४
इत्थं हरेः— ३९
इत्येवं त्वं— ३१
इयं कमल— १११

ई

ईषद्धास— ५

उ

उअह सरवरे— १४८
उक्तिर्यस्य— २०
उत्क्षिप्योच्चैः— ८६; १०१
उत्तुङ्गाग्र— ११-१२
उत्पश्यामः— २६
उत्सारयसि— १५१
उद्गायतो— ३६
उद्दामद्युति— ४६; ७४-७५; १४७
उद्भाव्य तेन— ३९
उन्नमति भ्रू— ८०
उन्मीलत्कुसुम— ७८
उपवनकुसुम— ५६; २००
उपायातस्तल्पं— ७०; ११०
उरःश्वयथु— १८७
उष्णानल— १५७

ए

एकस्मिन्— १९४
एकारण्ये— २
एकां तदा— ४३
एकं सीता— १०७
एतद्भूषण— ५९
एतद्वारि— ८०; १८०
एतस्याः कर— ५३; १९१
एतस्यास्तनु— १८६; १८७
एते कीर्णा— १७
एष क्षोणी— २-३

क

कङ्केल्लिपादप— ४२
कचस्ते— १२८
कटिः कनक— १३०

कण्ठान्तिकं—	६३; १०२	काचिद् भूषण—	२१०
कण्ठे हारावाप्तिः—	१३४	कान्ते किञ्चि—	१०४
कन्दुकमित्र—	१९१	कान्ते तं तं—	५५
कयाचित्—	४०	कान्ते पदान्त—	१०१
करकलित—	१७०	कान्ते स्वान्ते—	७७
करधृत—	१९८	कान्तोऽद्यापि—	२१२
करिहस्तेन—	१७७	कान्तः कृतान्त—	२०७
करी शोणे	८७; १०२	कामेनालिङ्ग्य —	१०७
करुणाकदम्ब—	१५३	कामः क्रूर—	९७
करुणाकोमलः—	१२९	कारयित्वा—	१६०
करेणालिङ्गति—	१७५	कार्पण्येन—	१२८
करोति चन्द्रिका—	१५८	कार्वीशेना—	१५०
करोति च सुधा—	१२९	कालोरदालि—	१०६
करोति श्रोत्र—	३३	काव्यदोषाव—	१२५
करं किरीटी—	१७०	काश्चित्तदा—	३९; ५४
कर्णावतंस—	१८२	काश्चिद् बिभिद्य—	३७
कर्णोभ्येत्य—	७३	किञ्चित्किञ्चिदु—	५०
कर्णोल्लसद्—	१७१	किन्न स्वीयाः—	२०३
कर्तुं वाञ्छति—	१७५	किन्निर्माणं—	२४
कर्षन्ती शिरसो—	६६	किं कल्पद्रुम—	७९
कलिन्दकन्यका—	१९९	किं कस्मिन्नपि—	९४; २१२
कश्चित् कामी—	१	किं वा करस्थं—	२१३
कष्टमिष्टेन—	१४६; १७०	किं वा पर्वत—	२१२
कस्ते वक्षसि—	३३	किं सरस्तत्—	५५
कस्याश्चिदम्बुज—	३७	किंस्वित् कान्त—	१३
कस्याश्चिदश्रु—	३८; ६०	किंस्वित् पित्रा—	२१२
काचित् करेण—	४४	कुञ्जे कुञ्जे—	४
काचित्तदा—	३९	कुम्भकर्णं—	७२
काचित्तदीय—	४२	कुतः कमल—	१३९
काचित् त्रिभङ्गि—	४४	कुरङ्गनयने—	१३१

कुसुमसुरभि— १८५
कुसुमं विशिखो— १३३
कृतापराधे— १८८
कृपणा निर्धना— १४७
कृपालुता यस्य— ४६-४७
कृष्णाधिदैवते— ३४
कृष्णानुकार— १००
कृष्णायमान— ४४
कृष्णेन पातितां— ७२
कृष्णः कयापि— ४३;५७-५८;९३
कृष्णः स्पृशन्— ४३
केलीकोपा— १६
केलीगृहे— २०२-२०३
कैरवबन्धु— १२७
कंसद्विषा— ३०
क्रीडन्तीनां— ६
क्रीडावेश्मनि— १६३
क्रीडाहेतोः कुवलय— ७
क्रीडाहेतोः कुसुम— २४-२५
क्रूरः कामो— २
क्वाणं कुर्वंति— १९०;१९२
क्षामः क्षामः— १९

ख

खे खेलद्— ७०

ग

गङ्गातीरावधि— ९
गच्छन्नच्छ— १२
गच्छामीति— ९५
गच्छेः क्रीडा— २१
गतासि केतकी— २००
गतं कुत्र— १८२
गत्युद्बन्धो— ११
गत्वा तत्र भ्रमर— १७
गत्वा तत्र श्रवण— १३
गन्तव्या ते— ३
गतं तावत्— ८०
गाढालिङ्गन— १८०-८१
गाढं विभिन्न— ३७
गावौ हरि— १३६
गीतं कुण्डलि— ६३
गुणैस्तुषार— १३६
गेहाद् बहिः— ७८
गोप्योऽपि तं— ३७;५३;७०
गौरीलोल— १३३-३४

घ

घनमलयज— ५६; २००

च

चन्द्राकार— १५३
चन्द्रानुबिम्ब— ६९
चन्द्रांशुभि— ३८
चन्द्रे दृष्ट्वा— ४५
चन्द्रे रमा— ३५
चन्द्रं गता— १८३
चरणत्रपरि— १८२
चरणस्तव— १६१
चलण्डामर— १५०
चित्ताम्भो— १५०-५१
चेतो वाचं— १३७
चेन्नम्रीकुरुषे— ९५

छ

छद्मद्यूते— १०८

ज

जगद्व्यापि— १४३
जघाना— १३३
जानीहि त्वं कथमपि— २८
जानीहि त्वं कवि— २९
जानीहि त्वं विर— २८
जानीहि त्वं निज— २९
जानीहि त्वं प्रमद— २८-२९
जानीहि त्वं प्रिय— २७
जानीहि त्वं मधुर— २८
जानीहि त्वं मृग— २८
जानीहि त्वं रहसि— २८
जानीहि त्वं लघु— २७-२८
जृम्भारम्भ— ७३
जृम्भाविसर्पित— ७३

त

त एव जगदा— ७६
त एव पुरुषा— ११२
तत्कल्लोला— १५
तत्पानीये— १९
तत्पूर्वस्यां— २७
तत्याज— ३८
तत्र क्षणे भगवतो— ३७
तत्र क्षणे व्रज— ३५-३६
तत्र स्नातः— १९
तत्रासीनः— १
तत्रास्ते धरणी— ३३
तत्रैवास्तरणे— १६६
तत्रोपेत्य— ३
तथा व्यालोलिता— १६२
तद्भ्रू युगलं— २४
तन्वीं प्रीतिं— २७
तपात्यये— १६४
तमसा दृढ— १७८
तमस्तोम— २०६
तर्कानर्कं— १०
तस्मादस्मात्— १०
तस्यादूरे— १२
तस्या नासा— २३
तस्योपेत्य— ६
तस्यां देवी— १६-१७
तस्याः पङ्के— २३
तस्याः पाथः— ११
तात त्वयीदृश— ४५
तापो गात्र— ७४
तारा तारावलि— १८५
तारास्तार— २०१
तासामवेत्य— ३९
तीरे तस्य— ६
तुङ्गं दूरा— २१
तृणातुङ्ग— ८१
तैरभुक्तेन— ११२
तं पयोद— १७१
तं शृण्वतो— ३८; ६१
त्रपैकनिलया— १८५-१८६
त्रसन्ती— ५४
त्वञ्चेद्— १२

त्वदीयं— १७४
त्वद्देह— १३३
त्वय्यदृष्टे— १२९
त्वामेव पश्यति— १८१
त्वं दूति— २०५

द

दन्तज्योति— ७
दन्ताकृष्ट— ४८; १७६
दरस्मेर— १६७
दारिद्रय— ८६
दीर्घीभूताः— २०
दुर्गतिदारण— १४०
दुर्गन्धि— १७७
दूतैराप्तैः— १
दूरादेव— १३०
दूरं गच्छ— ५
दूर्वाभिराम— ३६
देवाः के वा— १४
देशे देशे— १३
देहे चन्दन— २११
देहे तापं— ३०
देहे लेपः— २०
दैत्यद्रोह— ४७
दृष्टान्तार्थं— २४
दृष्टान्तीकृत्य— १४३
दृष्टिश्रेणी— ४
दृष्ट्वा निशां— ३५
दंष्ट्राकोटि— ४८; १०३
द्रष्टुं किञ्चित्— ३०
द्रागाघ्रातुं— ४

ध

धन्यं धाम— १३
धम्मिल्लो— १६५; २०६
धात्रा स्रष्टुं— २२
धारावली— ६०
ध्यायं ध्यायं— ३
ध्यायंस्तेजः— ८७

न

न कर्तव्यैव— १६२
नटयति— ८८
न त्वां काली— ८
नत्वा महो — ११५
नद्यस्तुङ्ग— १५३
न नितम्ब— ७४
नभस्वत्सम— ४०
नमयन्नेव— १६६
न मनाग— २०२
नम्रीकृतास्य— १८७;१८८
नवघन— १६८
न विस्मयो— १४०
नाट्यं नास्ति— १८०
नाभीकुण्डे— २५
नाभीलीला— २५
नाहमभ्यर्थये— ३३
निजालयं— १६५
नितम्ब— १३७
निमीलिता— १३२
निम्ना धारा— २६
नियतं तिमिर— १९७
निर्धना अपि— १२८

निर्बन्धेन— २०८
निर्वाणवैर— १७७
निश्शङ्करङ्क— १६८
नीलरूप— १७२
नीलोत्पल— ४४
नेत्रे संयोजिते— ६४
नेत्रं यः— १७७

प

पक्षक्षेपण— १७६
पङ्कासक्ति— १२७
पञ्चकोशी— १८
पञ्चेषोस्त्वं— २
पठितं न— ६७
पथ्यातिथ्यं— ३
पद्मश्रेणी— ३०
पयोधावतल— ६४
परदेशं— १५५
परस्परोदञ्चित— ५६
परिजनसविधे— २०७
परेतगोष्ठ्या— १३५
परोन्नतिः— १४४
पश्यन् पश्यन्— १४
पश्यन् वामन— ६३; १०२
पश्येद्वारि— २१
पश्येस्तीरोन्नति— २१
पाणिप्रवालशकलं— १५२
पाणिभ्यां नव— १३६
पाणिः प्रवालसुभग— ५२
पानाय प्रति— २१०
पायाच्चिराय— १२५
पायाद् वो— ४६
पावकं हि— १३७
पिबन्ती मुरारे— ४१
पीत्वा पुण्यं— १७
पीत्वा पुष्पं— ७
पीनस्तनी— १११
पुत्रभ्रातृ— ८६; १०२
पुष्पात् पत्रे— २
पुष्पोत्पन्नान्— ३
पूर्वं यद्— १६४
पूर्वं यस्य— १५६
पृथिवीपाल— १११
पृथिव्यां सार— १६१
पृथुकार्तं— १७८
पृथुलकुचा— १७५
पृष्टायाः— ७८
प्रच्छन्ने— १६८
प्रच्छादयसि— ६०
प्रणयिनि— १८६
प्रतिपक्ष— ७१
प्रवासनिरतः— १३४
प्रस्थानहेतोः ९५;२१३
प्रस्थानं कृत— २१४
प्राणेशो वचनं— २०३
प्रातः पराम्बु— २०४
प्रालेय— १७१
प्रेक्षिष्यन्ते— १७
प्रेरयति नैव ८१

फ

फुल्लाइं ताइं— १७८
फूत्कारोच्छून— १३६
फेनस्फीत— ८

ब

बन्धकीवदना— १४९
बहुशो विलुठति— १६८
बालाशोकं— २२
बाले नीलाचल— २९
बालोद्याना— ७
बालोद्यानं— २१
बालोऽयं— ८५
बिम्बे रागो— ३१
व्रजन्ती खिद्यसे— १८७
व्रजन्तीमन्तिके— १७६
ब्रह्मारण्य— १३
ब्राह्मण:— १६२

भ

भक्तिर्गुरौ— ७६
भग्ना हारो— १६
भवन्त्येव— १२६
भवेदाज्ञा— ७७
भव्याभव्ये— ८
भाङ्कारैर्मुख— १५५
भाङ्कारं भ्रमरे— २०९
भाति पाणि— १७४
भानुपौत्री— १८५
भावी काल:— ११०
भित्तिप्रोद्य १५
भीमस्ते— १६४
भीमो भीम— ७१-७२
भीमोऽहं— ६२
भूगीर्वाणो— १८
भूयादत्र— ९४
भूषणं भास्वरं— १५०
भो वृक्षराज ४२
भ्रातर्द्विरेफ— ४२
भ्राता यस्या:— ९
भ्रूयुग्मस्य— २३

म

मदनो— १८८-९; १९०
मदीयक्रोड— १३०
मत्प्रेयस्या— २६
मत्सम्मुखे— ६५
मध्येऽह्नि १००-१०१
मन्ये नाभीह्रद— २४
ममास्ति— १०९; १८४
मल्लीमाल्य— ४-५
महत्ते साधनं— १३७
महाताप— २०६
महाराजन्न— १२७
मा गोपय— १६२
मातानयन— १९७
मात: पार्वण— २०७
माध्यपुष्पाणि— १६२
मानापनोदन— ५४
मानावसान— ६१
मानोरग— १२६
मा भवन्त— १८३

मा भूः पर्या— ८
मामालोक्य— २०४
मामेव केवल— ४३; ५६
माला म्लान— ७५
मा शीतोदक— ७६; २१०
मा सम्भावय— ७७; १४६
मिथ्याकल्पन— ६८
मीमांसायाः १०
मुक्ताधिया— १००
मुक्तावली— १६१
मुखं वीक्ष्य— ४०
मुग्धावमत्य— २०७
मुरलीसंवलित— ११०
मुरारिः कथा— ४०
मुरारे कंसारे— ६४; १०३
मुहुर्मुहुः— १०८; १८४
मूकीभावं— ८
मोञ्छाहेउत्त— ७६; १४२

य

यच्च कामसुखं— ४७
यत्तारुण्य १७२
यत्नं जहिहि— २०१
यत्प्रासादे— १६
यत्र प्राच्यां— १२
यत्र भ्राम्यन्— १७-१८
यत्र स्त्रीणां तरुण— ५
यत्र स्त्रीणां त्रिदिव— १८
यत्र स्त्रीणां सुरत— ११
यत्र स्वेच्छा— १८
यत्रान्येषामपि— १८
यत्रायातं— ५
यत्रोद्यान— १६
यत्रौपम्यं— ४
यत्सान्निध्ये— ११
यथा दूरं— १६३
यदपि स्तुतोऽसि— ७७
यदाह धात्र्या— ४६
यदिह वपुषि— १४८
यद्वृत्ताः— १५६
यद्‌ विद्वेषो— २२-२३
यद्‌ वेलायां— १६
यस्मिन्नायु— १५
यस्य मनागपि— १३८
यस्यां चन्द्र— ३०
यस्याः क्रूर— ६४
यस्याः सौधे मधुप— २०
यस्याः सौधे सतत— १५-१६
यस्योपरि— १३६
यामीत्यप्रिय— ७५
यावच्छ्वास— ८२
यावन्तोऽपि— १६७
यावन्मूल्यक— २११
याशोद— ४४
युष्माकं ननु— १५४
यूयङ्केवल— २११
येनास्मदीय— २०८
ये ये मुरारि— ३५
यैर्दृष्टा हिम— १५८
यैर्न्यस्ताः— १५१
योषितः कति— २०३
योऽसौ ग्राह— १३८

य: क्षोणी— १६५
य: प्रागासो— २६

र

रक्तप्रवाल— १३४
रङ्कोरङ्क— १७६
रथं समास्थाय— २०५
रविदर्शन— १७४-७५
रसातल— १७१
रागोऽस्ति— १६०; २०४
राजत्यूर्ध्वा— २६
राजत्सूक्ष्म १०
राज्यं च वसु— ४७
राधाचक्रमभेदि— १०७
राधाचक्रमिदं ८०
रामेणात्मभुवा— १५४
रूक्षारूक्ष— १६५
रेखाञ्जनस्य— ५२
रे रे पाप— १५६
रे रे राक्षस— १६४
रेवाभिषेक— १३२
रे शार्दूल— १७६
रोगव्याज— २११

ल

लक्ष्मीसहोदर— १६३
लग्नं रागावृता— १६६
लज्जार्गला— २०६
लपन्ती— ४०; ६३
ललितवचन— १४२
लीलालोल— १५
लोकानन्दन— १५८
लोकासमेन— १३८
लोचने अम्बुजे— १४६
लोचने क्रोध— १४४
लोला तारावली— १६१

व

वदति रहस्यं— ५७
वद वद जित:— १८१
वर्षाभिन्ने— १०
वहति पटीर— १६८
वाञ्छन्ति— ६६
वाणो वैरी— ३०
वामावलोकन— १३६
वायुं ददस्व— १३०
वारं वारं— २६
वासापुष्पं— ५८
विकचसरोज— १५३
विजेयो मघवद्— १४३
विज्ञाय प्रश्न— १६०
विदेशादाकृष्ट— २१०
विद्याविवेक— १६३
विद्युद्वल्ली— २०५
विद्युन्निन्द्रा— ७
विधाय दिव्यं— १०५
विनिवारितापि— ६६
विभाति— १६२
वियोगजनित— २१४
वियोगिना— ६८
विरचय्य— १६७
विरचित शिशु— १५०
विलक्षण— १७८

विलसति--	१४८; १५१	श्यामायास्तव--	२०५
विलुठति--	५५	श्रद्धायुक्त--	६-७
विशो वाणिज्य--	१३६	श्रीखण्ड--	१८८
वीक्ष्य प्राङ्गण--	२०४	श्रीरामस्य--	१४७
वीर्योद्रिक्तैः--	८७	श्रुत्वा सूर्य--	७१
वेणुस्वरे--	३७	श्वश्रूरतिथि--	१९५
वैदग्ध्य--	१६६	श्वश्रूरक्षुवयं--	१९६
....वैभवमपि--	२१३	श्वश्रूरिङ्गित--	११०
वैलक्षण्यं--	२३	श्वेतान्तराय--	३६
वंशीरव--	३८; ५३	**स**	
वंशीवादन--	१९५	स एव यमुना--	५१
वृद्धाः श्रद्धा--	९	स एव हि वचो--	१४५
व्यक्ताकारा--	१९	सकलजन--	१९६
व्याप्तां--	१०५	स कस्याश्चिदास्यं--	४१
श		सङ्केतभवने--	२०९
शक्त्या विद्धं--	६२; १०१	सङ्केतशाला--	२०८
शङ्के चारु--	२३	सङ्केतसद्म--	२०८
शङ्के नाभी--	२५	सञ्जातमानन--	४३
शम्भोः शस्त्र--	१६०	सत्पात्र--	८५
शरदिन्द्रजालि--	४८	सनालं--	४१
शालग्राम--	१४	सन्ध्यापयोद--	८७; १०३
शालिक्षेत्री--	१७	सन्निष्क्रम्या--	८
शिखिपिच्छ--	१८१	सप्तद्वीप--	८६
शिशिरपयः--	१५५	समायान्तं--	१९९
शिशुतामथ--	१८६	समुद्रमथनो--	१३१
शीतार्तोऽयं--	१५	समुल्लास्य	४१
शुद्धोऽसौ--	२१३	सम्मुग्धानां--	२०
शुभंयुस्वरं--	४१	सरसिजसुन्दर--	१३२
शृणुष्व--	१५४	सरोजनयनाः--	१०९; १८४
शैलाः कैलास--	१६२	सरोभूषण--	१६६

सर्वतीर्थाभि-- १२८
सर्वदा वर्तते-- १३७
सर्वदा सहजो बन्धुर्मार-- १६१
सर्वदा सहजो बन्धुः सर्व-- १६१
सर्वोत्कृष्टे-- २४
स सुन्दरः-- १४२
साक वसन्ता-- १९८
सान्निध्यं-- १९४
सा विज्ञालो-- २७
सीतापहार-- १६७
सीतापाणि-- ९
सुगानं-- ४०
सुत्रामा-- १३६
सुधारुचि-- १८०
सुधांशु-- ९५-६
सुमुखि-- १९२
सोमोद्भव-- १४४
सौधे यत्र-- ५
संन्यासो-- १०८; ११०; १८४
संपश्य-- ४३
संवीतस्य-- १४४
संशोभन्ते-- १२
संसारे सकले-- ४८-४९
स्तम्भद्वन्द्वं-- २१
स्तुत्या तावत्-- २
स्त्रीवासः-- ६१-६२
स्थानात्तस्मात्-- २०
स्थानादस्मा-- ६
स्थितयोर्वि-- ९८
स्थितवति-- १५९
स्नातं केन-- १०४-१०५
स्नातुं यात्यधि-- १८६
स्मितलव-- १८९
स्वच्छन्द-- १३०
स्वप्ने दृष्टा-- ३०-३१
स्ववाहिन्याः-- १६
स्वैरं-- ९५

ह

हन्त दुःशासना-- ६४
हरन्त्यो मत्त-- ५७
हरसि-- ५२-५३
हरिणायत-- १७०
हरि सपत्नो-- १४७
हा जगदेक-- १४९
हारो नोरसि-- ५४
हासश्रीर्जयति-- १३७
हास्यं लास्य-- १८९
हृदयेन्द्र-- १६०
हे मल्लिके-- ४२
हे हस्तीन्द्र-- १५२
हंसो मन्थर-- १६३

❀❀❀❀❀

An alphabetical index of kārikā-s in the *Kavīndragaṅgānandagranthāvalī*

(Figures in the margin refer to pages.)

अ

अकाण्डे— १६७
अङ्गाङ्गि— १०७
अङ्गानां— १२२
अजन्यता— ६०
अज्ञानादिव— ५५; १२२
अतिकृच्छ्रा— १६७
अतिक्रान्त— ६४–६५
अतिक्रामति— १५२–१५३
अतो विरोधो— ६१
अत्युद्धत— १००–१०१
अथवा पर— ११७
अथ वीरानु— ६२–६३
अथ स्त्रीणां— १२१
अधमे मुख— ७८
अधीरा सा— ११६
अनभिहितवाच्यभग्न— १४६
अनभिहितवाच्यमुदितं— १५५
अनित्यत्वेन— ४८
अनुत्कर्षेण— १५८
अनुभावा भ्रुवो— ७१
अनुभावो रसे— ६४
अनुभावाः पुनर्गात्र— ७५
अनुभावाः पुनर्दीर्घं— ७५
अनुभावाः पुनर्नेत्र— ७०
अनुमातुं— ६०
अनौचित्यादृते— १०८
अन्तरेणोप— १२७
अन्यत्रान्यस्त— ६५
अन्यथावाद— ११७
अन्यसम्भोग— १९९–२००
अन्वर्थ— ११९
अपदस्थ— १५४
अपस्मृति— ६९–७०
अपहसित— ९९–१००
अपुष्ट— १५७
अप्रयुक्ता— १२५–६
अप्राधान्यं— १३३
अभिलाषः— ८३; ९६
अभिव्यञ्जक— ८४–८५
अभिसार— २०५
अयुक्तता— १५७
अर्धप्रका— १०४
अर्थान्तरैक ...... मभिधत्ते— १५०
अर्थान्तरैक ... समाप्त— १४६
अलक्ष्य— ९०
अलौकिकत्व— ९०
अवधीर्य— ११८
अवहित्था— ७१-७२

अविधेयस्य— १६४
अव्यक्त— १००
अविमृष्ट— १३२-३३
अविशेषे— १५७
अश्लोलत्वा— १२६
अश्लीलत्वं गुण— १७७-१७८
अश्लीलत्वं च— १४९-१५०
अष्टाभिस्ता— २०१-२०२
असाधारण— ९१
असौष्ठवमना— ९६
असौष्ठवं तनौ— ९६
अस्थानयुक्त— १६०-६१
अस्थानस्थ— १४७-४८

आ

आक्षेपा— ९२
आचारहानि— ११९
आगन्तुं—
आत्मावदात— ६२
आद्यः— १०६
आनन्दयति— ६५
आभाषते— ६५
आलम्बन— ३४

इ

इष्टनाशादय— ७४
इष्टानिष्ट— ७२

ई

ईषत्संलक्ष्य— १००
ईषद्धसितं— ९९
ईषद्वचो— ५७

उ

उक्ताः स्त्रीणां— ५८
उच्छ्वासो— ९६
उत्कट— ७९
उत्तमप्रकृतिर्वीर— १०१
उत्तमप्रकृतिः— १०३
उत्तरस्मिन्— १४०
उत्साहस्थायि— १०२
उत्साहस्मृति— ८२
उद्दीपना— ३४
उपाया— ९८

ऊ

ऊचुः— ५६-५७

ए

एकतरस्मिन्— ९९
एकरूपेण— १४१
एकस्या एव— १०४
एकैकस्मिन्— ९१
एतन्मते— ९१
एतादृशो— १६७-१७०
एतेषु च— ६६
एवं षोडश— १२६

औ

औग्र्यं— ७४

क

कथञ्चिज्जन्यते— १३५-१३८
कथितपदत्वं— १४६
कनिष्ठाल्प— ११६
कन्यात्व— १९५
करुणस्या— ६२
करुणाभय— ११९

करुणाल— ४५
करुणे— ८२
करुणो हास्य— १०६
कर्णकण्डूयनं— ६५
कर्तव्या— ८१
कलहान्त— २०२
कवीश्वराव— २१३
कव्यनादर— १२७
कष्टमिष्टेन— १४६
काचिद्दूर्ध्वं— ६५
कान्ता हास्या— १०४
कान्तो रति— २०२
कामोन्मेषा— १२१
कायिकश्च— ५०
कालस्य— १७३
कालासहिष्णु— ७४
काव्याभिनय— ८९
किञ्चित्— ६५
कुञ्चितास्यं— १००
केचिन्नट— ६१
कौटिल्य— ६८
क्रियाशैघ्र्य— ८०
क्रीडानुकूल— १९६
क्रीडितं— ५७-५८
क्वचिद्— १७६

ख

खिद्यते - ११७; १९८-१९९
खेद आयास— ७५
ख्याति— १५७

ग

गर्भादयो— ८१
गर्वः सर्वा— ८१
गुणाख्यान— ८३
गुणोऽधिक— १८१
गुणः पतत्— १७९
गुरुः कष्ट— ११७; २००
गुरुः परा— ११७
गोत्रस्खलन— २०१
ग्रहे कच-- १२२
ग्लानिर्निर्ब-- ६८

च

चाटुकार-- २०६
चिन्ता ध्यानं— ७४
चेतसो भ्रम-- ७८

ज

जडताशेष-- ७२
जन्मतः प्रभृति-- ५१
जन्मनः प्रभृति— १२१
जुगुप्सा स्थायि-- १०२-३
जुगुप्सिता— १०३
जृम्भते-- ६६
जृम्भापि— ६१
ज्ञानेष्टा— ६९
ज्ञेयौ— १०६
ज्वरादि— ७९

त

तच्छीलं— ६६
तत्तद्-- १२६-७
तत्पदं— १२७-१२८
तत्र विप्रति-- ७९

तत्र शौर्यं--	७४	धाष्ट्र्या—	७८
तत्रास्य--	१४३	धीराधीरा—	११५
तत्रैवैक—	१४२-४३	धृष्टः स—	११६
तद् विभावा--	७१	**न**	
तन्मोट्टा--	५६	न गुणत्वं—	१७६
तस्माद्रस--	६०	न भाव—	१०६-१११
तात्पर्या--	१२८	न यत्र—	४७
तिर्यगादि—	१११	नयनप्रीतिः—	६७
तृतीयः--	६४	नयवदन—	५२
त्यक्त्वा----	७०	न विना—	६३
त्यक्तात्म--	१२१	न सम्भोगे—	८२
त्रासो मानस--	७२-७३	नानाभिनय—	८४
त्रिधा--	६७	नानारूपेण—	१४१
द		नायका—	११६
दक्षिण—	११६	नारीनीच—	१०२
दत्तं च—	६६	निद्रा चेतो—	७३
दयितस्य—	१२२	निद्राभ्रंशो—	७३
दर्शनश्रवणा—	६६	निद्रां प्राप्त—	७०
दर्शनस्पर्शना—	६३	निन्दाक्षेपा—	७७
दिव्यादि…स्युर्नेत्र—	२०२	निमित्त—	६०
दिव्यादि…स्युर्वेद—	११७	निरर्थत्व—	१३५
दुःखक्रोध—	६०-६१	निरीक्षते—	६६
दुःखाधिकं—	८१	निर्वेदग्लानि—	६७
दुर्गन्धि—	४८	निर्वेदः—	६७
देशादि—	१६१-६२	निश्वासफेन—	६६
दैन्य—	८२	नेपथ्य—	१२२
द्वेषरागा—	८०	न्यूनपदत्वं—	१५३
ध		**प**	
धरणी—	५०	पदप्रणत्य—	२०१
धातु—	७६	पदाधिस्थः--	१२५

परकीया द्विधा--	११६; १६५
परगर्व--	७७
परस्त्रादर्श r—	११७
परानिष्ट —	७१
परेण लक्षिते--	११६
परिक्षीणे--	६८
परोत्कर्षा—	७१
परोन्नति—	१४४
पानके—	६०
पार्श्वमेति —	२०३
पुनरुक्त—	१५६
पूर्वं नारी—	६३; ६७
प्रकाशित—	१६३
प्रकृतस्य—	१५४
प्रकोपे सति—	११६
प्रगल्भत्वं—	१२१
प्रगल्भा च—	११५
प्रगल्भा पति—	११५
प्रतिकूल—	१४६
प्रतिकूलेषु—	८५-८६
प्रतिनायक—	१११
प्रधानत्वं—	१३३
प्रपानकरस—	६०
प्रयाति कोप—	११६; १६७-१६८
प्रलापः—	६२
प्रवासे—	६६
प्रवासो—	६५
प्रसिद्ध्यभावो—	१७०
प्रादुर्भवति—	११७; १६६
प्रियवारः—	२१०
प्रियसङ्गम—	५४
प्रियस्मृत्या—	७४
प्रियस्य—	६५
प्रियागमन—	५४; १२२
प्रियागमनवार्ता—	२१४
प्रियागःसूचक—	११७
प्रियः कृते—	२०८
प्रेयसोऽनु—	१२२
ब	
बहिः—	५०
बहुवारं—	११६
बहुष्वित्यादि—	१४३
बाध्यत्वेनो—	१०८-१०६; १८३-८४
बीभत्सेऽपस्मृति—	८२
बीभत्से वस्तु—	१११
ब्रूते—	६५
भ	
भयानकेन—	१०६
भयं चित्त-	८७
भर्तुरन्य-	६८
भवत्सुरत—	११६
भवेन्मान—	११७
भावो—	६४
भूषणस्य—	१२२
म	
मञ्जिष्ठा—	६७
मञ्जीरादिषु—	१२५

मदो विकारः— ५५-५६
मध्या तत्र— ११५
मध्याप्रगल्भयो···मुग्धा— १९५
मध्या प्रगल्भयो···सामान्या— ११७
मनस्ताप— ५९
मनोभव— १२०
मनोविकारो— ८८
मनः प्रसादो— ७०-७१
मरणं— ७२
माधुर्यं— ५१, १२१
माने सति— ११५
मुकुला— १०४
मुख्यार्था— १५७
मुग्धामध्या— ११५
मूर्च्छना च— ९६
मोहक्रोध- — ६०
मोहो— ७५

य

यती न— १२८-२९
यतो व्यव— १३१-३२
यतः पदा— ४७
यत्र रसानु— १४६
यत्रारब्धा— १५२
यत्रार्थस्य— १६३
यदि वा— १४१-१४२
यदीत्यादि— १४१
यस्य ज्ञाने— १२५
यस्य पीतो— १०३
यस्य यत्र— १५६
यो भवेत्— ११९
यो व्यक्ती— ११९

र

रक्तःक्रोधः— १०१
रतिर्देवादि— १०९
रतिर्हास- — ८४
रत्यादीनां— ९०
रम्यार्थ- — ५७
रसभङ्ग- — ९७
रसस्यानुमितिर्नास्ति— ९१
रसस्यानुमितिहेतु— ९१
रसानामनु— ८४
रसानामस्ति— ११५
रसावस्थः— ८३
रोदनादीनि— ६८-६९
रौद्रस्य भेदिका— १०१
रौद्रस्यालम्बनं— ४५
रौद्राभासे— १११

ल

लक्षिता— १९६-९७
लघुस्तथा— २०१
लाटानुप्रास— १७९-८०
लीलाविलासो— ५८
लुप्तविसर्ग— १४७
लोकाति— ४८
लोके कारण- — ३४
लोकोत्तर— ९१

व

वक्तव्यसमयेऽपि स्याद् वचसो— १२२
वक्तव्यसमयेऽपि स्याद् वचो— ५५
वाक्यदोषो— १३५
वाक्यं— १५१
वागादि— ८५

विकारैर्लोच— ५१; १२१
विकारं सात्त्विकं— ६६
विकृता— ४५
विक्षेपो— ५१; १२१
विच्छित्ति— ५१; १२१
विजेतव्या— ४६
विदग्धा द्विविधा— ११६
विदग्धा लक्षिता— ११६; १९५
विदेशं मत्— २१३
विपश्चिता— ८३
विप्रलम्भो— ९४
विबोधश्चेतना— ७३-७४
विभावनं तु— ३४
विभावा अत्र— ७२
विभावा घोर— ७३
विभावानु— ३४
विभावेनानु— ८९
विभावोऽत्र प्रिया— ७०
विभावोऽत्र भयं— ७१
विभावो मदिरा— ६८
विभावोऽस्याः— ६८
विभावाः कान्त— ७८
विभावास्तत्र कथिता उपाया— ७८
विभावास्तत्र कथिताः श्रमा— ७३
विभावास्तत्र लावण्य— ८१
विभावास्तत्र विश्लेष— ८१
विमुञ्चति न— ६६
विरुद्धानां— १०७
विरुद्धैरपि— ८४
विशेषेणा— ६७
विषण्णा— १०४
विषयस्तु— १२२
विषादविस्मय- — ५९
विषादः— ७८
विस्मय- — ८७
विस्रम्भात्— ११५
वीप्सयो— १४१
वैयाकरणे— १७६
वैवर्ण्य- — ६३-६४
वैशिष्ट्य— ९०
वैस्वर्यं— ६०
वृत्ति— ८२
व्यङ्ग्यकोप— ११६
व्यङ्ग्याव्यङ्ग्य— ११६
व्यञ्जितस्तु— ९०
व्यापारे— ९१
व्युत्पत्तिः— १८०

श

शङ्कागद्गद— ८२
शङ्कानिद्रा— ८२
शान्तस्तु— १०७
शान्ते जुगुप्सा— ८३
शाब्दिके— १८३
शास्त्रचिन्ता— ७५
शास्त्रमात्र— १३०-३१
शून्यस्थिति- — ६९
शृङ्गारहास्य— ३४
शृङ्गारात्तु— १०६
शृङ्गं हि— ९२
श्लेषमर्यादया— १७२
श्लेषाप्रयोजकं— १२९

स

सङ्कीर्णत्वं— १८१
स चानुभावो— ५०
सजातीय— ८४
सतीव— ६६
स तेषां— ११६
सत्त्वोद्रेक- — ६१
सदृशज्ञान— ८०
सन्ताप— ११८
सन्दिग्धत्वं— १६०
सन्दिग्धं— १३०
समस्तजगत:— ११६
समासे— १३८
सविधो— ५४
साकाङ्क्षत्वं— १८३
सा ज्ञात- — ११५
सात्त्विक:— ५०
साधारणो— ९२
साधारण्याद्— ८९
साधारण्ये— ८६
साम प्रियवचो— ६८
सुखदु:खादि— ८४
सुखेऽस्य— ६५
संस्कार— ८०
स्थायिनोऽपि— ८३
स्थायिपद— ८३
स्थायिभावो— ९२
स्मरणं— ८२
स्मितक्रोध— १२२
स्वकीया कन्यका— ६२
स्वकीया पर- — ११५
स्वगोचरी— ६०
स्वप्नेन्द्र— ६६
स्वरूप— १४८-१४६
स्वशब्देन— १६७
स्वसंवेद्य- — ६१
स्वानधिष्ठित— ११७; १६८
स्वीयत्व— ८६
स्वेद:……वेपथु:— ५६
स्वेद:…… सम्भ्रम:— ६४

ह

हर्षक्रोध:— ५६
हर्षादयो— ८३
हर्षोत्कर्षौ— ६८
हसितन्तु— १२२
हावभावौ-- ५१; १२१
हासो भयं— ८३
हास्यो हास— ६६
हेलात्यर्थं— १२१
हृष्यति— ११६

❀❀❀❀

An alphabetical list of books and authors cited or referred to by Gaṅgānanda in his works.

(Figures in the margin refer to pages.)

अनर्घ्यराघव— १६९

कादम्बरी— ९९

कामशास्त्र— १७७

काव्यप्रकाश— १८१

काव्यप्रकाशकृत्— १३२; १४४

किरातार्जुनीय— १६९

कुमारसम्भव— १६९, १८३

नैषधीयचरित— १३२

प्राचीन— १०८; २०२

भरत— ५२; ५८, १०६

भानु (कवीश्वर); (कविचक्रवर्तिश्री) भानुदत्त (मिश्र);
भानु (मिश्र)— ६१; १८८; २१३

मन्दारमञ्जरी— १६९

रघुदेवशर्मन्— १६२

रत्नावली— १६९

रासक्रीडा— ९३

वामनाचार्य— १४४; १७२

वीरचरित— १६९

वेणीसंहार— १६९; १७७